तीर्थसारसंग्रहः

TĪRTHASĀRASAṀGRAHA

CSUGCKL 2
27818
Acc.No: 27818

Dr. Atul Kumar Nandasharma

तीर्थसारसंग्रहः

TĪRTHASĀRASAṀGRAHA

Rashtriya Sanskrit Sansthan Deemed University
GURUVAYOOR CAMPUS
P.O. PURANATTUKARA
THRISSUR
KERALA 680 55
LIBRARY



RASHTRIYA SANSKRIT SANSTHAN DEEMED UNIVERSITY (UNDER MINISTRY OF H.R.D. GOVT. OF INDIA)
ACCESSION NO. 27818
DATE 1/10/10

Dr. Atul Kumar Nandasharma
M.A., Ph.D., D.Lit
Sr. Reader, Dept. of Dharmashastra
Rastriya Sanskrit Sansthan, (Deemed University)
Sri Sadashiva Campus, Puri
ORISSA

TĪRTHASĀRASAṀGRAHA
All copy right to the Publisher

Published by :
Smt. Urmila Nanda
C/o. Shashi Sekhar Garabadu
Ratha Road, Old Town, Bhubaneswar-2
ORISSA

First Edition : 2004

500 copies

SHRI GUNDICHA
(Car Festival of Lord Jagannath)

Price : Rs. 200/-

Composed by :
Shastri Astro Computers
Mausima Temple Lane, Puri-1

Printed at :
Mahavir (Off-Set) Press
Marchikote Square, Grand Road, Puri - 1 (Orissa)
Ph: (06752) 226710(O), 9861017350 (M)



समर्पणम्

यो धर्मं स्वपरम्पराप्रचलितं संसेवते सन्ततम्,
यः शास्त्रं जनकाद्विवेद निखिलं धर्मेण मार्गेण वै ।
यश्चाचार्यपदे वसन् स्थिरमतिर्मन्मार्गनिर्देशकः,
सोऽयं सातिशयं सुधीर्विजयते शर्मेह वाचस्पतिः ॥

धर्मशास्त्रेषु तथा शास्त्रान्तरेषु च येषां विद्वत्प्रकाण्डानां पाण्डित्यं विभिन्नासु भाषासु च सुमहान् प्रवेशः पाठने भाषणे शास्त्रचर्चायां भारतीयपरम्परासंरक्षणे च येषां महानुभावानां योगदानमविस्मरणीयं तेषां गुरुवराणां समग्रभारतवर्षे धर्मशास्त्र-विभागशिखरमण्डितानां पण्डितमार्त्तण्डानामाचार्यप्रवराणां कामेश्वरसिंहदरभङ्गासंस्कृतविश्वविद्यालयस्य धर्मशास्त्रविभाग-मुख्याचार्यचराणां श्रीवाचस्पतिशर्मत्रिपाठिमहोदयानां करकमले 'तीर्थसारसंग्रहं' सादरं सभक्तिकं समर्पयति ।

— *अतुलः*

मङ्गलाचरणम्

श्रीक्षेत्रे पुण्यपीठे कलिकलुषहरे पूजितं भक्तवृन्दै-
र्भद्रासंकर्षणाभ्यामसितगिरिपतिं रत्नसिंहासनस्थम् ।
नाथानां नाथमेकं पतितजनगणत्राणसङ्कल्पचित्तम्
वन्दे तं दारुमूर्त्तिं करपदरहितं पावनं पावनानाम् ॥१

यं शैवाः समुपासते शिव इति ब्रह्मेति वेदान्तिनः
बौद्धाः बुद्ध इति प्रमाणपटवः कर्त्तेति नैयायिकाः ।
अर्हन्नित्यथ जैनशासनरताः कर्मेति मीमांसकाः
सोऽयं वो विदधातु वाञ्छितफलं नीलाद्रिनाथो हरिः ॥

नीलाद्रौ शङ्खमध्ये शतदलकमले रत्नसिंहासनस्थं
सर्वालङ्कारयुक्तं नवघनरुचिरं संयुतं चाग्रजेन ।
भद्रायाः वामभागे रथचरणयुतं ब्रह्मरुद्रेन्द्रवन्द्यम्
वेदानां सारमीशं स्वजनपरिवृतं ब्रह्मदारु स्मरामि ॥

सृष्टौ या सर्गरूपा जगदवनविधौ वैष्णवी या च रौद्री
संहारे चापि यस्याः जगदिदमखिलं क्रीडनं या पराख्या ।
पश्यन्ती मध्यमाऽथो तदनु भगवती वैखरी वर्णरूपा
साऽस्माकं च प्रसन्ना विधिहरिगिरिशाराधिताऽलङ्करोतु ॥

***

मुखबन्धः

विदितमस्ति तत्र भवतां समेषां प्रेक्षावतां विदुषां श्रुतिस्तु वेदो विज्ञेयो धर्मशास्त्रं तु वै स्मृतिरिति । अर्थात् धर्मशास्त्रस्यापरा संज्ञा भवति स्मृतिः ।

श्रुतिस्मृत्युदितं धर्ममनुतिष्ठन् हि मानवः ।
इहकीर्त्तिमवाप्नोति प्रेत्य चानुत्तमं सुखम् ॥ इति ।

मनुवचनानुसारं श्रुतिस्मृतिप्रतिपादितं कर्माचरणं कृत्वा जनः सुखं परजन्मनि च स्वर्गादिफलमश्नुते । प्राचीनकालादारभ्याद्यावधि जनानां मनसि यत् किञ्चिद्वा भवतु धर्मभावना विद्यते । पापं प्रति शङ्का भवति। यदा जनः पापग्रस्तो भवति तदा पापक्षयार्थं नैमित्तिकं कर्म समाचरति। तच्च कर्म प्रायश्चित्तमेव । तदर्थं धर्मशास्त्रकारैः प्रतिपादितं यत्-

विहितस्याननुष्ठानान्निन्दितस्य च सेवनात् ।
अनिग्रहाच्चेन्द्रियाणां प्रायश्चित्तीयते नरः ॥

अद्यापि विंशशताब्द्याः शेषभागे विकटकलियुगे चोग्राधुनिकवादे पाश्चात्त्यसभ्यताविमण्डिते काले जनाः पापं प्रति शङ्किताः भवन्ति । तदर्थं च धर्मशास्त्रस्य मार्गं स्वीकुर्वन्ति । अतः धर्मशास्त्रस्यास्य व्यवस्था सर्वकालिकी । प्रयोजनार्थं कामार्थं च तीर्थस्यावश्यकता सुतरामेव राराजते । पापक्षयार्थमथवा स्वर्गपुत्रादिप्राप्त्यर्थं कामनया जनाः बहुप्राचीनकालादेव तीर्थाटनं कुर्वन्तीति शास्त्रेभ्यः सुविज्ञातम्। धर्मशास्त्रे तीर्थगमनस्य प्रकारः फलस्य विचारोऽपि दरीदृश्यते। समग्रेऽस्मिन् भारतवर्षे बहुनि तीर्थस्थानानि विद्यन्ते । नदनदीदेवालयपर्वतकन्दरादिकं तीर्थस्थानरूपेण पुराणादिषु प्रवर्णितं विद्यते । तत्र जनाः भक्तिभावनया गत्वा स्वभक्तिनैवेद्यं समर्प्य

पूजाजपस्नानादिकं च विधाय स्ववाञ्छितानि फलानि लभन्ते । तीर्थमाहात्म्यं धर्मशास्त्रेषु पुराणेषु बहुनिगदितमस्ति। आस्तिकबुद्धयः जनाः नितरां तीर्थाटनं कृत्वा सुफलं लभन्ते । बहुविधेषु तीर्थेषु हिन्दुधर्मस्य सप्तप्रमुखस्थानानि विद्यन्ते तानि यथा-

अयोध्या मथुरा माया काशी काञ्ची ह्यवन्तीका ।
पुरीद्वारावती चैव सप्तैताः मोक्षदायकाः ॥ इति ।

महम्मदसम्प्रदायजनानामपि तीर्थाटनं विद्यते । मक्कां मदिनां प्रति ते गच्छन्ति । ख्रीष्टसम्प्रदायाः जनाः जेरुजेलं प्रति धर्मभावनया गच्छन्ति। अतः सर्वेषां सम्प्रदायानां पुण्यस्थानं विद्यते । जनाः अपि विश्वासेन गच्छन्ति। तीर्थानां महत्त्वं वरीवर्त्तते । श्रुतिस्मृतिपुराणादिषु तत्तत् स्थानानां महत्त्वं गमनप्रकारः पारलौकिकफलप्राप्त्यादिविषये वर्णनं दृश्यते । अस्मिन् तीर्थप्रसङ्गे भारतवर्षे उत्कलस्य योगदानं महत्त्वपूर्णमस्ति। यत्र स्वयं लीलापुरुषोत्तमः श्रीजगन्नाथो विराजते यस्य दर्शनेन जनाः योनिजन्मजनितयन्त्रणां विस्मरन्ति वैकुण्ठं च लभन्ते तस्य देशस्योत्कलस्य का कथा । उत्कलेषु विराजमानानां बहूनां तीर्थक्षेत्राणां विषये सर्वभारतीयस्तरेषु नैवालोचनं प्राप्यते । उत्कलेषु एवम्भूतानि बहुनि तीर्थक्षेत्राणि विद्यन्ते येषां विषये पुराणेषु समुल्लेखो विद्यते । परन्तु समालोचकाः निबन्धारश्च तस्मिन् विषये मौनमवलम्बन्ते । उत्कलप्रदेशस्य प्रतिमण्डलं प्रतिग्रामं देवालयैः आच्छादितो वर्त्तते । यत्रापि वा कश्चित् गच्छतु तत्र न्यूनातिन्यूनं शिवमन्दिरं शक्तिमन्दिरं एका च पुष्करिणी अवलोक्यते । एतेन उत्कलीयानां जनानाम् आध्यात्मिकता धर्मभावना सात्त्विकता च परिप्रकाश्यते ।

मयाऽत्र ग्रन्थे प्रमुखभूतानां क्षेत्राणां संग्रहो विहितः । तेषामतिरिच्य अन्यानि बहूनि प्रसिद्धानि अप्रसिद्धानि गोपनीयानि च तीर्थक्षेत्राणि विद्यन्ते येषां विषये तत्त्वानि तथ्यानि च लब्ध्वापि अत्र

नैव प्रदत्तानि सन्ति । कारणन्तु सुस्पष्टं विद्यते ग्रन्थस्यास्य प्रकाशनाय अधुना यावान् व्ययोः भवति तदर्थं सर्वेषामाकलनं तथा च परिप्रकाशनं मत्कृते कष्टकरं सञ्जातम् । अतः सर्वज्ञो भगवान् नूनं परिमार्जयेत् ।

ग्रन्थस्यास्य विरचनायां मया विशेषतः प्रोफेसर् डॉ० हरेकृष्णशतपथि-प्रोफेसर् डॉ० किशोरचन्द्रमहापात्र-प्रोफेसर् डॉ० खगेश्वरमिश्रप्रभृतिभ्यः सुमहती प्रेरणा अवाप्ता । मम जीवनस्य ये प्राणभूताः भवन्ति छात्राः तेभ्यः सकाशान्नितरां प्रेरणा लभ्यते परिवारपक्षतश्च अनुकम्पा प्राप्यते तस्मात् एतेभ्यः सर्वेभ्यः मान्यमान्येभ्यः कार्त्तज्ञं धन्यवादं प्रणामञ्च व्याहरामि ।

महता परिश्रमेण संगणक(कंप्युटर)यन्त्रद्वारा ग्रन्थस्यास्य प्रकाशनाय श्रीयुक्तदेवव्रतरथ(कालिआ)महोदयः सर्वदा उपकारं कृतवान् । अतः सः धन्यवादार्हः ।

परिशेषे भगवान् नीलकन्दरनाथः अन्तर्यामिजगन्नाथः ग्रन्थस्यास्य रक्षां करोतु, छात्राः गवेषकाः आधुनिकाश्च तीर्थप्राणाः जनाः ग्रन्थस्य गुरुत्वं महत्त्वं गाम्भीर्यञ्च गृह्णन्तु इति सम्प्रार्थ्य विरमामि विस्तरात् ।

विदुषां गुणमुग्धः

पण्डितश्रीअतुलकुमारनन्दशर्मा

ग्रन्थसंकेताः

अ.स्मृ.	-	अत्रिस्मृतिः
अङ्गि.स्मृ.	-	अङ्गिरः स्मृतिः
अ.पु.	-	अग्निपुराणम्
अनु.प.	-	अनुशासनपर्वणि
आ.गृ.सू.	-	आपस्तम्बगृह्यसूत्रम्
आ.गृ.सू.	-	आश्वलायनगृह्यसूत्रम्
आ.ध.सू.	-	आपस्तम्बधर्मसूत्रम्
ऋ.वे.	-	ऋग्वेदः
ऐ.ब्रा.	-	ऐतरेयब्राह्मणः
क.उ.	-	कठोपनिषत्
का.स्मृ.	-	कात्यायनस्मृतिः
का.दी.	-	कालदीपः
का.मा.	-	कालमाधवः
का.मा.का.	-	कालमाधवकारिका
का.सा.	-	कालसारः
कू.पु.	-	कूर्मपुराणम्
कृ.क.	-	कृत्यकल्पतरुः
कृ.कौ.	-	कृत्यकौमुदी
कौ.अ.	-	कौटलीयार्थशास्त्रम्
ग.पु.	-	गरुडपुराणम्
गौ.गृ.सू.	-	गौतमगृह्यसूत्रम्
गौ.ध.सू.	-	गौतमधर्मसूत्रम्
च.चि.	-	चतुर्वर्गचिन्तामणिः
त.वा.	-	तन्त्रवार्त्तिकम्
ता.ब्रा.	-	ताण्ड्यब्राह्मणः

तै.आ.	-	तैत्तरीय आरण्यकम्
तै.ब्रा.	-	तैत्तरीयब्राह्मणः
त्रि.से.	-	त्रिस्थलिसेतुः
द.स्मृ.	-	दक्षस्मृतिः
ध.इ.	-	धर्मशास्त्र का इतिहास
ना.पु.	-	नारदीयपुराणम्
ना.स्मृ.	-	नारदीयस्मृतिः
निरु.	-	निरुक्तः
नि.सि.	-	निर्णयसिन्धुः
नि.सि.टि.	-	निर्णयसिन्धुटिप्पणी
नै.च.	-	नैषधीयचरितम्
प.पु.	-	पद्मपुराणम्
प.स्मृ.	-	पराशरस्मृतिः
प.मा.स्मृ.	-	पराशरमाधवीयस्मृतिः
पा.गृ.सू.	-	पारस्करगृह्यसूत्रम्
पा.सू.भा.	-	पाणिनिसूत्रभाष्यम्
पू.मी.सू.	-	पूर्वमीमांसासूत्रम्
बृ.हा.स्मृ.	-	बृद्धहारीतस्मृतिः
बृ.स्मृ.	-	बृहस्पतिस्मृतिः
बौ.स्मृ.	-	बौधायनस्मृतिः
बौ.ध.सू.	-	बौधायनधर्मसूत्रम्
ब्र.पु.	-	ब्रह्मपुराणम्
भ.गी.	-	भगवद्गीता
भी.प.	-	भीष्मपर्व
म.पा.	-	मदनपारिजातः
म.पा.वि.	-	महापातकविमर्शः
मा.स्मृ.	-	मार्कण्डेयस्मृतिः

मिता.	-	मिताक्षरा
य.स्मृ.	-	यमस्मृतिः
या.स्मृ.	-	याज्ञवल्क्यस्मृतिः
र.म.	-	रघुवंशमहाकाव्यम्
ल.हा.स्मृ.	-	लघुहारीतस्मृतिः
ला.गृ.सू.	-	लाट्यायनगृह्यसूत्रम्
ला.श्रौ.सू.	-	लाट्यायनश्रौतसूत्रम्
लिं.पु.	-	लिङ्गपुराणम्
वन.प.	-	वनपर्वणि
व.पु.	-	वराहपुराणम्
व.स्मृ.	-	वसिष्ठस्मृतिः
व.ध.सू.	-	वसिष्ठधर्मसूत्रम्
वा.पु.	-	वायुपुराणम्
व्या.स्मृ.	-	व्यासस्मृतिः
वि.ध.पु.	-	विष्णुधर्मोत्तरपुराणम्
शा.स्मृ.	-	शातातपस्मृतिः
शान्ति.प.	-	शान्तिपर्वणि
शु.स्मृ.	-	शुक्रस्मृतिः
श्रा.दी.	-	श्राद्धदीपः
श्रा.प्र.	-	श्राद्धप्रदीपः
शं.स्मृ.	-	शङ्खस्मृतिः
स्क.पु.	-	स्कन्दपुराणम्
स्मृ.च.	-	स्मृतिचन्द्रिका
स्मृ.स.	-	स्मृतीनां समुच्चयः
सं.म.	-	संस्कारमयूखः
हा.स्मृ.	-	हारीतस्मृतिः

***

विषयसूची

विषयाः	पृष्ठाङ्काः
१. तीर्थानां स्वरूपं भेदाश्च	१३-११०
तीर्थानां प्रयोजनीयता	१३
तीर्थानां भेदाः	४५
अयोध्या	५१
मथुरा	५४
मायापुरी	५७
काशी	५८
काञ्ची	८२
अवन्तिका	८३
द्वारका	८४
कुरुक्षेत्रम्	८६
प्रयागः	८८
गङ्गा	९२
गोदावरी	९५
नर्मदा	९६
गया	९८
तीर्थानां पापक्षयहेतुत्वविचारः	१०३
२. उत्कले प्रतिमण्डलं तीर्थक्षेत्राणां नामानि तेषामैतिह्यं माहात्म्यं शास्त्रीयत्वञ्च	१११-१९३
उत्कलशब्दार्थः उड्र-कलिङ्ग-उत्कलशब्दानां विमर्शश्च	१११
प्राचीनोत्कलस्य भौगोलिकी स्थितिः ऐतिह्यं संस्कृतिश्च	१२३
उत्कलीयतीर्थक्षेत्राणां नामानि	
श्रीजगन्नाथक्षेत्रम्	१३९
कोणार्कतीर्थक्षेत्रम्	१६१
विरजाक्षेत्रम्	१६५
लिङ्गराजक्षेत्रम्	१६७

विषयाः	पृष्ठाङ्काः
पुण्यतोया प्राची	१७१
बाणपुरभगवती	१७२
काकटपुरस्य मङ्गला	१७३
कोणार्क-रामचण्डी	१७४
वाटमङ्गला	१७५
देवगौरी/केदारगौरी	१७६
तारिणी	१७६
झङ्कडवासिनी शारला	१७७
समलेश्वरी	१७७
चर्च्चिकादेवी	१७८
कटकचण्डी	१७९
कालिजाई	१७९
तारातारिणी	१७९
क्षीरचोरागोपीनाथः	१८०
साक्षीगोपालः	१८१
तोटागोपीनाथः	१८२
अलारनाथः	१८२
अनन्तवासुदेवः	१८३
बलदेवः	१८३
महाविनायकः	१८४
गुप्तेश्वरः	१८५
पञ्चलिङ्गेश्वरः	१८५
कपिलासः	१८६
चन्दनेश्वरः	१८७
धबलेश्वरः	१८८
आखण्डलमणिः	१८९
भारतीयतीर्थक्षेत्रेषु उत्कलीयतीर्थक्षेत्राणां सन्तुलनम्	१९१
ग्रन्थसूची	१९४

***

तीर्थानां स्वरूपं भेदाश्च

तीर्थानां प्रयोजनीयता—

विदितमिदं तत्र भवतां समेषां प्रेक्षावतां विदुषां यत् सकलशास्त्रललामभूतं धर्मशास्त्रं विश्ववासिनां जनानां सर्वदैव सुमहदुपकारं कृत्वा बहुप्राचीनकालादेव समागच्छति । मन्वादिभिः महर्षिभिः प्रणीतं शास्त्रं तत्रैव शास्त्रे मुख्यरूपेण येन प्रकारेण जनानां कल्याणं भवेत् अथवा धर्मार्थकाममोक्षाणां चतुर्णां पुरुषार्थानां प्राप्तिर्भवेत् तदर्थमस्मिन्नेव शास्त्रे सुमहान्नोद्यमः प्रयासश्च निर्दिष्टो विद्यते। मुख्यतः जनाः वेदविहितस्य कर्मणः त्यागेन निन्दितानां कर्मणां समाचरणेन एकादशविधानां इन्द्रियाणामसंयमेन पतिताः भवन्ति । पतिताश्च जनाः निरयगामिनः भूत्वा पुरुषार्थेभ्यः विच्युताः भवन्ति । एवंभूतानां विच्युतानां जनानां पुनः संस्थापनार्थम् अर्थात् केनोपायेन एते पापविमुक्ताः भूत्वा पुनश्च स्वर्गादिफलं प्राप्नुयुः तदर्थं धर्मशास्त्रे मुख्यभूतेषु त्रिषु आचारव्यवहारप्रायश्चित्तेषु सुमहान् विचारो दरीदृश्यते।

समेषां जनानां विशेषतः हिन्दुधर्मानुरागिणामास्तिकानां जनानां त्रीणि कर्माणि मुख्यतया समालोचकानां दृष्टिगोचराणि भवन्ति । तानि च कर्माणि नित्यं कर्म यथा यस्य अकरणे प्रत्यवायो भवति यथा सन्ध्यावन्दनादीनि, नैमित्तिकं नाम किमपि निमित्तमुररीकृत्य यत् कर्म क्रियते तदेव यथा पुत्रजन्मनि जातकर्मादिरूपं ग्रहणस्नानादिकं वा । काम्यं कर्म तु फलकामनामभिलक्ष्यीकृत्य क्रियमाणं कर्म काम्यम्, यथा- पुत्रप्राप्त्यर्थं पुत्रेष्टि स्वर्गादिप्राप्त्यर्थं वा अग्निहोत्रं जुहूयात् स्वर्गकामः इति । अत्रैव पापरूपं निमित्तं दूरीकरणार्थं यदेवकर्म

निमित्तरूपं भवति तस्यैव कर्मणः कापि अपरा संज्ञा प्रायश्चित्तमिति धर्मशास्त्रकाराः समामनन्ति । तस्यैव प्रायश्चित्तस्य लक्षणं कात्यायनेन निर्दिष्टं यथा-

प्रायो नाम तपः प्रोक्तं चित्तनिश्चयोच्यते ।
तपो निश्चयसंयोगात् प्रायश्चित्तं विदुर्बुधाः ॥

एतत् प्रायश्चित्तं पापानुरूपं भवति । तत्रापि पापस्यापि भेदो दृश्यते यथा [1]महापातकं, [2]अतिपातकं, पातकं, [3]उपपातकं, [4]अनुपातकं चेति पञ्चविधम् । अपि च [5]संकरीकरणं, [6]मलिनीकरणं, [7]अपात्रीकरणम् इत्यादीनि पापरूपाणि विद्यन्ते । विभिन्नानां

---

१. ब्रह्महत्या सुरापानं स्तेयं गुर्वङ्गनाङ्गमः ।
महान्ति पातकान्याहुः संसर्गश्चापि तैः सह ॥ -म.स्मृ. ११/५४

२. मातृगमनं दुहितृगमनं स्नूषागमनमित्यतिपातकानि इति विष्णुनाभिहितम् ।
-महापातकविमर्शः पृ-३९

३. गोवधोऽयाज्यसंयाज्यपारदार्यात्मविक्रयाः ।
गुरुमातृपितृत्यागः स्वध्यायाग्न्योः सुतस्य च ॥
-एवमेवोपपातकानि, म.स्मृ. ११/५९,६६

४. पितृष्वसृमातृष्वसृगमनञ्च श्रोत्रियऋत्विग् उपाध्यायमित्रपत्न्यभिगमनं चानुपातकमिति ।
-महापातकविमर्शः पृ-३९ ।

५. खराश्वोष्ट्रमृगेभानामजाविकवधस्तथा ।
सङ्करीकरणं ज्ञेयं मीनाहि महिषस्य च ॥

६. कृमिकीटवयोहत्या मद्यानुगतभोजनम् ।
फलैधः कुसुमस्तेयमधैर्यं च मलावहम् ॥

७. निन्दितेभ्यो धनादानं वाणिज्यं शूद्रसेवनम् ।
अपात्रीकरणं ज्ञेयमसत्यस्य भाषणम् ॥

पापानामपि प्रकारद्वयं धर्मशास्त्रकाराः स्वीकुर्वन्ति तद्यथा- कामकृतं अर्थात् 'ज्ञानकृतम्, अकामकृतम्, अज्ञानकृतं वेति । अज्ञानकृतस्य पापस्य प्रायश्चित्तं तु धर्मशास्त्रकाराः स्वीकुर्वन्ति कामकृतस्य पापस्य प्रायश्चित्तं प्रायसः नैव स्वीकुर्वन्ति यतोहि कामकृतस्य प्रायश्चित्ताचरणेन न विशुद्धिर्भवति परन्तु केषाञ्चित् धर्मशास्त्रकाराणां मते कामकृतस्यापि पापस्य प्रायश्चित्तेन विशुद्धिर्भवति तदर्थं अकामकृतस्य पापस्य कृते यत् प्रायश्चित्तं निर्दिष्टमस्ति तस्यैव कामकृतस्य पापस्य कृते प्रायश्चित्ताचरणं तु द्वैगुण्यं कर्त्तव्यं यथा स्मृतिषु-

"विहितं यदकामानां कामात्तत् द्विगुणं भवेत् ।"

एतेन विज्ञायते कामकृतस्यापि पापस्य प्रायश्चित्ताचरणेन पापविमुक्तिर्भवति एतच्च प्रायश्चित्तं व्रतरूपम् अध्ययनरूपं जपरूपं स्नानरूपं तीर्थाटनरूपं वा भवति यथा- ब्रह्महत्यायां प्रायश्चित्तं निर्दिष्टं विद्यते यत् ब्रह्महा द्वादशवार्षिकं यावत् अरण्यं गत्वा कुटीं निर्माय भिक्षाटनेन एकवारं भोजनं कृत्वा ब्रह्मचर्यं धृत्वा नित्यस्नायी [९]ध्वजादिधारणपूर्वकं मन्त्रं जप्त्वा द्वादशवर्षैः पापविमुक्तो भवति । अस्मिन्नेव प्रकरणे तीर्थाटनस्यापि प्रायश्चित्तप्रकारः समालोचकानां मनसि आगच्छति । यतो हि प्रायश्चित्तप्रकारेषु अयं प्रकारः समागच्छति यथा [१०]सरस्वत्याः नद्याः वेदमन्त्रं जप्त्वा ब्रह्महा प्रतिकूलं

---

८. ज्ञानत इति वक्तव्ये यत् कामतः इत्युक्तं तत् ज्ञानकामयोस्तुल्यत्व-प्रदर्शनार्थम् । ज्ञानाज्ञानतः इत्युक्तेऽपि कामः प्राप्नोति अविना-भावात् । न च चौरादिभिर्बलात्प्रवर्त्यमानस्य सत्यपि षियज्ञाने कामनाभावान्नाविनाभाव इति वाच्यम् । -या.स्मृ. ३/२२६

९. शिरः कपाली ध्वजावान् भिक्षाशी कर्म वेदयन् ।
ब्रह्महा द्वादशाब्दानि मितभुक् शुद्धिमाप्नुयात् ॥ या.स्मृ. ३/२४३

१०. हविष्यभुग्वाऽनुसरेत्प्रतिस्रोतः सरस्वतीम् ।
जपेद्वा नियताहारस्त्रिर्वै वेदस्य संहिताम् ॥ म.स्मृ.११/७७

गच्छेदिति । अयं यः प्रकारः स एव प्रकार तीर्थाटनं भवेदिति समालोचकानां मतम् । कुत इति शंकायां सरस्वती पुण्यतोया नदी भवति प्रतिकूलं गमनं तु उत्पत्तिस्थलं प्रति गमनं निर्दिश्यते । अतः पापनिमित्तमास्तिकभावनया मन्त्रजपादिपूर्वकम् अटनमेव तीर्थाटनं समीचीनम् । अतः तीर्थाटनं सर्वदैव नैमित्तिककर्मविशेषो भवति । इयमपि तीर्थयात्रा काम्यकर्मरूपा भवति । यतो हि पुरुषार्थप्राप्ति-कामनया अथवा पुत्रादिप्राप्तिकामनया तीर्थयात्रा अमरादिदर्शनं गङ्गादिस्नानं च जनाः नितरां कुर्वन्ति तदर्थं तीर्थयात्रा काम्यरूपाऽपि भवति ।

अस्माकं भारतवर्षे यथा हिन्दवः जनाः आस्तिकभावनया तीर्थाटनं कुर्वन्ति तथैव भावना बौद्धाः ख्रीष्टजनाः अपि तीर्थाटनं कुर्वन्ति । धर्मेषु तीर्थस्थानं विद्यते, तत्तत् स्थानं प्रति धर्मकांक्षिणः जनाः गच्छन्ति । सर्वेषु सम्प्रदायेषु केषुचित् विशिष्टेषु स्थानेषु अधिकपवित्रतानिमित्तं गुरुत्वमस्ति । तत्तत् स्थानं प्रति गमनाय विधानमपि शास्त्रेषु विद्यते । तदेव विधानं तीर्थयात्राविधानपरकमिति समालोचकानां गवेषकाणां च दृष्टिपथारूढं भवति । यवनानां तीर्थस्थानं तु मक्का-मदीनाप्रभृति विद्यते । यवनानां सम्प्रदाये विद्यते यत्कथञ्चित् प्रकारेण अन्यूनमेकवारं एतत् स्थानं द्रष्टव्यम्। एतस्य स्थानस्य गमनं तु 'हज्' इति कथ्यते यः यवनः हज्-यात्रां कृत्वा समागच्छति सः हाजी भवति । अस्यां मक्का-मदीनायां यवनसम्प्रदायस्य प्रवर्त्तकः भगवतः महम्मदस्य जन्म मरणं च अभूत् तदर्थं यवनानां कृते स्थानमिदं अतीव महत्त्वपूर्णं गन्तव्यं च भवति ।

योगीश्वरयाज्ञवल्क्योऽपि सरस्वतीगमनविषये प्रतिपादयति तद्यथा-
अरण्ये नियतो जप्त्वा त्रिर्वै वेदस्य संहिताम् ।
शुद्ध्येत वा मिताशित्वात्प्रतिस्रोतः सरस्वतीम् ॥ या.स्मृ.३/२४९

बौद्धानामपि चत्वारि तीर्थस्थानानि विराजन्ते । तानि यथा लुम्बीनि-बुद्धगया-सारनाथ तथा च कुशीनारा । एतानि चत्वारि स्थानानि क्रमानुसारं भगवतः बुद्धस्य जन्मस्थानं ज्ञानस्थानं धर्मप्रवचनस्थानं तथा च निर्वाणस्थानं भवति । एतेषां चतुर्णां स्थानानां दर्शनं तु बौद्धाः सानन्देन आस्तिकभावनया कुर्वन्ति ।

ख्रीष्टानामपि जेरुजेलम् इति स्थानं सर्वोच्चं पवित्रतमं स्थानं भवति । यत्र बहवः ख्रीष्ट आस्तिकजनाः दर्शनाय गच्छन्ति ।

अस्माकं हिन्दुधर्मे बहुनि तीर्थस्थानानि पुण्यभूमावस्मिन् भारतवर्षे विद्यन्ते । तेषु तीर्थस्थानेषु तत्र नदीनां नामानि पर्वतानां च योगदानमतीवमहत्त्वपूर्णं विद्यते । प्राचीनकाले मध्यकालेऽपि भारतीयाः जनाः तीर्थयात्राभ्यः लाभान्विताः अभूवन् । यद्यपि तदानीन्तनकाले भारतवर्षे विभिन्नानि राज्यानि आसन् जनाः अपि विभिन्नसम्प्रदायियाः आसन् । तथापि तीर्थयात्रार्थं भारतीया संस्कृतिः देशस्य महत्त्वपूर्णमौलिकी एकता सर्वदैव समुन्नता सम्बर्द्धिता चासीत् । उत्तरस्य कैलासापर्वतादारभ्य दक्षिणस्यां रामेश्वरं यावत् प्रायः हिन्दवः गच्छन्ति । तत्र भेदाभेदभावना नायाति । अपि तु सर्वेऽपि समानरूपेण पवित्रतां स्वीकुर्वन्ति । यद्यपि तदानीन्तनकाले अद्यापि च हिन्दुसमाजः बहुजातिषु विभक्तश्चासीत् । तथापि जाति संकीर्णता महती आसीत् । तथापि तीर्थयात्रार्थं सर्वेषां जनानां एकस्मिन् पवित्रस्थाने एकस्यां पवित्रनद्यां च पूजने स्नानादिकं कर्म समानरूपेण प्रचलति । तस्यैव पवित्रस्थानस्य परम्परा तीर्थयात्रिणां संयमशीलता साधुसज्जनानां समागमनेन तीर्थस्थानस्य वातावरणेन तीर्थयात्रिणः आध्यात्मिकभावनायाः सृष्टिर्भवति । तेषां मनसि च एतादृशी आध्यात्मिकी भावना जागरिता भवति । तीर्थयात्रानन्तरकालेऽपि तीर्थयात्री अनेकदिनं यावत् तस्याः भक्तिभावनया अनुप्राणिता भूत्वा

निवसति । तीर्थयात्रागमनं एतादृशं कर्म आसीत् यत् दैनन्दिनं स्वार्थमयं जीवनयन्त्रणारूपं यत् कर्म तस्मात् दूरीकरणार्थं तीर्थाटनं सहायकं भवति । अपि च तीर्थयात्राद्वारा जनः उच्चतरदीर्घकालीनमहान्नीति-वादी-आध्यात्मिकवादी च भूत्वा तिष्ठति । यतो हि तीर्थस्थानेषु देवानां दर्शनं तत्रैव स्नानपूजनादिकं च कृत्वा तस्य मनसि परिवर्त्तनं भवति । स्वकीयं दुष्कर्म प्रति जनः नितरां वीतस्पृहो भवति तदर्थमहं विचारयामि धर्मशास्त्रकाराः तीर्थयात्रानिमित्तं परामर्शं प्रदत्तवन्तः । विष्णुधर्मसूत्रानुसारं सामान्यस्य धर्मस्य कारणानि उपलब्धानि भवन्ति। तेषु कारणेषु तीर्थाटनस्य महत्त्वं महर्षिणा प्रतिपादितम् । तद् यथा[११]-

क्षमा सत्यं दमः शौचं दानमिन्द्रियसंयमः ।
अहिंसा गुरुशुश्रूषा तीर्थानुसरणं तथा ॥
आर्यवं लोभशून्यत्वं देवब्राह्मणपूजनम् ।
अनसूया तथा धृतिः धर्मसामान्य उच्यते ॥

भारतस्य तथा च पृथिव्याः प्राचीनतमः धर्मग्रन्थो भवति ऋग्वेदः। तस्मिन् वेदे तथा च वैदिकसंहितासु तीर्थशब्दस्य बहुवारः प्रयोगो दृष्टिगोचरीभूतो भवति । कासुचित् सूक्तिषु तीर्थशब्दस्य प्रयोगः मार्गार्थे प्रयोगो विद्यते । यथा[१२]-

"तीर्थे नार्यः पौस्यानि तस्थुः" इति ।

अपि च[१३]- "तीर्थे नाच्छा तातृषाण मोको" इति ।

पुनश्च[१४]- "करन्न इन्द्रः सुतीर्थाभयं च" इति ।

---

११. विष्णुधर्मसूत्रम् २/१६-१७ ।
१२. ऋग्वेदः १/१६९/६
१३. ऋग्वेदः १/१७३/११
१४. ऋग्वेदः ४/२९/३

तीर्थस्यास्य प्रयोगः यथा मार्गार्थे विद्यते तथैव नद्याः बालुमय प्रान्तार्थे अपि विद्यते । यथा[१५]-

"सुतीर्थमर्वतो यथानु नो नेषया सुगम" ।

तथा च[१६]- "अरित्रं वां दिवस्पृथु तीर्थे सिन्धूनां रथः" ।

तथैव तीर्थशब्दस्य अर्थः पुण्यस्थानार्थे प्रयोगोऽपि विद्यते । यथा[१७]-"तीर्थे न दस्ममुप यन्यूमाः" । एवमेव तस्मिन्नेव ऋग्वेदे निरुक्तानुसारं- "सुवास्त्वा अधि तुगवानि" इत्यस्य व्याख्या प्रसङ्गे भगवता यास्केन प्रतिपादितं यत् सुवास्तु एका नदी तथा तुग्वनस्थ अर्थः तीर्थार्थे यथा पवित्रमथवा स्थानार्थे प्रयोगो विद्यते । [१८]तैत्तिरीयसंहितायामपि आगच्छति यत् यजमानः तीर्थे स्नायात् । [१९]वाजसनेयसंहितायाम् आगच्छति यत् भगवान् रुद्रस्तीर्थेषु विचरणं कृतवान् । [२०]शांखायानब्राह्मणे आगच्छति यत् समुद्रः सर्वान् समाहितं करोति । अतः स तीर्थो भवति । तत्रैव [२१]शांखायनब्राह्मणे आगच्छति

---

१५. ऋग्वेदः ८/४७/११
१६. ऋग्वेदः १/४६/८
१७. ऋग्वेदः १०/३१/३
१८. तैत्तिरीयसंहिता ६/१/१/१२
१९. तैत्तिरीयसंहिता ४/५/११/१२
२०. वाजसनेयिसंहिता १६/१६
२१. सुमद्रो वा एष सर्वदरो यदहोरात्रे तस्य हैते अगाधे तीर्थे यत्सन्धये तद्यथा अगाधाभ्यां तीर्थाभ्यां समुद्रमनीयात्तादृक् तत् ।
-शाङ्खायनब्राह्मणे २/९
अप्सु स्नाति साक्षादेव दीक्षातपसी अवरुन्धे तीर्थे स्नाति ॥
-तैत्तिरीयसंहितायां ६/१/१/२
तथा च जैमीनी पूर्वमीमांसायां- ३/४/१४/१६

यत् यज्ञस्थानं प्रति गमनागमननिमित्तं यः मार्गो भवति सोऽपि तीर्थपदवाच्यो भवति ।

[२२]पार्थिवस्य मनुष्यस्य यथा बहुविधेषु अङ्गेषु नाभेरूर्ध्वाङ्गानि मेध्यानि तेषु च मध्येषु दक्षिणाङ्गानि मेध्यतमानि भवन्ति तथैव पृथिव्याः कानिचित् स्थानानि पवित्राणि स्वीक्रियन्ते तच्च पवित्रस्थानं तीर्थस्थानमिति निश्चप्रचं वक्तुं शक्यते । एतच्च तीर्थस्थानं त्रिभिः कारणैः पवित्रता स्वीक्रियते यथा तस्य स्थानस्य काचित् प्राकृतिकी विशेषता, अथवा जलमयप्रदेशस्य अनिर्वचनीयरमणीयता अथवा प्राचीनकाले कस्यचन महात्मनः ऋषेः निवासकारणात् स्नानतपादि-कारणाद्वा स्थानस्य माहात्म्यं प्राधान्यं पावित्र्यं च स्वीक्रियते । अतः तीर्थस्य अयं तावत् अर्थः तत्स्थानं जलमयं स्थलं वा भवतु स्वकीयस्य विलक्षणस्वरूपकारणात् पुण्यार्जनाय भावनां जनयति । यस्य स्थानस्य माहात्म्यं प्राचीनैः मुनिऋषिभिः तीर्थादिसंज्ञा प्रदत्ता ।

स्कन्दपुराणानुसारं प्राचीनकाले सत्पुरुषाः मुनयः पुण्यार्जनार्थं यत्र निवसन्तिस्म तदेव स्थानं तीर्थपदवाच्यं भवति । धार्मिक-पुरुषाणामेव सङ्गतिलाभस्तु पुण्यप्रदो जायते । उच्यते स्कन्दपुराणे[२३]-

---

२२. यथा शरीरस्यादेशाः केचिन्मेध्यतमाः स्मृताः ।
तथा पृथिव्या उद्देशाः केचित्पुण्यतमाः स्मृताः ॥
प्रभावादद्भुताद् भूमेः सलिलस्य च तेजसा ।
परिग्रहान्मुनीनाञ्च तीर्थानां पुण्यता स्मृता ॥
-पद्मपुराणे उत्तरखण्डे २३७/२५,२७
तथैव स्कन्दपुराणे काशीखण्डे ६/४३-४४, नारदीयपुराणे २/६२/४६-४७, तीर्थप्रकाशे पृ-१०, महाभारतस्यानुशासनपर्वणि १०८/१६-१८ च ।

२३. स्कन्दपुराणे १/२/१३/१०

मुख्या पुरुषमात्रा हि तीर्थयात्रानुषङ्गतः ।
सद्भिः समाश्रितो भूप भूमिभागस्तथोच्यते ॥

ऋग्वेदे जलस्य तथा च नदीनां स्तुतिप्रसङ्गे तीर्थस्य तज्जलस्य च माहात्म्यं समागच्छति । उदाहरणं यथा-

ता आपो [२४]देवीरिहमामवन्तु अर्थात् देवीजलमस्माकं रक्षां करोतु। जलस्यापि प्रसस्तिगानं प्राप्यते यथा इदं [२५]जलं पवित्रं करोति। [२६]देवतापरकं स्तुतिगानं जलनिमित्तमपि तत्रैव प्राप्यते । यदेव जलं [२७]मानवशरीरं पुनाति । जलेन मानवकृतानां पापानां पूर्वसंचितानां दोषाणामपनोदनं भवतीति वेदः वदति । [२८]तैत्तिरीयसंहितायां प्रतिपादितं विद्यते यत् सर्वेऽपि देवाः जले विराजन्ते । [२९]अथर्ववेदेऽपि जलमेव सर्वान् पवित्रं करोतीति तथा च सर्वेषां सुखानां निदानभूतं भवतीति उल्लेखो वर्त्तते । [३०]ऋग्वेदे प्रायशो विंशति नदीनामावाहनं दरीदृश्यते । पुनश्च [३१]ऋग्वेदे यथा इन्द्रः सर्वेषां देवानां पालको भवति तथैव सर्वेषां मनुष्याणां नद्यः एव पालनकर्त्र्यः भवन्ति । तत्र नदीनां चर्चाप्रसङ्गे सरस्वती-सरजू-सिन्धुनदीनां देवीरूपेण मातारूपेण च

---

२४. ऋग्वेदः ७/४९
२५. ऋग्वेदः ७/४९
२६. ऋग्वेदः ७/४९, १०/९, १०/३० च ।
२७. इदमापः प्रवहत यत् किञ्चित् दुरितं मयि ।
यद्वाह मभिदुद्रोह यद्वा शेष उतानृतम् ॥ ऋग्वेदः १०/९/८
२८. 'आपो वै सर्वा देवताः ।' -तैत्तिरीयसंहिता २/६/८/३
२९. हिरण्यवर्णाः सूचय पावका यासु जातः सविता यास्वग्निः ।
या अग्नि गर्भं दधिरे सुवर्णास्ता न आपः शं स्योना भवन्तु ॥
अथर्ववेदे १/३३/१
३०. ऋग्वेदे ५/५३/९, १०/६४/९, १०/७५/५-६ च ।
३१. ऋग्वेदे १०/१०४/८

वर्णना विद्यते[३२] । ऋग्वेदे सरस्वत्याः नद्याः वर्णनाप्रसङ्गादस्माभिः अवकलयितुं शक्यते यत् ऋग्वेदकाले इयं सरस्वती नदी विशाल जलपूर्णा यमुना सुताद्रिनद्योः मध्यभागे प्रवाहिता आसीत् यस्याः सरस्वत्याः प्रशंसा देवीरूपेण पावयित्री रूपेण प्रसिद्धाः। ब्राह्मणग्रन्थानां काले अस्याः नद्याः अन्तर्हिता जाता । वाजसनेयी-संहितायां वर्णितं विद्यते सरस्वती सर्वाभिः पञ्चशाखानदीभिः सम्मिश्रिता भवति । प्राचीनकाले त्रयः यागाः अभवन् मित्रवरुणयोः इन्द्रमित्रयोश्च सम्मानार्थम् अर्जमा निमित्तं च यत्र सरस्वती नदी विलुप्ता सञ्जाता तत्रैव दक्षिणे तटे एतेषां त्रयाणां यज्ञानां [३३]दीक्षाकर्मसम्पादनं भवति स्म । तत्र ताण्ड्यब्राह्मणे प्रतिपादितं विद्यते यद् विनशनप्लक्ष-प्रस्रवणयोः या मध्यभूमिः तत्रैव सारस्वतसत्रकृते सर्वोत्कृष्टं स्थानं आसीदिति विचारः प्राप्यते । सरस्वतीदृशद्वत्योः सङ्गमस्थले पश्चिमप्रयागे 'अपांनयात्' इति इष्टि सम्पादनं अभवत् । यस्मिन् यागे हवनरूपेण चरुप्रदानम् अभूत् । अस्मिन् विषये ब्राह्मणग्रन्थेषु कात्यायनश्रौतसूत्रे आश्वलायनश्रौतसूत्रे विस्तृतं विवेचनं विद्यते ।

---

३२. ऋग्वेदे १/३२/१४, १०/६४/८ च ।

३३. सरस्वत्या विनाशने दीक्षन्ते । ..... दृषद्वत्या अप्ययेऽपीनप्त्रीयं चरुं निरूप्याथतियन्ति । चतुश्चत्वारिंशदाश्वीनानि सरस्वत्या विनशनात् प्लक्षः प्रास्रवणस्तावदितः स्वर्गो लोकः सरस्वतीसंमितेनाध्वना स्वर्गलोकं यान्ति । .....यदा प्लक्षं प्रास्रवणमागच्छन्त्यथोत्थानम्.....कारपचवं प्रति यमुनामवध-भृथमभ्यवयन्ति ।

-ताण्ड्यब्राह्मणे, २५/१०/१, १५/१६/२६/२१

मनुनापि प्रतिपादितम्-

सरस्वतीदृषद्वत्योर्देवनद्योर्यदन्तरम् ।
तं वेदनिर्मितं देशं ब्रह्मवर्त्तं प्रचक्षते ॥ म.स्मृ.२/१७

[३४]देवलेन बहुनि स्थानानि सारस्वततीर्थानि इति प्रतिपादितानि । [३५]ऋग्वेदे प्रतिपादितं विद्यते यत् पर्वतानां नदीनां च सङ्गमस्थानानि पवित्रस्थानानि भवन्ति । प्राचीनकाले जनानां विश्वासः आसीद् यत् पर्वतेषु देवानां निवासो भवति इति । ऋग्वेदे पर्वत इन्द्रस्य संयुक्तदेवता इति प्रतिपादितं विद्यते यतो हि [३६]ऋग्वेदे प्रतिपादितं विद्यते हे इन्द्र तथा हे पर्वत युद्धे शत्रून् जहीति । अथर्ववेदेऽपि पापिनां विनाशाय हिमालयस्य स्तवनं दृश्यते। [३७]हिरण्यकेशी गृह्यसूत्रे गौतमधर्मसूत्रे बौधायनधर्मसूत्रे वसिष्ठधर्मसूत्रे च प्रतिपादितमस्ति यत् एतादृशं स्थानं नदी-पर्वत-सङ्गम-देवतास्थानं च पवित्रं पापनाशकं च भवति । अस्मिन् स्थाने देवनिवासः ऋषिनिवासः [३८]गोनिवासश्च भवति। वायुपुराणे तथा कूर्मपुराणे प्रतिपादितं विद्यते यत् समग्रः हिमालयः पुण्यमयः [३९]सर्वाऽपि गङ्गा पुण्यमयी । अपि च समुद्रे पतिताः

---

३४. प्लक्षप्रस्रवणं वृद्धकन्याकं सारस्वतमादित्यतीर्थं कौवेरं वैजयन्तीं पृथुदकं नैमिषं विनशनं वंशोद्भेदं प्रभासमिति सारस्वतानि ।
-तीर्थकल्पतरु, पृ-२५०

३५. 'अपह्वरो गिरीणां सङ्गथे च नदीनाम् । धिया विप्रो अजायत ॥
-ऋग्वेदे, ८/६/२८

३६. ऋग्वेदे १/१२२/३

३७. हिरण्यकेशिगृह्यसूत्रम्- १/३/११/५

३८. 'सर्वे शिलोच्चयाः सर्वाः स्रवन्त्यः पुण्या ह्रदास्तीर्थान्यृषिनिवासा गोष्ठपरिस्कन्दा इति देशाः ।'
-गौ.ध.सू.११/१४, व.ध.सू.२२/१२, बौ.ध.सू. ३/१०/१२

३९. सर्वे पुण्यं हिमवतो पुण्या च सर्वतः ।
समुद्रगाः समुद्राश्च सर्वे पुण्याः समन्ततः ॥
-वायुपुराणे ७७/१/१७

सर्वत्र हिमवान् पुण्यो गङ्गासमन्ततः ।

सर्वा अपि नद्यः पवित्राः भवन्ति । यतः [४०]समुद्रः पुण्यतमो भवति । [४१]पद्मपुराणे प्रतिपादितं विद्यते यत् नदी ग्रामे अरण्ये यत्र वा प्रवाहिता

नद्यः समुद्रगाः पुण्याः समुद्रश्च विशेषतः ॥

-कूर्मपुराणे २/३७/४९-५०

राजा समस्ततीर्थानां सागरः सरितां पतिः ।

-नारदीयपुराणे ५८/११

४०. सर्वे प्रस्रवणाः पुण्याः सर्वे पुण्याः शिलोच्चयाः ।
नद्यः पुण्याः सदा सर्वा जाह्नवी तु विशेषतः ॥
सर्वाः समुद्रगाः पुण्याः सर्वे पुण्याः नगोत्तमाः ।
सर्वमायतनं पुण्यं सर्वे पुण्या वनाश्रमाः ॥

-तीर्थकल्पतरु, पृ-२५०

४१. पद्मपुराणे-
महेन्द्रो मलयः सह्यः शुक्तिमानृक्षपर्वतः ।
विन्ध्यश्च पारिजातश्च सप्तात्र कूलपर्वताः ॥
तथैव विष्णुधर्मोत्तरे (३/१७४)-
हिमवान् हेमकूटश्च निषधो नील एव च ।
श्वेतश्च शृङ्गवान् मेरुः माल्ववान् गन्धमार्दनः ॥
नवैतान् शैलनृपतीन् नवम्यां पूजयेत् नरः ॥
वायुपुराणे (४५/१०८)-
तास्तु नद्यः सरस्वत्यः सर्वाः गङ्गाः समुद्रगाः ।
विश्वस्य मातरः सर्वा जगत् पापहराः स्मृताः ॥
तीर्थकल्पतरुः (पृ-२४२)-
कार्त्तिके ग्रहणं श्रेष्ठं गङ्गायमुनसङ्गमे ।
मार्गे तु ग्रहणं पुण्यं देविकायां महामुने ॥
पौषे तु नर्मदा पुण्या माघे सन्निहिता शुभा ।
फाल्गुने नर्मदा ख्याता पैत्रे पुण्या सरस्वती ॥
वैशाखे तु महापुण्या चन्द्रभागा सरिद्वरा ।

भवतु यदि वा कूलवर्त्तिनः तीर्थस्थानस्य न किमपि नाम विद्यते तर्हि तस्य स्थानस्य नाम विष्णुतीर्थं वक्तव्यं भवति । कविताकामिनीविलासेन महाकविकालिदासेन[४२] स्वकुमारसम्भवमहाकाव्यस्य प्रथमश्लोके ग्रन्थस्य निर्विघ्नपरिसमाप्तिकामनया वस्तुनिर्देशात्मकं मङ्गलाचरणं विधाय हिमालयं सर्वासां देवतानामात्मा इति प्रतिपाद्य स्तवनं कृतम्।

ऋग्वेदे सुविस्तृतमरण्यं देवतारूपेण सम्बोधितं विद्यते । वामनपुराणेऽपि सप्तसंख्यकानि वनानि पुण्यप्रदानि तथा च पापहारकाणि भवन्ति । तानि यथा- काम्यकवनं, अदितिवनं, व्यासवनं, फलकीवनं, सूर्यवनं, मधुवनं, पुण्यशीतवनं च । वामनपुराणानुसारं (३४/३/५) एवं प्रतिपादितं विद्यते यत्-

शृणु सप्तवनानीह कुरुक्षेत्रस्य मध्यतः ।
येषां नामानि पुण्यानि सर्वपापहराणि च ॥ इति ।

प्राचीनासु स्मृतिषु यथा मनुयाज्ञवल्क्यादिषु तीर्थानां विषये तथा महत्त्वपूर्णं प्रतिपादनं न विद्यते स्मृतिग्रन्थेषु तीर्थानां विचारोऽपि तथा परिदृष्टो न भवति । कदाचित् परोक्षरूपेण यथा सरस्वतीप्रति-

---

ज्येष्ठे तु कौशिकी पुण्या आषाढे तापिका नदी ॥
श्रावणे सिन्धुनामा च भाद्रमासे च गण्डकी ।
आश्विने सरयुश्चैव भूयः पुण्या तु नर्मदा ॥
गोदावरी महापुण्या चन्द्रे राहुसमन्विते ॥

विष्णुधर्मसूत्रे (पृ-८५)-

एवमादिष्वथान्येषु तीर्थेषु सरिद्वरासु सर्वेष्वपि स्वभावेषु पुलिनेषु प्रस्रवणेषु पर्वतेषु निकुञ्जेषु वनेषु उपवनेषु गोमयालिप्तेषु मनोज्ञेषु इति ।

४२. कुमारसम्भवमहाकाव्यम् (१/१)-

अस्त्युत्तरस्यां दिशि देवतात्मा हिमालयो नाम नगाधिराजः ।
पूर्वापरौ तोयनिधिवगाह्य स्थितः पृथिव्यामिवमानदण्डः ॥

कूलगमनादिविषये उपदेशः प्राप्यते न तु साक्षाद्रूपेण स्मृतिषु विचारः समागच्छति । परन्तु धर्मशास्त्रस्य श्रेणीभूतेषु सूत्रग्रन्थेषु निबन्धग्रन्थेषु च अस्मिन् तीर्थप्रसङ्गे यथा विचारः समागच्छति ततोऽधिकः विचारस्तु पुराणग्रन्थेषु महाभारते च तीर्थस्य महिमागानं दरीदृश्यते । यज्ञादपि अधिकं पुण्यं तीर्थगमने तीर्थदर्शने च भवतीति पुराणानां मतम् । महाभारतस्य [४३]वनपर्वणि पञ्चमहायज्ञानामन्तर्गतेन देवयज्ञेन तीर्थयात्रायाः तूलना विद्यते । यज्ञेन स्वर्गादिफलं मिलत्येव यतो हि मीमांसा निर्दिशति 'अग्निहोत्रं जुहुयात् स्वर्गकामः' । यज्ञे तु पात्राणां यन्त्राणामनेकद्रव्याणां पुरोहितानां पत्न्याः अपि आवश्यकता विद्यते। परन्तु यदि कश्चित् निर्धनः विधूरः असहायः स्वर्गादिकामी भवति तर्हि सः यज्ञकर्त्तुं असमर्थः भवति । किन्तु तीर्थयात्रायां एतादृशः प्रतिबन्धो न विद्यते अपि च अग्निष्टोमादिद्वारा यत् पुण्यं भवति तदेव पुण्यं तीर्थयात्रायां भवत्येव । किन्तु तीर्थयात्रानिमित्तं केचन गुणाः प्रयोजनभूताः नितरां विद्यन्ते । एतेषु गुणेषु नैतिकता आध्यात्मिकता च गुणद्वयं सर्वोत्कृष्टं विद्यते । यस्य हस्त-पाद-मनः-विद्या-तपः-कीर्त्तिप्रभृतयः विद्यन्ते स एव जनः तीर्थयात्रायाः पूर्णं फलं प्राप्नोति।

तीर्थयात्रार्थं कस्तावत् अधिकारी अस्मिन् प्रसङ्गे शास्त्रकाराणां मतानि शास्त्रेषूपलब्धानि ।

---

४३. ऋषिभिः क्रतवः प्रोक्ता देवेष्विव यथाक्रमम् ।
फलं चैव यथातथ्यं प्रेत्य चेह च सर्वसः ॥
न ते शक्या दरिद्रेण यज्ञाः प्राप्तुं महीपते ।
बहूपकरणा यज्ञा नानासम्भारविस्तराः ॥
प्राप्यन्ते पार्थिवैरेतैः समृद्धैर्वा नरैः क्वचित् ।
नार्थान्युनैर्नावगणैरेकात्मभिरसाधनैः ॥

-वनपर्व ८२/१३-१७

यस्य हस्तौ च पादौ च मनश्चैव सुसंयतम् ।
विद्या तपश्च कीर्त्तिश्च स तीर्थफलमश्नुते ॥
परिग्रहादुपावृत्तः सन्तुष्टो येन केनचित् ।
अहंकारनिवृत्तश्च स तीर्थफलमश्नुते ॥
अक्रोधनश्च राजेन्द्रसत्यशीलो दृढव्रतः ।
आत्मोपमश्च भूतेषु स तीर्थफलमश्नुते ॥

वनपर्व ८२/९/१२, तीर्थकल्पतरु पृ-४,५ । तीर्थप्रकाशः पृ-१३। हस्तयोः संयम परपीडा चौर्यादिनिवृत्त्या, पादयोः संयमः, अन्यदेशगमनताडनादिनिवृत्त्या, मनसः संयमः, कुत्सितसंकल्पादि-निवृत्त्या। विद्या अत्र तत्तत् तीर्थगुणज्ञानम्, तपः तीर्थोपवासादिकीर्त्तिः सच्चरितत्वेन प्रसिद्धिः । (तीर्थप्रकाशः पृ-१३) । अकल्ककः दम्भरहितः निरारम्भोऽत्रार्थार्जनादिव्यापाररहितः। (तीर्थकल्पतरु पृ-५) । 'यस्य हस्तौ च' नामक श्लोके शङ्खस्मृतिः ८/१५, ब्रह्म.२५/२, अग्नि १०९/१/२, स्कन्द १/२/५-६ यस्य संयतम्। निर्विकाराः क्रियाः सर्वा स तीर्थफलमश्नुते।

नोदकक्लिन्नगात्रस्तु स्नात इत्यभिधीयते ।
स स्नातो यो दमस्नातः स बाह्याभ्यन्तरः शुचिः ॥
(अनुशासन. १०८-९)

तीर्थान्यनुसरन् धीरः श्रदधानो जितेन्द्रियः ।
कृतपापो विशुध्येत किं पुनः शुभकर्मकृत् ॥
अभ्युद्धानाः पाप्मानो नास्तिकाः स्थितसंशयाः ।
हेतुद्रष्टा च पञ्चैते न तीर्थफलभागिनः ॥

वायुः ७७/१२५,१२७, तीर्थकल्पतरु पृ-५-६, वाचस्पतिकृततीर्थचिन्तामणिः पृ-४ ।

पापात्मा बहुपापग्रस्तस्तस्य पापशमनं तीर्थे भवति न तु

यथोक्तफलम् । तीर्थस्नानेषु निवासोऽपि महापुण्यं भवति। यथा कुरुक्षेत्रे निवासं कृत्वा तत्रैव यदि मरणं प्राप्नोति तर्हि स जनः न पुनः पृथिवीं प्रति आयाति यथा उच्यते । वामनपुराणे (३३/८)-

कुरुक्षेत्रे मृतानां च पतनं नैव विद्यते ।
वासः पुंसां कुरुक्षेत्रे मुक्तिह्युक्ता चतुर्विधा ॥

मत्स्यादिपुराणेषु काश्यां निवासः अतीव पुण्यप्रद इति प्रतिपादितं विद्यते । यथा-

अश्मना चरणौ हत्वा काशीं सेवेत न त्यजेत् ।
अविमुक्तं यदा गच्छेत् कदाचित् कालपर्ययात् ॥
अश्मना चरणौ भित्वा तत्रैव निधनं व्रजेत् ।
अश्मना चरणौ भूत्वा वाराणास्यां वसेन्नरः ॥

एवंविधानि कूर्म-मत्स्य-अग्निपुराणवचनानि प्राप्यन्ते । [४४]ब्रह्मपुराणे तीर्थस्य चत्वारः भेदाः प्राप्यन्ते यथा- देवतीर्थं देवतादिभिः उत्पन्नम्, आसुरः गयबलीप्रभृतिभिः सम्बन्धितं तीर्थम्, तृतीयं भवति आर्षं प्रभासादिक्षेत्रम्, चतुर्थं मानुषं तीर्थं यथा- अम्बरीष-मनु-कुरुप्रभृतिभिः सृष्टम्। ब्रह्मपुराणे विभिन्नानां नदीनां तीर्थविशेषे मान्यता प्राप्यते ।

वनपर्वणि प्रतिपादितं विद्यते चतुर्षु वर्णेषु ब्रह्मणक्षत्रिय-वैश्यशूद्रेषु यः कोऽपि तीर्थं गत्वा स्नानं करोति तस्य पुनर्जन्म न भवति इति । कस्मिंश्चित् तीर्थे नद्यां पुष्करे वा पुरुषः स्त्री वा यदि

---

४४. चतुर्विधानि तीर्थानि स्वर्गे मर्त्ये रसातले ।
दैवानि मुनिशार्दूल आसुराप्यारुषाणि च ॥
मानुषाणि त्रिलोकेषु विख्यातानि सुरादिभिः ।
ब्रह्मविष्णुशिवैर्देवैर्निर्मितं दैवमुच्यते ॥

ब्रह्मपुराणे ७०/१६-१९

स्नायाति तर्हि तीर्थफलं प्राप्नोतीति महाभारतस्य [४५]वनपर्वणि विद्यते। एतस्मात् वाक्यात् स्पष्टं भवति यत् स्त्रीणां कृते तीर्थयात्रा विद्यते । अपि च तीर्थयात्रायां स्त्रियः अधिकारिण्यः भवन्ति। मत्स्यपुराणानुसारं दृश्यते सर्वेषां वर्णानां वर्णसंकराणां चाण्डालानां हीनवर्णानां तथा च पापग्रस्तानां पापरोगिणां तीर्थेषु स्नानाधिकारो विद्यते । तीर्थस्नानं तु एतेषां परमौषधं भवति । वामनपुराणे विद्यते यत् [४६]चतुराश्रमिणां जनानां तीर्थेषु स्नानाधिकारः विद्यते । एते जनाः तीर्थेषु स्नानं कृत्वा सप्तपुरुषान् उद्धारयन्ति । स्त्रियः अपि भक्तिपूर्वकं तीर्थसेवनं कृत्वा परमध्येयं प्राप्नुवन्ति । ब्रह्मचारी ब्रह्मचर्याश्रमे गुरोरनुमतिं गृहीत्वा तीर्थस्नानादिकं कर्त्तुं समर्थो भवति । गृहस्थः स्वां पतिव्रतां पत्नीं सहैव नीत्वा तीर्थगमनं कुर्यात् । यदि पत्नी मृतास्ति एकाकी व्रजेत्। अन्यथा न तीर्थफलं प्राप्नुयात्। यतो हि उच्यते-

"भार्यां विना हि यो धर्मः स एव विफलो भवेत् ।"

यद्यपि धर्मशास्त्रे स्त्रीशूद्राणां कृते धर्मकर्माणि निषिद्धानि सन्ति तथाऽपि अनुमतिं गृहीत्वा ताः कुर्युः । धर्मशास्त्रीयं वचनं यथा-

जपः तपः तीर्थयात्रा प्रव्रज्या मन्त्रसाधनम् ।
देवताराधनं चेति स्त्रीशूद्रपतनानि षट् ॥

---

४५. महा.भा. वनपर्व ८२/३०/३१

४६. ब्राह्मणाः क्षत्रियाः वैश्याः शूद्राः ये वर्णशङ्कराः ।
स्त्रियो म्लेच्छाश्च ये चान्ये सङ्कीर्णाः पापयोनयः ॥
कीटाः पिपीलिकाश्चैव ये चान्ये मृगपक्षिणः ।
कालेन निधनं प्राप्ता अविमुक्ते वरानने ॥
शिवे मम पुरे देवी जायन्ते तत्र मानवाः ।
नाविमुक्ते मृतः कश्चित् नरकं याति किल्विषी ॥
कूर्मपुराणे १/३२-३४

नारी खल्वननुज्ञाता पित्रा पत्या सुतेन वा ।
विफलं तद् भवेत् तस्याः यत्करोत्योर्द्धदेहिकम् ॥

इति कात्यायनेन प्रतिपादितम् । तस्मादनुमतिं गृहीत्वा शूद्रादयः कर्त्तुं समर्थाः भवन्ति इति निष्कर्षः ।

दायभागप्रसङ्गे अपि अपुत्रस्य स्वर्यातस्य यत्किमपि धनं भवतु तत्सर्वं विद्यमाना पत्नी या अव्यभिचारिणी भवति सा प्राप्नोति । सा च तद्धनम् गृहीत्वा पत्युः पिण्डदानं तीर्थश्राद्धं सर्वम् और्ध्वदेहिकं कर्म कुर्यात् । एतस्मात् दायभागप्रसङ्गात् पतिव्रतायाः स्त्रियाः विधवायाः तीर्थादिगमने धनव्यये च अधिकारो विद्यते इति तीर्थगमनाय इयमधिकारिणी भवति ।

केवलं तीर्थयात्रायां तीर्थस्नाने च न किमपि विशिष्टफलं भवति यदि तीर्थसेविनः हृदयस्य परिवर्त्तनं न भवति अथवा पापकर्मणः त्यागं न करोति अत एव पापकर्मणः त्याग एव परमावश्यको भवति । तीर्थाटनमकृत्वाऽपि यः स्वकीयं कर्म सम्पादयति स पुण्यं लभते यः जनः स्वकीयानि कर्माणि परित्यज्य तीर्थाटनं करोति स जनः न किमपि पुण्यं प्राप्नोति । सर्वेषां गृहस्थानां स्त्रीपुत्रादीनां कृते कर्त्तव्यं विद्यत एव । तदेव सम्पादनं पुण्यरूपेणाऽपि परिगणितं भवति । अन्यथा जनः पापी भवति । आश्रितानां परिरक्षणं सर्वादौ विधेयम् । एतान् परित्यज्य सर्वाणि कर्माणि पापाय भवन्ति । तीर्थयात्रानिमित्तं प्रस्थानाय कानिचित् कर्माणि विद्यन्ते । [४७]ब्रह्मपुराणानुसारं तीर्थयात्रार्थी

---

४७. यो यः कश्चित्तीर्थयात्रां तु गच्छत्सु संयतः स च पूर्वं गृहे स्वे ।
कृतोपवासः सुचिरप्रयत्नः सम्पूजयेद् भक्तिनम्रो गणेशम् ॥
देवान् पितॄन् ब्राह्मणांश्चैव साधून् धीमान् पितॄन् ब्राह्मणान् पूजयेच्च ।
प्रत्यागतश्चापि पुनस्तथैव देवान् पितॄन् ब्रह्मणान् पूजयेच्च ॥
ब्रह्मपुराणे, तीर्थकल्पतरु (पृ-१) ।

जनः पूर्वदिवसाद् ब्रह्मचर्यधारणपूर्वकं उपवासेन तिष्ठेत् । गमनकाले गणेशादीनां पूजनं पितृश्राद्धं ब्राह्मणभोजनं सामर्थ्यानुसारं कृत्वा तीर्थदागमनकालेऽपि तथाविधं कर्म कुर्यात् । वायुपुराणे अधिकं किञ्चित् प्रतिपादितं विद्यते तीर्थयात्रार्थी पूर्वोक्तं सर्वं कर्म कृत्वाऽपि ताम्र अङ्गुरीयकं कषायवसनं च धृत्वा तीर्थाय गच्छेत् । एतत्तु तीर्थगमनकाले धारणं कुर्यात् न तु सर्वदैव । भट्टोजीदीक्षितमतेन ताम्र अङ्गुरीयकादिकं परिधानं तु गयां प्रति गमनकाले ग्रहीतव्यं न तु सर्वत्र ।

यस्य हस्तौ च पादौ च मनश्चैव सुसंयतम् ।
विद्या तपश्च कीर्त्तिश्च स तीर्थफलमश्नुते ॥

हस्तसंयमः परस्वग्रहणनिवृत्तिः । पादसंयमः अगम्यदेशगमननिवृत्त्या मनः संयमः कुत्सितेच्छानिवृत्त्या विद्या तीर्थगुणादिज्ञानम् । तपस्तीर्थनिवासोपवासादिलक्षणम् । कीर्त्तिः सच्चरितत्वेन प्रसिद्धिः तथा च-

प्रतिग्रहादपावृत्तः सन्तुष्टो येन केनचित् ।
अहंकार विमुक्तश्च स तीर्थफलमश्नुते ॥
अकल्कको निरारम्भो लघ्वाहारो जितेन्द्रियः ।
विमुक्तः सर्वसङ्गैस्तु स तीर्थफलमश्नुते ॥

प्रतिग्रहादपावृत्तस्तु यात्रानन्तरमेव यात्रामुपक्रम्यैवाभिधानात् अकल्कको दम्भरहितः । निरारम्भः अर्थार्ज्जनादिव्यापाररहितः । सर्वसङ्गैरिति सङ्गोऽत्र अविहितासक्तिः ।

'सुसंयुत इति पूर्वदिने कृतैकभक्तादिनियमः' ।
-तीर्थचिन्तामणि (पृ-६) ।

'सुसंयतः पूर्वदिने कृतैकभक्तादिनियम इति केचित् ब्रह्मचर्यादि-युक्त इति तु युक्तम् ।'
-तीर्थप्र. (पृ-२३) ।

तथा च-

अकोपनश्च राजेन्द्र सत्यवादी दृढव्रतः ।
आत्मोपमश्च भूतेषु स तीर्थफलमश्नुते ॥

आत्मोपम इति सर्वभूतहिते रत इत्यर्थः । शङ्खः-

यस्य हस्तौ च पादौ च मनश्चैव सुसंयुतम् ।
विद्यातपश्च कीर्त्तिश्च स तीर्थफलमश्नुते ॥

इदन्तु हस्तसंयमनादिकं तीर्थस्नानात्पूर्वं यात्रामुपक्रम्यैवाभिधानात् । वायुपुराणे-

तीर्थान्यनुसरन् धीरः श्रद्दधानः समाहितः ।
कृतपापो विशुद्ध्येत किं पुनः शुद्धिकर्मकृत् ॥
तीर्यग्योनिं न गच्छेच्च कुदेशे नैव जायते ।
स्वर्गे भवति वै विप्रो मोक्षोपायश्च विन्दति ॥
अश्रद्दधानः पापात्मा नास्तिकोऽच्छिन्नसंशयः ।
हेतुनिष्ठश्च पञ्चैते न तीर्थफलभागिनः ॥

पापात्मा बहुपापग्रस्तस्य पापशमनं तीर्थे भवति न तु यथोक्तफलम् । तदुक्तं-

नृणां पापवतां तीर्थे पापस्य शमनं भवेत् ।
यथोक्त फलदं तीर्थं भवेच्छ्रद्धात्मनां नृणाम् ॥

अच्छिन्नसंशयः फलोपायेतिकर्त्तव्यतार्थनिश्चयशून्यः हेतुनिष्ठः कुतर्केण शास्त्रोपप्लावकः । भारते-

कामक्रोधश्च लोभश्च यो जित्वा तीर्थमाविशेत् ।
न तेन किञ्चिदप्राप्तं तीर्थाभिगमनाद्भवेत् ॥
तीर्थानि च यथोक्तेन विधिना सञ्चरन्ति ये ।
सर्वद्वन्द्वसहा धीरास्ते नराः स्वर्गगामिनः ॥

सर्वद्वन्द्वसहाः शीतातपादिक्लेशसहिष्णवः ।

ब्रह्मपुराणे-

गङ्गादितीर्थेषु वसन्ति मत्स्या देवालये पक्षिगणश्च सन्ति ।
भावोज्झितास्ते न फलं लभन्ते तीर्थाच्च देवायतनाच्च तात ॥
भावं ततो हृत्कमले निधाय तीर्थानि सेवेत समाहितात्मा ।
या तीर्थयात्रा कथिता मुनिन्द्रैः कृता प्रयुक्ताप्यनुमोदिता च ।
तान् ब्रह्मचारी विधिवत् करोति सुसंयतो सद्गुरुणा नियुक्तः ॥
सर्वस्वनाशेऽप्यथवात्मपक्षे सब्राह्मणान्नग्रत एव कृत्वा ।
यज्ञाधिकारेऽप्यथवा निवृत्ते विप्रस्तु तीर्थानि परिभ्रमेत्तु ॥
तीर्थफलं यज्ञफलं हि यस्मात् प्रोक्तं मुनीन्द्रैरमलस्वभावैः ।
यस्येष्टियज्ञेष्वधिकारिताऽस्ति वरं गृहं गृहधर्माश्च सर्वे ॥
एवं गृहस्थाश्रमसंस्थितस्य तीर्थे गतिः पूर्वतरैर्निषिद्धा ।
सर्वाणि तीर्थान्यथवाग्निहोत्रतुल्यानि नैवेति वयं ददामः ॥

ब्रह्मचारीत्यादि ब्रह्मचारिणो गृहस्थस्य च तीर्थगमनेऽधिकारः साग्नेस्त्वनधिकार इति । तथा ब्रह्मपुराणम्-

देवान् पितॄन् ब्राह्मणांश्चैव साधून्
धीमान् प्रीण्यन् वित्तशक्त्या प्रयत्नात् ।
प्रत्यागतश्चापि पुनस्तथैव देवान् पितॄन् ब्राह्मणान् पूजयेच्च ॥

एवं कुर्वतस्तस्य तीर्थाद्युक्तफलं तत् स्यान्न वा सन्देह एव । सुसंयत इति पूर्वदिने कृतैकभक्तादिनियमः । तदुत्तरदिने कृतोपवासस्तदुत्तरदिने गणेशं ग्रहानिष्ठदेवताश्च सम्पूज्य पार्वणश्च कृत्वा ब्राह्मणान् भोजयेत्। इदं च पार्वणं घृतमुखद्रव्यकम् ।

गच्छन् देशान्तरं यस्तु श्राद्धं कुर्याच्च सर्पिषा ।
यात्रार्थमिति तत् प्रोक्तं प्रवेशे च न संशयः ॥

इति भविष्यपुराणोक्तवचनात् । इदानीम् आभ्युदयिकमिति तु केचित् तन्न प्रकृतित्वेन उपस्थितिलाघवात् प्राप्ते पार्वणे विशेषानभिधानात्।

गणेश्वरमिश्रादयोऽप्येवम् उपवासदिने मुण्डनमपि-

प्रयागे तीर्थयात्रायां पितृमातृवियोगतः ।
केशानां वपनं कुर्यात् वृथा न मुण्डितो भवेत् ॥

इति स्मृतिसमुच्चयधृतविष्णुलिखितवचनात् । कर्पटीवेशेन तीर्थगमने चिकीर्षिते आदौ वपनमित्यर्थः श्राद्धानन्तरञ्च गमनं संगच्छते । ततो वेशधारणम् । तदुक्तं वायुपुराणे-

उद्यतश्चेद् गयां गन्तुं श्राद्धं कृत्वा विधानतः ।
विधाय कार्पटीवेशं कृत्वा ग्रामं प्रदक्षिणम् ॥
ततो ग्रामान्तरं गत्वा श्राद्धशेषस्य भोजनम् ।
ततः प्रतिदिनं गच्छेत् प्रतिग्रहविवर्जितः ॥
पदे पदेऽश्वमेधस्य स्यात् फलं गच्छतो गयाम् ॥

इदञ्च कर्पटीवेशधारणं गणेशं ग्रहानिष्टदेवताञ्च सम्पूज्य गमनफलञ्च यद्यपि गयायामेव श्रूयते तथापि तीर्थान्तरयात्रायामपि द्रष्टव्यम् ।

"एकत्र निर्णीत इति न्यायात् । फलाकांक्षायाञ्च गमनफलत्वेन एतस्यैवान्यच्चापि गमनफलत्वमुचितमन्तरङ्गत्वात् ।"

न तु विश्वजिन्न्यायादन्यच्च फलकल्पनं तस्य बहिरङ्गत्वेनोपस्थितिगौरवात् । ग्रामान्तरं क्रोशाभ्यान्तरमेवमध्वनि च क्रोशपूरणे इत्यादिना श्राद्धोत्तरं क्रोशगमनं निषेधात् ।

मत्स्यपुराणे मार्कण्डेयवाक्यम्-

कथयिष्यामि ते वत्स तीर्थयात्राविधिक्रमम् ।
आर्षेणैव विधानेन यथादृष्टं यथाश्रुतम् ॥
बलीवर्दसमारूढः शृणु तस्यापि यत् फलम् ।
नरके वसते घोरे गवां क्रोधो हि दारुणः ॥
एश्वर्यलाभमाहात्म्याद्गच्छेद्यानेन यो नरः ।
निष्फलं तस्य तत्तीर्थं तस्माद्यानं विवर्जयेत् ॥

अयञ्च याननिषेधः प्रयागमात्रपरः तत्प्रकरणे एव मत्स्यपुराणस्य श्रुतत्वादिति कल्पतरुः । पठन्ति च-

गोयाने गोवधः प्रोक्तो हययाने तु निष्फलम् ।
नरयाने तदर्द्धं स्यात् पद्भ्यां स्यात्तु चतुर्गुणम् ॥

पद्भ्यामिति उपानतत्वादिव्यतिरेकेण सातिशयं तीर्थफलं भवति। न तु तत्परिधाने दोषो निषेधाश्रवणात् मिताक्षरायामङ्गिरसोऽप्येवम् । यत्- ऊर्ध्वं हरति पादुकेति पठन्ति तत्सर्वैरेव निबन्धकारैरनादरणादनाकरमिति निर्णीयते। एवञ्च उपानन्निषेधे बाधिते-

वर्षातपादिके छत्री दण्डी रात्र्यटवीषु च ।
शरीरत्राणकामो वै सोपानत्कः सदा व्रजेत् ॥

इति विष्णुपुराणीयवचनेन निष्प्रतिपक्षसदाशब्दस्तु सकामतीर्थयात्रायामप्युपानत्परिधानं आवश्यकं इति । एवं वर्षास्वपि आवश्यकमिति । एवं वर्षास्वपि यस्तु वर्षासु तन्निषेधः स तदा खट्वादिनिषेधवत् काम्य इति । तदर्थं यात्रानुष्ठानक्रमः-

कस्मिंश्चिद्दिने एकभक्तादिकं कृत्वा तदुत्तरदिनेऽधिकारिविशेषणत्वेन प्राप्तं मुण्डनमुपवासञ्च विधाय तदुत्तरदिने कृतनित्यक्रियो गणेशं ग्रहानिष्ट-देवताश्च सम्पूज्य- 'ॐ अद्य प्रतिपदमश्वमेधयज्ञजन्यफलसमफलप्राप्तिकामोऽमुकतीर्थयात्रामहं करिष्ये' इति संकल्प्य तत्रैव मुद्राकङ्कणकषायपरिधानरूपं छत्रोपानद्दण्डधारणरूपञ्च कार्पटीवेशं कृत्वा ग्रामं वासावच्छिन्नं प्रदक्षिणं परिवृत्य क्रोशाभ्यन्तरस्थं ग्रामान्तरं गत्वा श्राद्धशेषं घृतेन पारणं कुर्यात् ।

दिनान्तरे प्रातः शुचिवस्त्रयुगधृत्वा कृतस्नानाचमनो गृहीतकार्पटीवेशः पूर्वाह्णे तीर्थाभिमुखं गच्छेत् । वेशधारणञ्च यात्राङ्गत्वात् गमनकाल एव न त्वाङ्गिकभोजनादिकालेऽपि मानाभावात् । एवमेव यावत्तीर्थप्राप्तिः प्रत्यहं गच्छेत् । तीर्थेऽपि तद्वत् क्षेत्रादिकमनुसरन्

कार्पटीवेशं विभृयात् ।

न तु तत् स्नानश्राद्धादिकालेऽपि प्रमाणाभावात् । एवं तीर्थात् तथैव प्रत्यावृत्तः स्वग्रामसमीपे ग्रामान्तरे तत्पूर्वप्राप्तिदिने कृतोपवास-स्तदुत्तरदिने ग्रहानिष्टदेवताश्च सम्पूज्य 'अथ तीर्थयात्रायां पार्वणश्राद्धं करिष्ये' इति संकल्प्य तत्रैव घृतेन पार्वणं विधाय ग्रामदेवान् पूर्ववत् सम्पूज्य स्वग्रामं प्राप्य पूर्ववत् प्रदक्षिणं कृत्वा स्वगृहं प्रविश्य वेशधारणस्थाने वेशमुज्झित्वा श्राद्धशेषं घृतेन पारणं कुर्यादिति ।

शङ्खः-

तीर्थं प्राप्यानुसङ्गेन स्नानं तीर्थे समाचरेत् ।
स्नानजं फलमाप्नोति तीर्थयात्राफलं न तु ॥

अनुषङ्गेण तीर्थस्य चलितो मध्ये तीर्थं प्राप्य तत्तीर्थे स्नात्वा तत्स्नानजं फलमेव लभते । पैठीनसिः-

षाडशाख्यं स लभते यः परार्थेन गच्छति ।
अर्द्धं तीर्थफलन्तस्य तत्प्रसङ्गेन गच्छति ॥

परार्थेन वेतनादिना प्रसङ्गेन उद्दिश्य तीर्थान्तरप्रसङ्गेन गणेश्वरमिश्रादयोऽप्येवम् । देवीपुराणे-

तीर्थेषु ब्राह्मणं नैव परोक्षेण कदाचन ।
अन्नार्थिनमनुप्राप्तं भोज्ययेन्मनुरब्रवीत् ॥
शक्तुभिः पिण्डदानश्च संयावैः पायसेन वा ।
कर्त्तव्यमृषिभिः प्रोक्तं पिण्याकेन गुडेन वा ॥

पिण्याकः तिलकल्कः । तथा तत्रैव-

श्राद्धञ्च तत्र कर्त्तव्यमर्घ्यावाहनवर्जितम् ।
श्वध्माक्षगृध्रकाकानां नैव दृष्टिहतञ्च यत् ॥
श्राद्धन्तु तीर्थकं प्रोक्तं पितृणां तुष्टिकारकम् ।
अकालेप्यथवा काले तीर्थे श्राद्धं तथा नरैः ॥
प्राप्तैरेव सदा कार्यं कर्त्तव्यं पितृतर्पणम् ।

पिण्डदानं तत्र शस्तं पितृणाञ्चातिदुर्लभम् ॥
विलम्बो नैव कर्त्तव्यो न च विघ्नं समाचरेत् ॥

तत्रेति द्वयमधिकरणसप्तमी न तु निमित्तसप्तमी । उपपदविभक्तेः कारकविभक्तिर्बलीयसीति न्यायात् । तेन तीर्थाधिकरणश्राद्धं सर्वमेवार्घ्यावाहनवर्जितम् । न तु तीर्थप्राप्तिनिमित्तकमात्रमपीति केचित्। तन्न प्राप्तैरेव कर्त्तव्यमित्युपसंहारदर्शनादुपक्रमोपसंहारैकवाक्यतया तीर्थप्राप्तिनिमित्तक एव श्राद्धेऽर्घ्यावाहननिषेधप्रतीतेः । ननु आवाहनं पित्रादिसन्निधिफलकं ते च तीर्थे नित्यसन्निहिता एवेति तीर्थाधिकरण-श्राद्धमात्र एवावाहनबाध उचितो वैयर्थ्यादिति चेत् न शरीरस्य बौद्धस्य वा सन्निर्देवताधिकरणविरोधेन निरस्तत्वात् । किमर्थं तर्ह्यन्यत्रावाहनम् अदृष्टार्थमित्यवेहि अत एव नावाहनमन्त्रोऽपि ।

नन्वेवं नमो व इत्यत्रादृष्टार्थत्वे कथं मन्त्रोहः समवेतार्थेऽयमिति यदि तर्हि प्रतिपुरुषं कथं बहुवचनप्रयोग इति उच्यते- तस्य तु तत्तद्देवताप्रकाशकत्वेन समवेतप्रकृतिकत्वेऽपि प्रतिपुरुषं बहुवचनम्। एतद्वः पितरो वास इति जल्पन् पृथक् पृथक् । इति वचनबलादेव । नन्वेवं प्रवृत्तौ विभक्तिरसमवेतार्थत्वे विकृतावपि तथात्वं यथा- आदितः पाशान् प्रमुमोक्तित्वन्यत्र वाढमिति चेत् तर्हि पितुरेकोद्दिष्टेऽपि एतद्वः पितरो वास इति स्यात् । विभक्तेः प्रकृतावेवासमवेतार्थत्वादिति चेत् भ्रान्तोऽसि द्विधा हि विभक्तिनामसमवेतार्थत्वं मन्त्राभिवाद-बलाद्वाक्यबलाच्चात्र । तत्राद्यं पाशाधिकरणे-

अत एव प्रकृतावपि बहुपाशशून्यानां बहुवचनान्तरमेव पाशशब्दप्रयोग इति सिद्धान्तः ।

द्वितीयस्तु वाक्यविषयमात्रे सम्भवति यावत् बहुवचनं हि वाचनिकमिति न्यायात् । अकाले अमावास्यादिव्यतिरिक्तकाले न तु रात्रादौ निषेधविरोधादिति । यत्तु अकाले रात्र्यादाविति न हि

कोऽपि वारः काऽपि तिथिर्वा न श्राद्धस्य कालः सर्वत्रैव श्राद्ध-विधानादिति तस्माद् अकालत्वेन रात्र्यादिकमेव प्रतिप्रसूतमिति केचित् । तत्र सर्ववारतिथीनां श्राद्धकालत्वेन आवश्यकश्राद्ध-कालत्वाभावादेव । इदन्तु तीर्थश्राद्धमावश्यकम् । तेनायमर्थः- यस्मिन्नपि काले प्रतिपदादौ श्राद्धमनावश्यकं तदापि तीर्थप्राप्तिपक्षे श्राद्धमवश्यकार्यमिति । अत्र केचिद् आह-

यस्य तु दैवगत्या सायाह्नादौ तीर्थलाभस्तस्य तत्प्राप्ति-निमित्तकश्राद्धबाध एव तद्दिने विहितमुहूर्त्ताभावादुत्तरदिने च प्राप्तिदिनत्वाभावादिति ।

वस्तुतस्तु तत्राप्युत्तरदिनेऽचिरोदितमुहूर्त्तद्वयानन्तरं श्राद्ध-मुचितमेव । प्राप्त्युत्तरविहितमुहूर्त्त एव श्राद्धविधानात् । न च विलम्बो दोषाय स्वयमकरणात् । न चैवं प्राप्त्यनुपदं क्षते तदन्तेऽपि श्राद्धापत्तिः प्राप्त्यनन्तरविहितमुहूर्त्तस्य 'प्राप्तैरेव तु कर्त्तव्यम्' इत्यनेन तच्छ्राधाधिकरणत्वेन विहितस्य व्यतिक्रमादिति । पिण्डदानमिति श्राद्धाङ्गत्वेनैव पिण्डदाने प्राप्ते पुनः पिण्डदानवचनं यत्र द्रव्यसम्पत्त्या-दिनाभावे श्राद्धं न सम्भवति तत्र केवलं पिण्डदानमेव कार्यमिति ।

एकस्यां यात्रायामेकस्मिन् स्तीर्थे एकमेव श्राद्धम् । यात्राभेदे तीर्थभेदे चावर्त्तने प्राप्तिनिमित्तकत्वात् । अत एव गयायामेकस्मिन् दिने नानातीर्थप्राप्तौ तन्निमित्तकानि नानाश्राद्धानीति । पैठीनसिः-

प्रतिकृतिं कुशमयीं तीर्थवारिणा मज्जयेत् ।
मज्जयेत्तु यमुद्दिश्य सोऽष्टभागं फलं लभेत् ॥

प्रतिकृतिः प्रतिमा । यत्तु-

कुशोऽसि कुशपुत्रोऽसि ब्रह्मणा निर्मितः पुरा ।
त्वयि स्नाते स च स्नातो यस्येदं ग्रन्थिबन्धनम् ॥

इति मन्त्रेण बद्धग्रन्थेः कुशस्य मज्जनं तन्निबन्धकृद्भिरनुपग्रहा-

दनाकरमिति । तीर्थोपवासो विशेषार्थो न त्वावश्यकः तीर्थमधिगम्य व्रतोपवासनियमयुक्तस्त्यहमवगाहमानस्त्रिरात्रमुषित्वा सर्वपापेभ्यो विमुच्यते स्वस्तिमांश्च भवति। इति देवलवचनात् । एवं चात्र त्रिरात्रोपवासस्नानानां सर्वपापविमुक्तिस्वस्तिमत्वे फलम् । अहितः पूत आहवनीयो भवतीतिवत् एकवाक्यतार्थं विशिष्टान्वयात् न तु प्रत्येकमन्वयो वाक्यभेदापत्तेः । केचित्तु-

सर्वत्रैव तीर्थे प्राप्ति दिने मुण्डनमुपवासश्चेच्छन्ति ।
मुण्डनश्चोपवासश्च सर्वतीर्थेष्वयं विधिः ॥
वर्जयित्वा गयां गङ्गां विशालां विरजान्तथा ॥

इति स्कन्दपुराणोक्तवचने सर्वपदगयादिविशेष निषेधात् च । तन्न सर्वपदस्यासङ्कोचेऽतिप्रसङ्गात् । तथाहि-

भौमानामपि तीर्थानां पुण्यत्वे कारणं शृणु ।
यथा शरीरस्योद्देशाः केचिन्मुख्यतमाः स्मृताः ॥
प्रभावादद्भुताद्भूमेः सलिलस्य च तेजसः ।
परिग्रहान् मुनीनाञ्च तीर्थानां पुण्यता स्मृता ॥

इति महाभारते तीर्थोद्देशे भीष्मवाक्येन सातिशयफलकस्य स्थलस्य जलस्य च तीर्थत्वाभिधानात् स्वदेशान्तर्गतप्रस्रवणादौ वपनोपवासयोः प्रसङ्गः । न चेष्टापत्तिः सर्वदेशीयशिष्टाचारविरुद्धत्वात् । न च सर्वपदं विदेशतीर्थपरं मध्यदेशीयानां सकलशिष्टानुमतस्य प्रयागवपनस्य विलोपापत्तेः । न च येष्वेव महातीर्थेषु विशेषतो मुण्डनं विहितमस्ति तत् प्रयागादन्यत्र तद्विधानश्रवणात् । यथा-

गङ्गां सम्प्राप्य यो धीमान् मुण्डनं नैव कारयेत् ।
वृथा तस्य क्रियाः सर्वाः तीर्थद्रोही भवेन्नरः ॥
गङ्गायां भास्करक्षेत्रे मुण्डनं यो न कारयेत् ।
स कोटिकुलसंयुक्त आकल्पं रौरवे वसेत् ॥

गङ्गां प्राप्य सरिच्छ्रेष्ठां कल्पानुपापसञ्चयाः ।
केशानाश्रित्य तिष्ठन्ति तस्मात्तान् परिवापयेत् ॥
यावन्ति नखरोमाणि गङ्गातोये पतन्ति वै ।
तावद्वर्षसहस्राणि सर्वलोके महीयते ॥

इत्यादिवचनाद् गङ्गायां प्रयागव्यतिरेकेऽपि मुण्डनमिति चेत् अस्तु तावदेवं तथापि बहुवचनानुपपत्तिः । प्रयागगङ्गयोरेव मुण्डनविधानात् । न च एतत् विशेषनिषेधबलादेव तेषु मुण्डनं बाधितम् । बाधस्योक्तत्वात् । वस्तुतस्तु गङ्गामुण्डनविधायकानामन्येषां कल्पतरुकारादिभिः सर्वैरेवानिबद्धत्वेन निर्मूलत्वमेव । अथ-

गङ्गायां भास्करक्षेत्रे मातापित्रोर्गुरोर्मृते ।
आधाने सोमपाने च वपनं सप्तसु स्मृतम् ॥

भास्करक्षेत्रे प्रयागे च मुण्डनमिति स्मृतिसमुच्चयलिखितवचनात् गङ्गायामपि वपनमिति चेत् ।

मुण्डनञ्चोपवासश्च सर्वतीर्थेष्वयंविधिः ।
वर्जयित्वा गयां गङ्गां विशालां विरजां तथा ॥

इति स्कन्दपुराणीयवचनेन गङ्गा गया विशालविरजा व्यतिरिक्ततीर्थे वपनं विदधता गङ्गायामर्थतो वपनस्य निषेधात् ।

तर्हि षोडशिग्रहणाग्रहणवद् विकल्पोऽस्त्विति चेत् भवेदेवं यदि विषयभेदेचाविरोधे न स्यात् । नन्वेवं तथा हि-

यावन्ति नखलोमानि वायुना प्रेरितानि वै ।
पतन्ति जाह्नवीतोये नराणां पुण्यकर्मणाम् ॥
तावद्वर्षसहस्राणि स्वर्गलोके महीयते ॥

इत्यादिवचनानां गङ्गायां सकलमुण्डनविधायकानामविगीतशिष्टाचारोपष्टम्भेन प्रयागवच्छिन्नगङ्गापरत्वम् । निषेधवचनस्य तदनवच्छिन्नगङ्गापरत्वमिति निर्णयात् ।

कथन्तर्हि सर्वतीर्थेष्विति बहुवचनं सर्वतीर्थपदस्य बहुब्रीहिणा प्रयोगवचनत्वे सिद्धे तस्याविवक्षितत्वात् ग्रहं सर्माष्टीतिवत्। कथन्तर्हि गयादिविशेषनिषेधः । इत्थं यदा मौद्गश्चरूर्भवतीति विशेषविधिनैव भाषादिनिषेधे सिद्धे पुनरप्ययज्ञीया वै माषा इति माषनिषेधवचनं यथा प्रतिनिधिविषया अपि माषे न ग्राह्या अत्यन्तायज्ञीयत्वादित्येवंपरम्। तथा गयादिवपननिषेधोऽपि अत्यन्ताप्राशस्त्यादपर इति ।

सर्वतीर्थपदस्य प्रयागवाचकपरत्वे किं मानमिति चेत्-

एवं कुरुष्व कौन्तेय सर्वतीर्थाभिषेचनम् ।
यावज्जीवकृतं पापं तत्क्षणादेव नश्यति ॥

तीर्थप्रयाणकाले अथवा तीर्थे मुण्डनविषये शास्त्रेषु पुराणेषु च मतवैभिन्यं प्राप्यते । पद्मपुराणे स्कन्दपुराणे च प्रतिपादितं विद्यते यत् मुण्डनं तु अनिवार्यं भवति । तन्मते-

तीर्थोपवासः कर्त्तव्यः शिरसो मुण्डनं तथा ।
शिरोगतानि पापानि यान्ति मुण्डनतो यतः ॥

तीर्थगमनकाले उपवासोऽपि वैकल्पिकरूपेण आयाति । परवर्त्तिकाले निबन्धसाहित्ये सामान्यतः धार्मिककृत्येषु विधिविधानं तु कष्टकरं दृश्यते। यथा चातुर्मास्य व्रते अग्निष्टोमे च कर्मणि अथवा वैदिककर्मसु यजमानः स्वस्य श्मश्रुकेशादीनि कर्त्तनं कुर्यादिति व्यवस्था विद्यते । गृह्यसूत्रेषु पारस्कारादिषु समवर्त्तनकाले स्नातकः द्विजः मुण्डनं कुर्यादिति व्यवस्था विद्यते । मन्वादिस्मृतिग्रन्थे एवमपि व्यवस्था प्रचलिता विद्यते । पापाद् विमुक्तये यदा जनः प्रायश्चित्ताचरणं करोति तदा मुण्डनस्य व्यवस्था विद्यते। केषाञ्चित् धर्मशास्त्रकाराणां मते तीर्थक्षेत्रेषु मुण्डनं कर्त्तव्यमिति वचनं प्राप्यते। यथा मिताक्षरायाम्-

गङ्गायां भास्करक्षेत्रे मातापित्रोर्गुरोर्मृते ।
आधानकाले सोमे च वपनं सप्तसु स्मृतम् ॥

अपि च पद्मपुराणस्य पातालखण्डे (१९/२१) इदं वचनं प्राप्यते यत् तीर्थेषु वपनं अवश्यमेव कर्त्तव्यम् । यथा-

मनुष्याणां तु पापानि तीर्थानि प्रतिगच्छताम् ।
केशानाश्रित्य तिष्ठन्ति तस्मात् तद्वपनं चरेत् ॥

वायुपुराणे (१०५/२५) इदं वचनं समर्थितं विद्यते यत्-

मुण्डनं चोपवासश्च सर्वतीर्थेष्वयं विधिः ।
वर्जयित्वा कुरुक्षेत्रं विशालां विरजां गयाम् ॥

अनेन विरजायां कुरुक्षेत्रे विशालाया नाम उज्जयिन्यां अथवा वदरिकायां गयायां च मुण्डनं न कर्त्तव्यमिति प्राप्यते । नारीणां तीर्थाटनकाले मुण्डनव्यवस्था कथं भवतीत्याकांक्षायां धर्मशास्त्रेषु व्यवस्था विद्यते । यदि काचित् सधवा नारी तीर्थाटनं करोति तत्र तीर्थे समग्रस्य केशाग्रस्य अङ्गुलीद्वयमेव केशकर्त्तनं कर्त्तव्यम् । एतेन नारीणां वपनं सम्भवति । तदर्थं मिताक्षरायां प्राप्यते-

सर्वान्केशान्समुद्धृत्य छेदयेदङ्गुलद्वयम् ।
सर्वत्रैव हि नारीणां शिरसो मुण्डनं स्मृतम् ॥

यद्यपि वचनमिदं मिताक्षरायां याज्ञवल्क्यस्मृतौ गोवधप्रायश्चित्तप्रकरणे प्राप्यते तथापि श्रुतस्याकांक्षा तौल्येनात्राप्यन्वयात् ।

प्रयागादावपि तीर्थे तासां नारीणां द्वयङ्गुलिकेशाग्रकर्त्तनमात्रं वपनमिति तीर्थप्रकाशे (पृ-५०/५१) प्रतिपादनं विद्यते । वपनविषये यदा मतद्वैविध्यं प्राप्यते तदा देशाचारतः व्यवस्था विज्ञेया । तीर्थयात्रा काले पितृपूजनं श्राद्धादिकं कर्म कृत्वा एव तीर्थयात्रा निमित्तं गच्छेत् । तदा क्षौरं कर्मवपनं वा कृत्वा गच्छेदिति भेदो विद्यते । क्षौरं नाम श्मश्रुकेशादीनां किञ्चित् कर्त्तनम् वपनं तु मूलतः एव कर्त्तनम् । यत्र यत्र तीर्थे मुण्डनं निषिद्धं विद्यते तत्र क्षौरं कर्म कर्त्तव्यमिति नारदस्य मतम् । तर्थेन्दुशेखरमते मुण्डनोपवासौ काम्यौ भवतः । अतः

वैकल्पिकं भवेत् । यतो हि बहवः शिष्टाः एवं समाचरन्ति । तीर्थयात्राकरणार्थं साधनविषये विचारः पुराणेषु आयाति । यथा-

गोयाने गोवधः पोक्तः हययाने तु निष्फलम् ।
नरयाने तदर्धं स्यात् पद्भ्यां तच्च चतुर्गुणम् ॥

अपि च- उपानद्भ्यां चतुर्थांशं गोयाने गोवधादिकम् ॥ इति

यदि कश्चित् जनः प्रयागं प्रति तीर्थयात्रानिमित्तं गोयानेन गच्छति, तर्हि स जनः नरकं प्राप्नोति । पितरः श्राद्धादिकं न गृह्णन्ति तीर्थं तु निष्फलं भवति । यथा मत्स्यपुराणे (१०६/४,५,७)-

प्रयागतीर्थयात्रार्थी यः प्रयाति नरः क्वचित् ।
वलीवर्दसमारूढः शृणु तस्यापि यत्फलम् ॥
नरके वसते घोरे गवां क्रोधो हि दारुणः ।
सलिलं न च गृह्णन्ति पितरस्तस्य देहिनः ॥
ऐश्वर्यलाभमोहाद्वा गच्छेद्यानेन यो नरः ।
निष्फलं तस्य तत्सर्वं तस्माद्यानं विवर्जयेत् ॥ इति।

यदि असामर्थ्यकारणात् नरयानादिकं गृह्यते तत्र पापं न भवति इति पुराणवचनं समर्थिकृत्य तीर्थप्रकाशकारेण मतं प्रदत्तम् । विष्णुपुराणे उपानद्धारणं वर्षासु आतपे च छत्रधारणं दोषकारकं न भवति । रात्रौ अरण्ये च दण्डधारणं कुर्यात्। विष्णुधर्मोत्तरे व्यावहारिकं मतं प्राप्यते यत् पद्भ्यां तीर्थयात्रायां सर्वोच्चं पुण्यं यानेन स्नानमात्र पुण्यं प्राप्नोति । तीर्थप्रकाशकारेण गङ्गासागरगमननिमित्तं नौकायारनुमतिः प्रदत्ता । यतः तत्र गमननिमित्तं नौकारूपं साधनमावश्यकं भवति ।

वर्षातपादिके छत्री दण्डी रात्र्यटवीषु च ।
शरीरत्राणकामो वै सोपानत्कः सदा व्रजेत् ॥ इति ।

विष्णुपुराणीयवचनेन निष्प्रतिपक्षः सदाशब्दस्वरसात् तीर्थयात्रायामपि

उपानत्परिधानमावश्यकमिति । तीर्थचिन्तामणि (पृ-८,९)-

तीर्थानुसरणं पद्भ्यां तपः परमिहोच्यते ।
तदेव कृत्वा यानेन स्नानमात्रफलं लभेत् ॥

इति विष्णुधर्मोत्तरपुराणे (३/२७३/११-१२) ।

तीर्थयात्राकाले सङ्कल्पपूर्वकं गमनं कर्त्तव्यम् । तद् यथा "ॐ तत् सद् अथ अमुकमासि अमुकपक्षे अमुकतीर्थे अमुकदिने अमुकनक्षत्रे अमुकराशौ स्थिते श्रीभास्करे अमुकराशौ स्थिते श्रीचन्द्रमसि एवं नानास्थानावस्थितेषु ग्रहादियोगकरणेषु अहं अमुकदेवशर्मा अमुकगोत्र अहं अमुकतीर्थगमनं करोमि ब्राह्मणाः स्वस्ति भवन्तः ब्रूवन्तु । स्वस्ति स्वस्ति स्वस्ति एवं त्रिवारं सङ्कल्प्य ब्राह्मणभोजनं दक्षिणां च प्रदाय शुभमुहूर्त्ते योगिन्यादिगणनापुरस्सरं ग्रामं देवालयं प्रदक्षिणं च कृत्वा पूर्वाह्णे निःसरेत् । सङ्कल्पकाले च बहूनां तीर्थानां नामग्रहणमकृत्वा अन्तिमस्य तीर्थस्य नामोच्चारणं कृत्वा तीर्थयात्रामहं करिष्ये" इति सङ्कल्पयेत् । तीर्थयात्रायाः निर्विघ्नपरिसमाप्त्यर्थं तीर्थयात्रायाः गमनदिने सङ्कल्पानन्तरं गणेश-नवग्रहस्वइष्टदेवस्य षोडशोपचारैः अथवा पञ्चोपचारैः सम्पूज्य स्वगृह्यसूत्रानुसारं पार्वणश्राद्धं विधाय न्यूनतया त्रयाणां ब्राह्मणानां सत्कारं च विधाय ततः तीर्थयात्री तीर्थयात्रायाः यत् परिधानं गृह्णीयात्। ततः ग्रामप्रदक्षिणं कृत्वा ग्रामदेवतायाः सन्दर्शनं कृत्वा श्राद्धावशिष्टस्य भोजनं विधाय व्रजेत् । तीर्थे च आगत्य प्रथमदिनमुपवसेत् । ततः परदिनं तीर्थस्नानं तर्पणं श्राद्धं देवदर्शनं ब्राह्मणभोजनञ्च कारयेत् । तीर्थे जपः अध्ययनं दानं सर्वं सङ्कल्पपूर्वकं कृत्वा बहुपुण्यं लभते ।

यदा स्वयमसमर्थो भवति तदा प्रतिनिधिना सङ्कल्पपूर्वकं तीर्थदर्शनाय प्रेषयेत् । तत्रापि पुण्यं भवति ।

यश्चान्यं कारयेत् शक्त्या तीर्थयात्रां तथेश्वरः ।
स्वकीयद्रव्ययानाभ्यां तस्य पुण्यं चतुर्गुणम् ॥
(प्रभासखण्ड तीर्थप्र. पृ-३६)

तीर्थं प्राप्यानुषङ्गेण स्नानं तीर्थे समाचरेत् ।
स्नानजं फलमाप्नोति तीर्थयात्राफलं न तु ॥
(शङ्ख. ८/१२)

तीर्थे ब्राह्मणानां परीक्षणं एकोदिष्टपार्वणादिवत् न कर्त्तव्यम् । केवलं दुष्टदोषाणां ब्राह्मणानां त्याग एव कार्यः ।

धर्मशास्त्रसम्बन्धिग्रन्थेषु वैदिकसाहित्येषु पुराणेषु महाभारते च तीर्थस्य प्रसङ्गे सुमहान् विचारः लक्षपरिमितानां श्लोकानां तीर्थोपरि आलोचनं प्राप्यते । अतः अस्माकं भारतीयसंस्कृतौ काम्यरूपे कर्मणि नैमित्तिकरूपे च कर्माणि तीर्थस्य सुमहद्योगदानं विद्यते ।.अर्वाचीन-कालेऽपि तीर्थस्यास्य परम्परा अनुसृता अनुमोदिता च विद्यते । स्वाधीनोत्तरभारतवर्षे सर्वकारीयस्तरेऽपि भ्रमणं प्रोत्साहकरं विद्यते। अतः धर्मानुरागिणो जनाः तत्तत् स्थानमास्तिकभावनया सपरिवारं तत्र गत्वा स्नानपूजनं च विधाय प्रहृष्टमनाः भवन्ति। अवकाशकालीन गमनमपि भवति । इयं परम्परा प्राचीनकालात् यद्यपि काचित् विच्छिन्ना तथापि लक्ष्यं तु समानमेव भाति । स्वास्थ्यनिमित्तमपि जनाः तीर्थाटनं देवदर्शनम् अद्यापि कुर्वन्ति । अतः तीर्थस्य यथा सामाजिकता तथैव धर्मभावनावैज्ञानिकता च सुतरां वरीवर्त्तते।

तीर्थानां भेदाः-

तृधातोः थक् प्रत्यये क्लीवलिङ्गे पुंलिङ्गे च तीर्थशब्दस्य निष्पन्नो भवति । तीर्थशब्दस्यास्य बहुविधोऽर्थः शब्दकल्पद्रुमादिषु प्राप्यते । तत्र शब्दस्यास्य मुख्यतया पुण्यक्षेत्रस्य अर्थे प्रयोगः अधुना अस्माभिः रूढ्या गृह्यते। परन्तु नदी-जल-जलाशय-यज्ञ-सत्पात्र-

उपाध्याय-उपाय-दर्शनशास्त्र-निदान-उपाधिप्रभृतिषु अर्थेषु आभिधानिकव्यवहारः प्राप्यते । यद्यपि एते अर्थाः विद्यन्ते तथापि नैमित्तिकार्थं कामार्थं वा क्रियमाणकर्मरूपेण अस्य ग्रहणं भवति ।

दृश्यमानेषु त्रिविधेषु कर्मसु नित्यनैमित्तिककाम्येषु नैमित्तिक-काम्यरूपयोः कर्मणोः तीर्थस्यान्तर्भावो विद्यते । नित्यं कर्म नाम यस्य कर्मणः अकरणे प्रत्यवायो भवति तदेव कर्म नित्यकर्म । यथा सन्ध्योपासनादिःनैमित्तिकं नाम किमपि निमित्तमुररीकृत्य क्रियमाणं कर्म । यथा पुत्रजन्म-ग्रहणस्नान-प्रायश्चित्तादिकम् । अत्र पुत्रजन्मनिमित्तं क्रियमाणं जातकर्मजातेष्ट्यादि अनुष्ठानं, ग्रहणजनित अकालिकं रात्र्यादिस्नानं पापस्य विशुद्ध्यर्थं चान्द्रायणादिव्रतरूपं कर्म अपि च कामकृतस्य पापस्य अकामकृतप्रायश्चित्तस्य द्वैगुण्याचरणरूपं व्रतं नैमित्तिककर्मरूपेण भवति । एवञ्च अन्यदपि निमित्तमधिकृत्य क्रियमाणं कर्म । काम्यं कर्म नाम कामनामभिलक्ष्यीकृत्य क्रियमाणं कर्म । यथा- दध्ना इन्द्रियकामो जुहूयाद् अथवा अग्निहोत्रं जुहूयात् स्वर्गकामः । एवमेव यत्र यत्र फलप्राप्तिकामनया क्रियमाणं कर्म तत्सर्वं काम्यकर्मरूपेण परिगणितं भवति ।

तीर्थाटनकर्म तु द्विधात्मकं भवति । यथा- निमित्तात्मकं कामात्मकञ्चेति । यतो हि निमित्तरूपेण क्रियमाण-कर्मविशेषः तीर्थाटने संगच्छति । यथा- पापापनोदनार्थं जनाः तीर्थाटनं कुर्वन्ति। तीर्थे च जप-तप-अध्ययन-तर्पण-श्राद्ध-देवपूजादिरूपं कर्म कृत्वा सङ्कल्पं विधाय तीर्थाटनं कुर्वन्ति तत्रैव सङ्कल्पवाक्ये स्वकृतस्य पापस्य यथा महापातक-अतिपातक-पातक-उपपातक-अनुपातकप्रभृति रहस्यकृतं वा उच्चारणं कृत्वा गङ्गादिस्नानममरदर्शनं मन्त्रजपः ब्राह्मणभोजनादिकं कर्म अनुष्ठितं भवति । धर्मशास्त्रेष्वपि एतादृशानां कर्मणां विधानं व्यवस्था च विद्यते । यथा ब्रह्महत्या महापातकस्य

प्रायश्चित्तान्तरकल्पनाप्रसङ्गे सरस्वतीनद्याः प्रतिकूलगमनं संहिताजपपूर्वकं महापातकविनाशकमिति साक्षान्मनुरूचिवान् । अत एव नैमित्तिककर्मप्रसङ्गे तीर्थाटनं शास्त्रीयमिति निश्चप्रचं वक्तुं शक्यते।

काम्यार्थमपि तीर्थाटनं शास्त्रेषूपवृंहितं वर्त्तते । यथा पुत्रार्थी पुत्रप्राप्तये तीर्थदर्शनाय गच्छति । तत्रैव तीर्थे सङ्कल्पपूर्वकं स्नान-जप-देवपूजनं कृत्वा पुत्रार्थी पुत्रं प्राप्नोति तथैव राज्यकामनया विद्या-कामनया जनाः देवपूजादिकं कर्म कृत्वा स्वाभीष्टं लभन्ते । एतस्मिन् प्रसङ्गे महाभारते पुराणे धर्मशास्त्रे च प्रायशः लक्षपरिमितानि वचनानि प्राप्यन्ते। सर्वत्रैव फलश्रुतिवाक्यानि उपलब्धानि सन्ति । रामायणेऽपि रावणेन श्रीलङ्कातः आगत्य कैलाशशिखरे देवदेवं महादेवं स्वाभीष्टसिद्धिनिमित्तं पूजा कृता । एवमेव प्रायशः सर्वेषु शास्त्रेषु काम्यकर्मनिमित्तं विभिन्नेषु तीर्थस्थानेषु सिद्धपीठेषु च पूजनं, तर्पणं, श्राद्धं, दानमनुष्ठीयते ।

रोगशान्तिनिमित्तमपि जनाः तीर्थाटनं कृत्वा आरोग्यलाभं कुर्वन्ति, यदा जनः व्याधिना आक्रान्तो भूत्वा चिकित्सकेन च परित्यक्तो भवति, तदा देवताऽऽराधनं कृत्वा मन्त्रजपममरदर्शनं तीर्थस्नानादिकं च कृत्वा रोगाद् विमुक्तो भवति । एतस्मिन् विषये अस्माकं पुराणेषु बहुनि उपाख्यानानि दृश्यन्ते । तेषूपाख्यानेषु च शाम्बोपाख्यानमन्यतमम् । यथा- अभिशापग्रस्तः शाम्बः भगवन्तं सूर्यं वैवस्वतमाराध्य स्वरोगाद् विमुक्तो भूत्वा अपूर्वं मनोहरञ्च वेशं धृत्वा स्वर्गे निवसति । एतेन सिद्धस्थानस्य तीर्थस्य एकाग्रचित्तेन मन्त्रजपस्य च प्राधान्यमनुभूयते ।

आस्तिकभावनया विधिपूर्वकं तीर्थाटनेन नूनं सुफलप्राप्तिर्भवतीति धर्मशास्त्रपुराणेषु प्रवर्णितं विद्यते । अस्माकं भारतवर्षे विभिन्नसम्प्रदायजनाः निवसन्ति । तेच सम्प्रदायाः जनाः

प्रथमतः हिन्दु-जैन-बौद्ध-शिख-यवन-ख्रीष्टेषु विभक्ताः सन्ति । एतेषां समेषामपि मुख्यसम्प्रदायानां तीर्थस्थानानि विद्यन्ते । तत्र मुख्यतया हिन्दूनां विषये मयात्र आलोचनं क्रियते । तथापि जिज्ञासादृष्ट्या अन्येषामपि सम्प्रदायानां विषये किञ्चिदालोच्यते । ख्रीष्टसम्प्रदायानां जनानाम् आराध्य देवः भगवान् यीशुख्रीष्टः तेषां धर्मग्रन्थः वाईबेल् भवति । यत्र भगवतः यीशुख्रीष्टस्य महिमा यशगानश्च विद्येते, तस्मिन् ग्रन्थे बहवः उपदेशाः सन्ति । ये तु अस्माकं वेदादेव अनुदिताः भान्ति। एतेन यीशुख्रीष्टस्य मूलं धार्मिकं तत्त्वं वेदेन सह समानं भवति। तेषां पुण्यक्षेत्रन्तु जेरुजेलं भवति, येषां कृते जेरुजेलं गमनं सुकरं न भवति तेषां कृते चर्चभवनं निमित्तमस्ति। तत्रैव आगत्य ते प्रार्थनां कुर्वन्ति । पूजार्चनमपि धूपदीपादिकं समर्प्य पारलौकिकं पुण्यमर्जयन्ति । अत एव अस्माकं देवालयवत् तेषामपि इदं भवति ।

तथैव यवनानां मुख्यं तीर्थस्थानं तु मक्का-मदिना भवति । यत्र बहवः यवनाः आस्तिकभावनया गच्छन्ति तद्गमनं 'हज्' इति उच्यते। यः यवनः हज् गमनं करोति सः हाजीति कथितो भवति । तेषां सम्प्रदाये स अतीव धार्मिको भवति । मान्योऽपि च भवति । स नैष्ठिकक्रियावान् सत्यवादी च भवतीति तेषां विश्वासः । तेषां सम्प्रदाये स्वजीवनावसरे अन्यूनमेकवारं हज् गमनं कर्त्तव्यमिति मनसि परमं लक्ष्यं तिष्ठति । अतः कोरान् परिशीलनेन तीर्थाटनस्य समानता प्राप्यते ।

बौद्धानामपि त्रीर्थक्षेत्रं विद्यते । जन्मस्थानं भगवतः बुद्धस्य ततः ज्ञानस्थानमुपदेशस्थानं निर्वाणस्थानमिति चत्वारि स्थानानि भवन्ति। यथा जन्मस्थानं लुम्बिनी, ज्ञानस्थानं बोधगया, प्रवचनस्थानं सारनाथः, निर्वाणस्थानं कुशिनारा च भवति । एतानि चत्वारि

स्थानानि बौद्धानां पुण्यक्षेत्राणि तीर्थस्थानानि च भवन्ति । बौद्धानामपि मनसि इच्छा विद्यते यत् कथंचिद् एतेषां तीर्थानां दर्शनं पुण्यार्जनं च कृत्वा पारलौकिके जीवने सुखादिप्राप्तिनिमित्तम्। एतेनापि बौद्धानां निर्वाणप्राप्तिर्भवतीति विश्वासः। शिखसम्प्रदायानां जनानां यद्यपि हिन्दुदेवालयेन सह सम्बन्धः तथापि तेषां पृथक्तया धर्मस्थानं पुण्यस्थानं वा विद्यते । तत्तु गुरुद्वारमित्युच्यते । यत्र गुरुपूजनं वन्दनं प्रार्थनादि कर्म प्रचलति । तस्य सम्प्रदायस्य एतेष्वेव कर्मसु पुण्यं पारलौकिकं च भवतीति सुमहान् विश्वासः । शिखधर्मग्रन्थैः सह वेदस्यापि सम्बन्धो विद्यते ।

जैनानामपि पृथक् सम्प्रदायो विद्यते । बौद्धानामिव तेषामपि जैननामहिंसा परमो धर्मः इति विद्यते । अयमेव नियमः वेदेन सह समो भवति । एतेषामपि विश्वासः पुण्यक्षेत्रदर्शनं दानं जपादिद्वारा आत्मनः सद्गतिर्भवतीति ।

एतेषां समेषां सम्प्रदायानां जनकेव भाति हिन्दुसनातनधर्मः। सर्वेषां सम्प्रदायानां यद् यन्मूलं तत्त्वं विद्यते तत्सर्वमपि तत्त्वं हिन्दुधर्मे प्राणभूतं राजते । अयमपि हिन्दुधर्मः कालान्तरे विभिन्नेषु सम्प्रदायेषु विभक्तो जातः। यथा- वैष्णवसम्प्रदायः, शैवसम्प्रदायः, गाणपत्यसम्प्रदायः, एवमेव अधुना विभिन्नगुरुपरम्परायां विभिन्नाः सम्प्रदायाः अवलोक्यन्ते । एते सर्वेऽपि भिन्नसम्प्रदायभूत्वाऽपि सम्प्रदायनिर्विशेषेण देवताराधनं पूजनं दर्शनञ्च कुर्वन्ति । यथा कश्चिद् वैष्णवः स यथा आदरेण विष्णूत्सवान् पालयति तथैवादरेण शिवोत्सवं दुर्गोत्सवमेव अन्यान्नुत्सवान्नपि पालयति न त्यजति। अस्माकं परम्परायां गणेशपूजनं प्राचीनकालादेव समागच्छति । अन्येषां देवानां पूजनप्रसङ्गे गणेशस्य पूजनं सर्वदाऽग्रे भवति । अपि च अस्माकं संस्कृतौ पञ्चदेवपूजनम् अतीव घनिष्ठरूपेण आयाति।

यथा सर्वे जानन्ति-

गणेशभास्करो विष्णुः शिवदुर्गा तथैव च ।
भिन्नाभिन्नं न कर्त्तव्यं पञ्चदेवं नमस्तुते ॥

आसां पञ्चदेवतानां पूजनं सम्प्रदायनिर्विशेषेण भवति । अत्र कापि किम्बदन्ती मया उपस्थाप्यते, येन हिन्दुधर्मस्य महानता विशालता च प्रकाशिता भवति । कश्चिद्दाक्षिणात्यः सुमहान् पण्डितः शास्त्रचर्चाविधातुं जगन्नाथपुरीं प्रति आगतवान् । स तु गाणपत्यः आसीत् । यदा अन्येषां प्ररोचनया तथा च जगन्नाथदर्शनेन योनिजन्मजनितयन्त्रणाविमुक्तो जनः भवति इति अस्य ज्ञानमासीत् । तदर्थं जगन्नाथदर्शनं कर्त्तव्यमिति मनसि विविच्य जगन्नाथदर्शनञ्च कृतवान् । परन्तु लीलापुरुषोत्तमस्य महत्या लीलया तेन भगवतः गणेशस्य स्वरूपदर्शनं कृतम् । भगवान् जगन्नाथः भक्तानन्ददायकः यत्रैव भक्तः तत्रैव भगवान् राजते । उच्यते च-

मद्भक्ताः यत्र गायन्ति तत्र तिष्ठामि नारदः ॥

अत एव यादृशी भावना यस्य फलं भवति तादृशमिति अस्माकं संस्कृतौ एतादृशी घटना बहुला तस्मादेव कालाज्जगन्नाथमन्दिरे स्नानयात्रायां स्नानवेद्यां जगन्नाथस्य गणेशवेशं भवति । अतः हिन्दुधर्मावलम्बिनः आस्तिकाः जनाः सम्प्रदायनिर्विशेषेण समग्रेऽस्मिन् भारतवर्षे तीर्थाटनं कुर्वन्ति । अस्माकं भारतवर्षे चतुर्दिक्षुः कुत्रापि वा तीर्थं नास्ति गङ्गातः गोदावरीं यावत् हिमालयात् कन्याकुमारीं यावत् अस्माकं पुण्यमयं भारतवर्षं पवित्रनदनदीनां गिरिकाननानां भास्कर्यपूर्णानां मन्दिराणां समाहारेण रमणीयं पुण्यप्रदं च भवति । भारतवर्षस्याधिकांशेषु ग्रामेषु शिवमन्दिराणि विष्णुमन्दिराणि विभिन्नानि देवायतनानि सुशोभितानि वर्त्तन्ते । प्रत्येकं पुण्यस्थानस्य मन्दिरस्य वा किञ्चित्

किञ्चिदैतिह्यमपूर्वत्वमाध्यात्मिकत्वं च विद्यते । येन प्रभावेण जनाः समाकर्षिताः भूत्वा गच्छन्ति ।

अस्माकं भारतवर्षे यद्यपि सन्ति बहुनि तीर्थक्षेत्राणि तानि सर्वाण्यपि शास्त्राण्यनुमोदितान्यपि च बहुनि पुराणवचनानि तेषां क्षेत्राणां प्रशस्तिगानं कुर्वन्ति, तेषु सर्वेषु सप्तानां तीर्थक्षेत्राणां नामानि वैशिष्ट्यं प्राधान्यं च अधिकांश आस्तिकहिन्दुजनानां मुखारविन्दे विराजन्तेतराम्। तानि यथा-

अयोध्या मथुरा माया काशी काञ्ची ह्यवन्तिका ।
पुरी द्वारावती चैव सप्तैताः मोक्षदायकाः ॥

अत एव एतानि सप्तक्षेत्राणि पुनर्जन्मनिवारकाणि अपि तु मोक्षप्रदायकानि भवन्ति । सर्वाण्यपि एतानि स्वमहिम्ना प्रसिद्धानि सन्ति । एतस्मिन् विषये नाधिकं किमपि वक्तव्यं तथापि प्रत्येकं क्षेत्रस्योपरि किञ्चिदालोचनं कृत्वा धर्मशास्त्रीयसमीक्षणं किञ्चित्प्रदीयते । सर्वमपि पण्डितानां प्रेक्षावतां विदुषां ज्ञातपूर्वमेव केवलं स्वल्पबुद्धिसम्पन्नानां छात्राणां बालानां सुखबोधाय एतत्कर्म चिकिर्षितं मया । तदर्थं मयाऽत्र मुख्यानां तीर्थानां संक्षिप्तं विवरणं समुपस्थाप्यते।

अयोध्या-

अयोध्याविषये साक्षादेवधर्मशास्त्रे न किमपि प्राप्यते । मनुस्मृतावपि अयोध्याविषये न किमपि वर्णितमस्ति । अपि तु मनुस्मृतेः श्लोकः अविकलतया भगवता वाल्मीकिना उद्धारः कृतः। अत एव मनुकाले अयोध्यायास्तथा महत्त्वं नासीदिति वक्तुं शक्यते। परन्तु परवर्त्तिकाले क्षेत्रस्यास्य बहुमाहात्म्यं पुराणेषु तथा निबन्धग्रन्थेषु वर्णनं दृश्यते।

अयोध्याया नाम या भूमिः युद्धुमयोग्या भवति सा एव अयोध्या। पुनः अपरापि व्युत्पत्तिरस्माभिः क्रियते अयः ध्या अयोध्या। अत एव लौहरूपस्य भगवतः रघुकुलावतंशस्य मर्यादापुरुषोत्तमश्रीरामचन्द्रस्य ध्यानयोग्या भूमिः सा एव अयोध्या। अस्याः अयोध्यायाः अपरापि एका संज्ञा विद्यते सा भवति साकेतपुरी।

अस्यां नगर्य्यां महाराजस्य दशरथस्य पुण्येन सन्तुष्टः सन् भगवान् स्वयं जन्मग्रहणं चक्रे। व्यासवचनेन भगवता साक्षात् श्रीकृष्णेन इदं प्रतिपादितं यत्-

यदा यदा हि धर्मस्य ग्लानिर्भवति भारत।
अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम्॥
परित्राणाय साधूनां विनाशाय च दुष्कृताम्।
धर्मसंस्थापनार्थाय सम्भवामि युगे युगे॥

अस्मादेव वचनबलात् ऊहापोहेन विज्ञातुं शक्यते यत् भगवता परंब्रह्मणा विरचितेऽस्मिन् जगति यदा यदा धर्मस्य लोपो भवति अधर्मस्य च प्राधान्यमायाति तदा भगवान् धरातले जन्मग्रहणं करोति। अधर्मस्य विनाशं कृत्वा साधूनां जनानां च संस्थापनं कृत्वा पुनः स्वस्थानं गच्छति। यदा मर्यादापुरुषोत्तमः भगवान् श्रीरामचन्द्रः जन्मग्रहणं कृतवान् तदा इयं पृथ्वी अत्यन्तं व्याकुलिता आसीत्। असुरराजेन दशाननेन रावणेन सर्वान् लोकान् विजित्य देवानां ताडनं दर्पेण कृतम्। तस्य विनाशनिमित्तं लीलापुरुषेण मायया श्रीरामचन्द्ररूपं धृत्वा अयोध्यायां महाराजस्य दशरथस्य पुत्ररूपेण जन्म लेभिरे। अस्मिन् विषये रामायणात् सर्वेऽपि जानन्ति इयं कथापि अतीव विख्याता च वर्त्तते।

अत एव यस्यां भूमौ भगवतः परंब्रह्मणः अवतारो जातः सा

भूमिरपि कियती कृतपुण्या तत् वक्तव्यं नास्ति । अस्मिन् प्रसङ्गे कविकूलकुमुदकलाधरेण भगवता तुलसीदासेन तथा चादिकविना भगवता वाल्मीकिना क्षेत्रस्यास्य महती प्रशंसा निगदिता किं बहुना क्षेत्रस्यास्य दर्शनेन सुमहत्पुण्यं पापक्षयः पुत्रादिकामान् जनः प्राप्नोति। अपि च यद्वा अस्मिन् क्षेत्रे मरणं ब्रजति तर्हि तस्य जनस्य ध्रुवमेव पुनर्जन्म न विद्यते। अथापि अस्य क्षेत्रस्य माहात्म्यं प्राधान्यञ्चास्माभिः प्रतिदिनमनुकीर्त्यते ।

मोगलमहाराजेन अस्मिन्नेव क्षेत्रे स्वधर्मप्रतिष्ठापनार्थं वावरिमस्जिदं निर्मितम् । प्रतिहिंसापरायणतया स्वधर्मस्य बहुलप्रचारार्थं च तेन एतत्कृतम्। अस्मिन्नेव प्रसङ्गे अधुना सर्वकारीयस्तरे सुमहान् विवादः परिदृश्यते । क्षेत्रस्यास्य ईदृशी प्रतिष्ठा अद्यापि विद्यते यत् यत्र पशुवधादिरूपं हिंसाकर्मं न भवति तदर्थमस्याः नगर्याः अपरा संज्ञा अवधपुरी इति विश्रुता वर्त्तते । 'जातस्य हि ध्रूवं मृत्युः मृतर्जन्म ध्रुवस्य च' इदं यद्वचनं विद्यते, एतत्तु त्रैकालिकं सत्यं भवति तथापि इमां भूमिं प्रति दीर्घदिनं यावदजरत्वामरत्वप्राप्तिनिमित्तं श्रद्धालुजनाः समागच्छन्ति । क्षेत्रस्यास्य एतदर्थं प्रतिष्ठा विद्यते यस्य क्षेत्रस्य महिमा श्रीरामनाम्ना संलग्ना विद्यते तस्य नाम्नः उच्चारणे संसाराद् विमुक्तो भवति जनः, सर्वेषु सप्ततीर्थेषु यस्य नाम सर्वाग्रगण्यं, तथैव तीर्थललामभूतस्य श्रीरामजन्मपीठस्य सूर्यवंशावतंशस्य श्रीरामराज्यस्य विषये यत्किमपि लेखनं तत्सर्वमपि स्वल्पं भवति । तदर्थमेव कविकुलगुरूणा कविताकामिनीविलासेन कालिदासेन अपूर्वप्रतिभा-पूर्णस्य वैदग्ध्यपूर्णस्य रघुवंशमहाकाव्यस्य रचनाप्रसङ्गे पार्वती-परमेश्वरयोः वन्दनानन्तरमतीव विनम्रभावेन स्वहीनभावं पुरस्कृत्य एतत्पद्यं लिखितं यत् सर्वविदितं विद्यते यत् 'मन्दकवियशः प्रार्थि।' अपि च-

"क्व सूर्यप्रभवो वंशः क्व चाल्पविषया मतिः ।"

तीर्थगमनविषये मया पूर्वस्मिनध्याये आलोचिता वर्त्तते । यदा कश्चित् तीर्थार्थी तीर्थदर्शनाय गच्छति, तदा उत्तरायणे गमनं कर्त्तव्यम् । तदपि गमनमुपवासपूर्वकं संकल्पं विधाय ब्राह्मणभोजनं प्रदाय नववस्त्र-परिधानं कृत्वा ग्रामप्रदक्षिणपूर्वकं तीर्थाय गच्छेत् । गमनकाले पितापितामहप्रपितामहादीनां कृते श्राद्धं प्रदाय देवपूजनञ्च कृत्वा गच्छेत् । अयोध्यादर्शनं चैत्रमासस्य शुक्लपक्षे एव कर्त्तव्यम् । तत्र रामनवमी भगवतः श्रीरामस्य जन्मदिनं भवति। तद्दिनमयोध्यादर्शनं रामपूजनं व्रतधारणं महापुण्यप्रदं भवति । अस्मिन् दिने यस्तत्र गच्छति स सर्वान् कामान् प्राप्नोति एव ।

मथुरा-

महाराजशूरसेनराज्यस्य मुख्यराजधानी भवति मथुरा । अस्याः नगर्याः विषये न कश्चन वैदिकसङ्केतः प्राप्यते । परन्तु अस्य पुराणप्रसिद्धस्य तीर्थस्य विषये ख्रीष्टपूर्वपञ्चमशताब्दीतः मथुरायाः अस्तित्वं सिद्धं विद्यते । बौद्धकालेऽपि अस्याः नगर्याः प्राधान्यमासीत्। यतः तस्यामेव नगर्यां बुद्धदेवस्य विशिष्टेन शिष्येन महाकच्छायनेन मथुरायां स्वकीयस्य गुरोः उपदेशाश्चाध्यापिताः । चीनपरिव्राजकेन मेघास्थिन्समहोदयेन मथुरानगरीविषये तथा च भगवतः श्रीकृष्णस्य विषये ज्ञानं लब्धम्। जैमिनीयपूर्वमीमांसासूत्रेऽपि मथुराशब्दः प्राप्यते। यस्यार्थः मथुरानिवासी अथवा तस्मादुत्पन्नः जनः। पाणिनीयसूत्रेऽपि अस्य प्रयोगः दृश्यते । पाणिनिना वासुदेव-अर्जुन-गोविन्दादीनां प्रयोगः कृतः। यथा वार्त्तिके दृश्यते-'गावि च विन्दे संज्ञायाम्'। पातञ्जलमहाभाष्येऽपि मथुराशब्दः बहुवारः प्रयुक्तः । बहुस्थानेषु वासुदेवेन कंसः निहतः नाटकेषु प्राप्यते । मथुरानगरीं सौर्यपुरमिति उत्तराध्ययनसूत्रे प्रतिपादितं विद्यते ।

आदिपर्वणि महाभारते धेनूनां कृते मथुरा प्रसिद्धा इति उल्लेखो विद्यते। सभापर्वणि प्रतिपादितमस्ति यत् जरासन्धस्य सेनापतिः डिम्भकः यदा यमुनायां मृतः तदा जरासन्धो दुःखितो भूत्वा मगधं जगाम, तदा च कृष्णः उवाच यत्- अद्यप्रभृति वयं सर्वे प्रसन्नेन मथुरायां स्थातुं शक्नुमः । परन्तु तस्मिन्नेव सभापर्वणि विद्यते यत् जरासन्धः वारंवारम् आक्रमणं कृत्वा मथुरानगरीं कष्टं दत्तवान्, तदा श्रीकृष्ण विरक्तो भूत्वा यादवान् गृहीत्वा द्वाकायां स्थापयामास । ब्रह्मपुराणे विद्यते श्रीकृष्णस्य सम्मत्याः यादवाः कालयवनस्य भयेन मथुरां त्यक्तवन्तः। रामायणेऽपि मथुराविषये प्राप्यते यत्- शत्रुघ्नेन द्वादशवर्षाणि यावत् मथुराराज्यं शासनं कृतम् । रघुवंशेऽपि कथेयमायाति । कलिङ्गराजेन खारबेलेन इयं नगरी विजिता इति शीलालेखतः प्राप्यते । ऐतिहासिकतथ्यानुसारं मथुरा एका समृद्धिशालिनी नगरी आसीत् । प्राचीनकालादारभ्य ख्री.पू.षष्ठशताब्दीं यावत् तत्र हिन्दुमहाराजानां शासनमासीत् । अग्निपुराणे प्राप्यते यत् श्रीरामस्याज्ञया भरतेन मथुरायां शैलूषस्य कोटित्रयपुत्राणां हननं कृतम्। यथा-

अभूतपूर्वमथुरा काचिद्रामोक्तो भरतोवधीत् ।
कोटित्रयञ्च शैलूष पुत्राणां निशितैः शरैः ॥
शैलूषं दृप्तगन्धर्वसिन्धुतीरनिवासिनम् ॥ (अग्नि. २/८,९)

मथुराविषये वराहपुराणे आगच्छति यत्- स्वयं विष्णुः कथयति पृथिव्यां पाताले च एतादृशं मथुरासमं स्थानं नास्ति । मथुरा मम प्रसिद्धं क्षेत्रं मुक्तिदायकमेतस्मादतिरिक्तं नाधिकं मे कुत्रापि रोचते। पद्मपुराणे आगच्छति यत्-

"तस्मान्मथुरकं नाम विष्णोरेकान्तवल्लभम् ॥" इति।

पद्मपुराणे आदिखण्डे प्राप्यते यत् यमुना यदा मथुरया सम्मिलिता भवति, तदा मोक्षदायिनी भवति । अत एव यमुना

मथुरायामेव पुण्यफलं ददाति । अस्याः मथुरायाः परियोजनं तु विंशति योजनमासीदिति नारदीयपुराणे उत्तरखण्डे (७९/२०-२१) प्राप्यते।

विंशतिर्योजनानां तु माथुरं परिमण्डलम् ।
तन्मध्ये मथुरा नाम पुरी सर्वोत्तमोत्तमा ॥ इति ।

मथुरासमीपवर्त्तिनी कानिचित् तीर्थान्यपि विद्यन्ते, यानि चतुर्विंशत्युपवनानीति पश्चात्कालिकग्रन्थेषु प्राप्यन्ते । तेषूपवनेषु वृन्दावनमन्यतमम् । इदं तावत् वृन्दावनं यमुनाकूले मथुरायाः उत्तरपश्चिमदिग्भागे पञ्चयोजनपरिमितमासीत् । वृन्दावनं तु नन्दनन्दनस्य भगवतः श्रीकृष्णस्य भगवतः साक्षाद्रूपस्य लीलापुरुषोत्तमस्य लीलाभूमिः भवति । इदं तावत् क्षेत्रं पृथिव्यां वैकुण्ठपुरं भवति । अस्मिन् प्रसङ्गे विष्णुपुराणे नारदीयपुराणे पद्मपुराणे मत्स्यपुराणे वराहपुराणे श्रीमद्भागवते च बहुवर्णनं प्राप्यते । हरिवंशे रघुवंशे च वृन्दावनस्य स्थितिः कृष्णतत्त्वस्य परमप्रचारकः भगवान् चैतन्यदेवः वृन्दावनस्य महिमा वर्णितवान्। इदं क्षेत्रं तु भगवतः श्रीकृष्णस्य परमपावनं क्षेत्रं तदर्थं वैष्णवाः जनाः चैतन्यभक्ति-सम्प्रदायाः आगतवन्तः । क्षेत्रस्यास्य महत्त्वञ्च प्रचारितवन्तः । मन्ये वैष्णवसम्प्रदायाः यावन्तः परिव्राजकाः महापुरुषाः सर्वेऽपि वृन्दावनस्य गुणकीर्त्तने रजलेपनेन च आत्मानं धन्यधन्यं स्वीकुर्वन्ति। वृन्दावनस्य विषये श्रीमद्भागवते रासपञ्चाध्यायिमध्ये सुन्दरं कृष्णकथावर्णनं प्राप्यते । अनेके वैष्णवसम्प्रदायाः कवयः राधाकृष्णमिलनकथां वृन्दावनस्य कदम्बमूलं यमुनायाः सुनीलं जलमतीव चमत्कारेण वर्णयन्ति । गीतगोविन्दकाव्ये परमवैष्णवेन महाकविजयदेवेन राधामाधवयोः मिलनगाथाप्रसङ्गे यमुनायाः तत्रस्थितस्य कदम्बमूलस्य कुञ्जवनस्य यमुनाजलस्य वर्णनं भक्तिभावेन रसमञ्जुलं पद्यमुपस्थापितम् । अस्मिन्नेव भारतवर्षे

एतादृशः जनः नास्ति यः भगवतः श्रीकृष्णस्य महामायाराधिकायाः मिलनगाथां गोपिकानां च भक्तिभावनां न जानाति । अद्यापि विंशशताब्द्यारन्तिमभागे विश्वस्य सर्वोत्कृष्टदेशे आमेरिकायामपि भगवतः श्रीकृष्णस्याराधनं कीर्त्तनं पूजनं प्रचलति ।

अत एव मथुरायां कंसस्य राजधान्यां भगवतः श्रीकृष्णस्य जन्मग्रहणमभूत् । वसुदेवसुतत्वात् भगवान् श्रीकृष्णः वासुदेव इत्युच्यते। भगवतः जन्मस्थानमिति कृत्वा क्षेत्रस्यास्य महत्त्वं पावनत्वं मोक्षदायकत्वं च सिद्धं भवति । यद्यपि यवनाः म्लेच्छाः अस्मिन्नेव क्षेत्रे स्वप्राधान्यं प्रदर्शितवन्तस्तथापि सा मथुरा तच्च वृन्दावनं नितरामेव कृष्णभक्तानां पुण्यपीठमिति नास्ति काचित् विप्रतिपत्तिः। यद्यप्यधुना कृष्णवेणुनिस्वनं नायाति, यद्यप्यधुना यमुना पुलकिता न भवति, तादृशं च कदम्बमूलं यद्यपि न शोभते, एतेषां सर्वेषामभावेऽपि कृष्णगतप्राणाः जनाः स्वभावराज्ये सर्वामपि कृष्णलीलां मुहुर्मुहुः नीरवच्छिन्नेनानुभवन्ति ।

मायापुरी-

पुराणप्रसिद्धेयं मायापुरी सप्तमोक्षदायिकासु पुरीषु अन्यतमा विद्यते । योगमायायाः पुरी निवासः इति कृत्वा मायापुरी प्रसिद्धा । इयं मायापुरी हरिद्वारनाम्ना प्रसिद्धं तीर्थक्षेत्रं भवति । तीर्थस्य कृते यद्यदावश्यकं तत्सर्वमपि अत्रैव विराजते । देव्याः भगवत्याः योगमायायाः परमपावनं क्षेत्रं. क्षेत्रमिदं च नितरां गङ्गायाः पुण्यवारिणा प्रक्षालनं कृत्वा पावयति परमपावनी जाह्नवी । अतः किं वाऽधिकमेकं तीर्थस्य कृते अपेक्षितं भवति । यत्र देशे गङ्गा प्रवाहिता यत्र च भगवतः मन्दिरं यत्र च साक्षाद्योगमाया समग्रस्य जगतः स्वयोगबलेन संधारयति, तस्य क्षेत्रस्य स्वत एव प्रतिष्ठा मर्यादा पावनता च विद्यते।

धर्माकांक्षिणः जनाः तत्र क्षेत्रं गत्वा गङ्गास्नानं विधाय भगवतः

दर्शनं कृत्वा भगवतीदर्शनं च विधाय कृतकृत्याः भवन्ति । अस्माकं हिन्दुपरम्परायामिदं क्षेत्रं भवति मुक्तिक्षेत्रं हरिद्वारमिति। सम्भवतः क्षेत्रमिदं स्कन्दपुराणात्प्रागेव गङ्गाद्वारमिति अधिकं प्रचलितमासीत्। हुएन्सां मतानुसारं क्षेत्रमिदं गङ्गाद्वारं भवेत् । अस्मिन् एव क्षेत्रे प्रवाहितायां गङ्गायां स्नानार्थं बहवः जनाः समागच्छन्ति । अत्रैव गङ्गायाः स्नानफलमधिकमिति धार्मिकजनानां विचारः। यद्यपि तुलनात्मकदृष्ट्या हरिद्वारनामकरणमर्वाचीनं भाति, तथापि पुराणेषु अस्य ग्रहणत्वात् प्राचीनमेवेति मायापुर्यां स्नानेन निवासेन देहत्यागेन च जनः अमृतत्वं प्राप्नोतीति पद्मपुराणस्य स्कन्दपुराणस्य च मतं विद्यते।

काशी-

अस्माकं हिन्दुपरम्परायां सृष्टिस्थितिप्रलयस्य त्रयः देवाः भवन्तीति विश्वासः । सृष्टेरधिकारी ब्रह्मा पालनस्य विष्णुः प्रलयस्याधिकारी शिव एव । भगवतः शिवस्य लिङ्गपूजनमनादिकालादेव प्रचलति । समग्रभारतवर्षे द्वादशज्योतिर्लिङ्गानि विद्यन्ते । तेषु द्वादशज्योतिर्लिङ्गेषु काश्यां विराजमानं विश्वनाथज्योतिर्लिङ्गमन्यतमम्। तदर्थमेव काशीनगरी विख्याता मोक्षदायिका चेति विद्यते। यत्र परमपावनी गङ्गा नितरां स्वाम्बुना शिवमस्तकं धौति अपि च जनान् पवित्री करोति । अस्या विषये बहुषु पुराणेषु बहुनि वचनानि प्राप्यन्ते। काश्याः नामान्तरं वाराणसी विश्वनाथधाम इत्यादिकं विद्यते । अस्याः नगर्याः स्मरणमपि महापुण्यप्रदं भवति । अस्मिन्नेव प्रसङ्गे मया कानिचित् पुराणवचनानि उदाहीयन्ते । मत्स्यपुराणे ईश्वरोवाच-

वाराणसी तु भुवनत्रयसारभूता ।
रम्या मुदा मम पुरी गिरिराजपुत्रि ॥

तत्रागता विविधदुष्कृतकारिणोऽपि ।
पापक्षये विरजसः प्रतिभान्तिमर्त्याः ॥
इदं गुह्यतमं क्षेत्रं सदा वाराणसी मम ।
सर्वेषामेव जन्तूनां हेतुर्मोक्षस्य सर्वदा ॥

स्कन्दपुराणे- ब्रह्मघ्न-गोघ्न-गुरुतल्पग-भिन्नवृत्त-
न्यासापहारि कुहकादि निषिद्धवृत्तिः ।
संसारभूतदृढपाशविमुक्तदेहो
वाराणसीं मम पुरीं समुपेतु लोकः ॥

क्षेत्रं ममेदं सुरसिद्धयुष्टं संप्राप्य मर्त्यः स्वकृतप्रभावात् ।
ख्यातो भवेत् सर्वसुराशुराणां मृतश्च यायात् परमं पदं सः ॥
क्षेत्रेऽस्मिन्निपतन्ति ये सुकृतिनो भक्ताः सदा मानवाः ।
पश्यन्तीऽन्वहमादरेण शुचयः सन्तः सदाऽमत्सराः ॥
ते मर्त्या भवदुःखपाशरहिताः संशुद्धकर्मक्रियाः ।
भित्वा सम्भवबन्धजालगहनं विन्दन्ति मोक्षं पदम् ॥

एतदनन्तरं क्षेत्रस्य मानविषये उच्यते । मत्स्यपुराणेऽपि-
द्वियोजनमथादुर्ध्वं पूर्वपश्चिमतः स्थितम् ।
उर्द्धयोजनविस्तीर्णं दक्षिणोत्तरतः स्थितम् ॥
वाराणसी नदी या तु या च शुष्कनदी तथा ।
भीष्मचण्डिकमाध्यन्तु पर्वतेश्वरमन्तिके ॥

ब्रह्मपुराणे ब्रह्मवाक्यम्-
वरणाचाप्यसिश्चैव द्वे नद्योः सुखवल्लभे ।
अन्तराले तयोः क्षेत्रं भूमावपि विशेषतः ॥
पञ्चक्रोशप्रमाणन्तु क्षेत्रं दत्तं मया तव ।

स्कन्दपुराणे- चतुःक्रोशं चतुर्दिक्षु क्षेत्रमेतत् प्रकीर्त्तितम् ।
योजनं विधिचार्वङ्गि मृत्युकालेऽमृतपदम् ॥

अत्र कल्पभेदेन परिमाणभेदो द्रष्टव्यः । असिवरणयोर्मध्यं वाराणसी-क्षेत्रमिति तु नियम एव, तेनासितः पूर्वं वरणातः पश्चाद् वाराणसीति मन्तव्यम् । तत्रैव-

अयनन्तूत्तरे ज्ञेयमिति चण्डेश्वरं मम ।
दक्षिणं शङ्कुकर्णस्तु ॐकारन्तूत्तरं मम ॥
दशकोट्यस्तु तीर्थानां संविशन्त्यत्र पर्वणि ॥

लिङ्गपुराणे शिववाक्यम्-

पिङ्गल नाम या नाडी आग्नेयी सा प्रकीर्त्तिता ।
शुष्का सरिच्च सा ज्ञेया लीलार्को यत्र तिष्ठति ॥
इडा नाम्नी तु या नाडी सा सौम्या संप्रकीर्त्तिता ।
वाराणसी समा ज्ञेया केशवो यत्र संस्थितः ॥
आभ्यां मध्ये तु या नाडी सुषुम्ना सा प्रकीर्त्तिता ।
मत्स्योदरी च सा ज्ञेया विषुवं तत्प्रकीर्त्तितम् ॥

इयं 'मित्रावरुणानामानौ द्वारदेशव्यवस्थितौ' इति लिङ्गपुराणात् ।

एवञ्च लीलार्कके शवयोः शुष्कनदीवरणतीरस्थयोर्मध्यं मत्स्योदरीनदीसंज्ञकं चिह्नितम् । असी (सि) वरणयोर्मध्ये वाराणसीक्षेत्रमिति वर्त्तुलार्थः ।

मात्स्ये-

विमुक्तं न मया यस्मान्मोक्ष्यं ते न कदाचन ।
महत्क्षेत्रमिदं तस्मादविमुक्तमिति स्मृतम् ॥
प्रयागादपि तीर्थाग्रादिदमेव महत् स्मृतम् ।
अल्पायासेन चैवात्र मोक्षप्राप्तिः प्रजायते ॥

तथा तत्रैव- नानावर्णा विवर्णाश्च चाण्डाला ये जुगुप्सिताः ।
किल्विषैः पूर्णदेहाश्च प्रकृष्टैः पातकैस्तथा ॥
भेषजं परमं तेषामविमुक्तं विदुर्बुधा ।

पाखण्डिनः परिदृष्टान् पापान् दुष्कृतकारिणः ॥
देवानुकम्पया सर्वान् नयत्यात्मपरां गतिम् ॥

ब्राह्मे ब्रह्मवाक्यम्-

क्षेत्रमध्याद्यदा गङ्गा गमिष्यति सरित्पतिम् ।
तेन सा महती पुण्या पुरा रुद्र भविष्यति ॥
पुण्याचोदंमुखी गङ्गा प्राची चैव सरस्वती ।
उदङ्मुखी योजने द्वे गच्छति जाह्नवी नदी ॥
त एते विबुधाः सर्वे मया सह सबान्धवाः ।
उत्तमे वा समेष्यन्ति कपालं तत्र मोचय ॥
तस्मिन् तीर्थोत्तमे गत्वा पिण्डदानेन वै पितॄन् ।
श्राद्धेषु प्रीणयिष्यन्ति तेषां लोकोत्तमा दिवि ॥

अत्र क्षेत्रमध्यादिति वचनाद्,यद्यपि वाराणसीमध्ये गङ्गाप्रवाह इत्यापततः प्रतीयते तथापि-

वरणा चाप्यसिश्चैव द्वे नद्यौ सुरनिर्मिते ।
अन्तराले तयोः क्षेत्रं भूमावपि विशेषतः ॥

इति पूर्वलिखितवचनपर्यालोचनया असिवरणावाह्यस्य वाराणसी-क्षेत्रत्वाभावे सिद्धे क्षेत्रमध्यपदं क्षेत्रस्पर्शनमात्रपरम् । ग्राममध्ये गत इतिवत् । अथ वाराणसीप्रवेशफलविषये लिङ्गपुराणे-

ब्रह्महा योऽभिगच्छेत्तु अविमुक्तं कदाचन ।
तस्य क्षेत्रस्य माहात्म्यात् ब्रह्महत्या निवर्त्तते ॥
अविमुक्तं गता ये वै महापापकृतो नराः ।
अक्षया ह्यजराश्चैव अदेह्यश्च भवन्ति ते ॥
अज्ञानाज् ज्ञानतो वापि स्त्रिया वा पुरुषेण वा ।
यत्किञ्चिदशुभं कर्म कृतं मानुष बुद्धिना ।
अविमुक्तं प्रविष्टस्य तत्सर्वं भस्मसाद्भवेत् ॥

अथ तद्वासफलम्, तत्र लिङ्गे-

सदा यजति यज्ञेन सदा दानं प्रयच्छति ।
सदा तपस्वी भवति ह्यविमुक्ते स्थितो नरः ॥
न सा गतिः कुरुक्षेत्रे गङ्गाद्वारे न पुष्करे ।
या गतिर्विहिता पुंसामविमुक्तनिवासिनाम् ॥
सर्वात्मना तपः सत्यं प्राणिनां नात्र संशयः ।
अविमुक्ते वसेद्यस्तु मम तुल्यो भवेन्नरः ॥
अविमुक्तं न सेवन्ते मूढा ये तामसा नराः ।
विण्मूत्ररजसां मध्ये ते वसन्ति न संशयः ॥
अविमुक्ते स्थिता नित्यं पांशुभिर्वामलैरपि ।
स्पृष्ट्वा दुष्कृतकर्माणो यास्यन्ति परमां गतिम् ॥
यस्तत्र निवसेद्विप्रः प्रियतात्मा समाहितः ।
त्रैकाल्यमपि भुञ्जानो वायु भक्षः सदा भवेत् ॥

मासमेतद्वासे तु-

तत्र मासं वसेद्विप्रो यवाहारो जितेन्द्रियः ।
सम्यक् तेन व्रतं चीर्णं दिव्यं पाशुपतं महत् ॥
जन्ममृत्युभयं तीर्त्वा स याति परमां गतिम् ।
स श्रेयांसि गतिं पुण्यां तथायोगगतिं लभेत् ॥
न वियोगगतिर्लभ्या जन्मान्तरशतैरपि ।
प्राप्यते क्षेत्रमाहात्म्यात् प्रभावाच्छङ्करस्य तु ॥
एकाहारस्तु यस्तिष्ठेत् मासन्तत्र परानने ।
यावज्जीवकृतं पापं मासेनैकेन नश्यति ॥

अथ कदाचित् वाराणसीवासमारभ्य यावज्जीवमपरित्यागे तु लिङ्गे-

आदेहपतनाद्यावत् क्षेत्रं यो न विमुञ्चति ।
ब्रह्मचर्यव्रतैः सम्यक् सम्यगिष्टं मखैर्भवेत् ॥

आदेहपतनाद्यावत् क्षेत्रं यो न विमुञ्चति ।
न केवलं ब्रह्महत्या प्राकृतश्च निवर्त्तते ॥

प्राकृतसंसारबन्धः । मात्स्ये-

विघ्नैरालोड्यमानोऽपि योऽविमुक्तं न मुञ्चति ।
स मुञ्चति जरां मृत्युं जन्म चैतदशाश्वतम् ॥

ब्राह्मे- आदेहपतनादेतत्क्षेत्रं सेवन्ति मानवाः ।
ते मृता हंसयानेन दिव्यं यान्त्यकुतो भयाः ॥

दिव्यं- देवपदम् । अथ मरणफलम् ।

तत्रैव- विषयासक्तचित्तोऽपि त्यक्तभक्तिमतिर्नरः ।
इह क्षेत्रे मृतः सोऽपि संसारं न पुनर्विशेत् ॥
स्वर्गापवर्गनिमित्तमेतत्तीर्थवरं भुवि ।
यस्तत्र पञ्चतां याति मोक्षं याति न संशयः ॥
जन्मान्तरसहस्रेण युञ्जन् योगी यदाप्नुयात् ।
तमिहैव परं मोक्षं मरणादधिगच्छति ॥

इहजन्मनीत्यर्थः ।

ब्राह्मणाः क्षत्रियाः वैश्याः शूद्रा वै वर्णसङ्कराः ।
कृमिम्लेच्छाश्च ये चान्ये सङ्कीर्णाः पापयोनयः ॥
कीटाः पिपीलिकाश्चैव ये चान्ये मृगपक्षिणः ।
कालेन निधनं प्राप्ता अविमुक्ते शृणु प्रिये ॥
चन्द्रार्द्धमौलयः सर्वे ललाटाक्षाश्च वृक्षजाः ।
शिवे मम पुरे देवि जायन्ते तत्र मानवाः ॥
प्राणांस्त्यजन्ति ये तत्र प्राणिनस्तरवस्तथा ।
रुद्रत्वं ते समासाद्य मोदन्ते च मया सह ॥
अकामो वा सकामो वा अपि तिर्यग्गतोपि वा ।
अविमुक्ते त्यजन् प्राणान् मम लोके महीयते ॥

मम भक्तिपरानित्यं नान्य भक्ताश्च ये नराः ।
तस्मिन् प्राणान् परित्यज्य गच्छन्ति परमां गतिम् ॥
मन्मना मम भक्तश्च मयि सर्वार्पितक्रियः ।
यथेह मोक्षमाप्नोति अन्यत्र न तथा क्वचित् ॥
अग्निप्रवेशं ये कुर्य्युरविमुक्तेऽविचारतः ।
प्रविशन्ति सुखं ते मामपुनर्भाविनो जनाः ॥
कुर्वन्त्यनशनं ये तु मद्भक्ताः कृतनिश्चयाः ।
न तेषां पुनरावृत्तिः कल्पकोटिशतैरपि ॥
अविमुक्ते ह्यन्तकाले भक्तानामीश्वरः स्वयम् ।
बन्धुभिः प्रेर्य्यमाणानां कर्णजापं प्रयच्छति ॥

लैङ्गे- अन्तकाले मनुष्याणां छिद्यमानेषु मर्मसु ।
वायुना प्रेर्यमाणानां स्मृतिर्नैवोपजायते ॥
येऽविमुक्ते स्थितारुद्रा भक्तानां प्रीतिदायकाः ।
कर्णजातं प्रयच्छन्ति डिमिचण्डेश्वरादयः ॥

रामतापिन्यां शिवं प्रति श्रीरामवाक्यम्-
मुमूर्षो दक्षिणे कर्णे यस्य कस्यापि वा स्वयम् ।
उपदेक्ष्यसि मे मन्त्रं स मुक्तो भवति शिव ॥

कर्णजापस्तारकब्रह्मोपदेशः-

अत्र मरणस्य यद्यपि परममुक्ति सायुज्य सालोक्य सारुप्याणि फलत्वेन श्रूयन्ते तथापि शुचीनां पारमात्मभक्तानां तदपि तत्कर्मणां परमभक्तिं स्वतोऽपकृष्टानामग्निप्रवेशादिना सायुज्यं तिर्यक् प्रभृतीनामत्यन्तपापीयसां च सारुप्यम्, ततोऽप्यधमानां सालोक्यमिति द्रष्टव्यम् । केचित्तु- चतुर्विधपरिमाणायां काश्यां यथायथयोगं पीठाद्विप्रकर्षस्तथा तथा मरणफलापकर्ष इत्याहुः । नरकगमनाभावस्तु सर्वेषामेव तदुक्तं लैङ्गे-

नाविमुक्ते मृतः कश्चिन्नरकं याति किल्विषी ।
ईश्वरानुगृहीता हि सर्वे यान्ति परां गतिम् ॥
उद्देशमात्रं कथिता अविमुक्तगुणास्तव ।
समुद्रस्येव रत्नानामविमुक्तस्य विस्तरः ॥

तथा- ज्ञानविज्ञाननिष्ठानां परमानन्दमिच्छताम् ।
या गतिर्विहिता नृणां स्वर्णाले तु मृतस्य सा ॥

स्वर्णालमुपक्रम्य-

प्राणानिह नरस्त्यक्त्वा न पुनर्जायते क्वचित् ।
अनन्ता सा गतिस्तस्य योगिनामेव या स्मृता ॥
हिरण्यगर्भव्याघ्रेश्वरयोः समीपे स्वर्णालेश्वरः ॥

तथा विश्वनाथस्थाने अविमुक्तमहाश्मशानयोगपीठेति नामत्रयवाह्ये मृतस्य परममुक्तिरिति । मणिकर्णिकायां मृतस्य च परममुक्तिरिति तापनी ।

अथात्र वाराणस्यां स्नानादिफलम्

मात्स्ये-

दशानामश्वमेधानां यज्ञानां यत्फलं स्मृतम् ।
तदवाप्नोति स धर्मात्मा स्नात्वा तत्र वरानने ॥
स्वल्पमप्यत्र यो दद्यात् ब्राह्मणे वेदपारगे ।
शुभां गतिमवाप्नोति अग्निवच्चैव दीप्यते ॥
उपवासन्तु यः कृत्वा विप्रान् सन्तर्पयेन्नरः ।
स सौत्रामणियज्ञस्य फलं प्राप्नोति निश्चितम् ॥
विप्रानिति बहुवचनं कपिञ्जलन्यायात् त्रित्वपरम् ।

ब्राह्मे वाराणसीं प्रकृत्य-

तत्र दीपप्रदानेन ज्ञानवत् स्फुरतीन्द्रियम् ।
प्राप्नोति धूपदानेन स्थानं रुद्रनिषेवितम् ॥

वृषभं तरुणं सौम्यं चतुर्वत्सतरी युतम् ।
यश्चाङ्कित्वा मोचयति स याति परमां गतिम् ॥
पितृभिः सहितो मोक्षं गच्छत्यत्र न संशयः ।
अङ्कश्चक्रत्रिशूलाभ्यां दक्षिणवामपार्श्वयोः ॥

अत एव इति कर्त्तव्यतान्तरमपि न चाङ्कयित्वेति विशेषोपदेशादस्य बाधः । सर्वशाखाप्रत्ययमेकं कर्मेति न्यायादन्यासामपि वृषोत्सर्गेतिकर्त्तव्यताऽत्रान्वयात् । नापि तद्विकृतौ भूतेऽत्र गवोत्सर्गे विशेषोपदेशादन्यस्य बाधः। तेन सहास्य प्रकृतिभावाभावात् नहि तद्धर्मोऽत्रातिदिश्यते निषिध्यते वा येन तथा स्यात् किन्तु कर्मेदं स्वतन्त्रमेव विधीयते गोदानादिवत् । स याति परमां गतिमिति तु तत्स्तुत्यर्थवादः एकं वृणीतेतिवत् । यथा-

किमत्र बहुनोक्तेन.यद्दानं क्रियते नरैः ।
धर्मकर्मार्थमुद्दिश्य तदनन्तफलं लभेत् ॥
अर्च्चयेदथ मां देवि आविमुक्ते वरानने ।
तस्य धर्मं प्रवक्ष्यामि यावदाप्नोति मानवः ॥
दशसौवर्णकं पुष्पं योऽविमुक्ते प्रयच्छति ।
अग्निहोत्रफलं धूपे गन्धदाने श्रुणु प्रिये ॥
भूमिदानेन तत्तुल्यं गोप्रदानफलं स्मृतम् ।
सम्मार्जने पञ्चशतं सहस्रमनुलेपने ॥
माल्ये शतसहस्रन्तु अनन्तं गीतवादित्रे ।

एकस्मिन् पुष्पे दशसुवर्णदानजन्यं तथा धूपेऽग्निहोत्रजन्यं गन्धे भूमिदानजन्यं सम्मार्जने गोपञ्चशतीदानजन्यमनुलेपने गोसहस्रदानजन्यं मालायां गोलक्षदानजन्यं गीते वाद्ये चानन्तगोदानजन्यं फलं भवतीत्यर्थः। सहस्रमित्यत्राविशेषो सहस्रपदं गोसहस्रपरमिति कल्पतरौ तथा व्याख्यानात् पितृभिः सह मोक्षं प्राप्नोति इत्यग्रे

फलनिर्देशात् । तत्र लिङ्गार्चने-

अविमुक्ते महादेवमर्च्चयन्ति स्तुवन्ति ये ।
सर्वपापविनिर्मुक्तास्ते तिष्ठन्त्यजरामराः ॥
अविमुक्तं समासाद्य लिङ्गमर्च्चयते नरः ।
कल्पकोटिशतैश्चापि तस्य नास्ति पुनर्भवः ॥
अमरो ह्यक्षरश्चैव क्रीडेत् स भवसन्निधौ ।
ये तु ध्यानं समासाद्य युक्तात्मानः समाहिताः ॥
सन्नियम्येन्द्रियग्रामं जपन्ति शतरुद्रीयम् ।
अविमुक्ते स्थिता मर्त्याः कृतार्थास्ते द्विजोत्तमाः ॥
एकाहमुपवासं यः करिष्यति यशस्विनी ।
फलं वर्षशतस्येह लभते मत्परायणः ॥

वर्षशतस्योपोषितस्येत्यर्थः । लिङ्गे-

अतः परन्तु संवेद्यं गङ्गावरणसङ्गमम् ।
श्रवणाद्वादशीयोगे बुधवारो यदा भवेत् ॥
तदा तस्मिन्नरः स्नात्वा सन्निहत्या फलं लभेत् ।
श्राद्धं करोति यस्तत्र तस्मिन् काले यशस्विनी ॥
तारयित्वा पितॄन् सर्वान् विष्णुलोकं स गच्छति ॥

सन्निहत्या कुरुक्षेत्रस्था नदी । मात्स्ये-

वाराणसीजाह्नवीभ्यां सङ्गमे लोकविश्रुते ।
दत्त्वान्नञ्च विधानेन न स भूयोऽभिजायते ॥

असियुक्तावरणा वाराणसी । स्कान्दे-

नदी वाराणसी येयं जाह्नव्या सह सङ्गता ।
सङ्गमे देवनद्याश्च यः स्नात्वा मनुजः शुचिः ॥
अर्च्चयेत् सङ्गमेशानं तस्य जन्म भयं कुतः ।

सङ्गमश्च अनन्तकेशवतः प्राच्याम् ।

देवेश्वरस्य पूर्वेण स्वयं तिष्ठति केशवः ।
केशवस्य च पूर्वेण विश्रुत सङ्गमेश्वरः ॥

इति वाराणस्यामीशानकोणवर्णने लिङ्गपुराणात् । मात्स्ये-

वायव्ये तु दिशो भागे तस्य पीठस्य सुन्दरि ।
लिङ्गं संस्थापितं तत्र सागरेण चतुर्मुखम् ॥

पीठ-योगपीठम् ।

सागराद्वायवे भागे भद्रदोहं सरः स्मृतम् ।
गवां क्षीरेण सञ्जातं सर्वपातकनाशनम् ॥
कपिलानां सहस्रस्य सम्यग्दत्तस्य यत् फलम् ।
तत्फलं लभते मर्त्यः स्नानात्तत्र न संशयः ॥
पूर्वभाद्रपदयुक्ता पौर्णमासी यदा भवेत् ।
तद्वा पुण्यतमः कालोऽप्यश्वमेधफलप्रदः ॥

विश्वनाथायतनवायव्ये वारणापूर्वे भीष्मचण्डिकाऽस्ति । तत्र च मात्स्ये तत्प्रकरणे-

यत्र सा दृश्यते देवी भीष्मचण्डिका विश्रुता ।
वीभत्से विकृते भीमे श्मशाने वसते सदा ॥

अन्तकेश्वरपूर्वे सर्वेश्वरदक्षिणे मालातीश्वरोत्तरे कृतिवासेश्वरं लिङ्गम्। तदुक्तं लैङ्गे-

वाराणस्यां प्रमुच्यन्ते ये जनास्तत्र संस्थिताः ।
कृमीकीटाः प्रमुच्यन्ते महापातकिनश्च ये ॥
कृतिवासेश्वरं लिङ्गं ये व्रजन्ति शुभार्थिनः ।
ते रुद्रस्य शरीरान्तः प्रविष्टाश्चापुनर्भवाः ॥
अनेन च शरीरेण प्राप्ता निर्वाणमुत्तमम् ।
दशकोटिसहस्राणि तीर्थानां यत्र विश्रुतिः ॥
कृतिवासेश्वरो यत्र तत्र सर्वे व्यवस्थिताः ।

तस्मिन् लिङ्गे तु सान्निध्यं त्रिलोक्ये नात्र संशयः ॥
जन्मान्तरसहस्रेण मोक्षो लभ्येत वा न वा ।
एकेन जन्मना तत्र कृत्तिवासे तु लभ्यते ॥
पूर्वजन्मकृतं पापं तपसाऽपि विशुध्यति ।
तत्क्षणान्नश्यते पापं तस्य लिङ्गस्य दर्शनात् ॥
कृते तु त्र्यम्बकं प्रोक्तं त्रेतायां कृत्तिवाससम् ।
महेश्वरस्तु देवस्य द्वापरे नाम गीयते ॥
हस्तिपालेश्वरं नाम कलौ सिद्धैस्तु गीयते ।
कृत्तिवासेश्वरो देवो द्रष्टव्यश्च पुनः पुनः ।
यदीच्छेत्तारकं ज्ञानं शाश्वतञ्चामृतं पदम् ॥
दर्शनाद्देवदेवस्य ब्रह्महाऽपि प्रमुच्यते ।
दर्शने पूजने चैव सर्वयज्ञफलं लभेत् ॥
श्रद्धया परया देवं येऽर्च्चयन्ति सनातनम् ।
फाल्गुनस्य चतुर्दश्यां कृष्णपक्षे समाहितः ॥
पुण्यैः फलैस्तथा धूपैर्दीपैर्नैवेद्यकैस्तथा ।
क्षीरेण मधुना चैव तोयेन सह सर्पिषा ॥
तर्पयन्ति परं लिङ्गमर्चयन्ति शिवं शुभम् ।
डुडुकार-नमस्कारैर्नृत्यगीतैस्तथैव च ॥
मुखवाद्यैरनेकैश्च स्तोत्रमन्त्रैस्तथैव च ।
उपोष्य रजनीमेकां भक्त्या परमया हरम् ॥
ते यान्ति परमं स्थानं सदाशिवमनामयम् ॥
भूताह्नि चैत्रमासस्य पूजयेत् परमेश्वरम् ।
स तु विश्वेश्वरं प्राप्य क्रीडते यक्षराडिव ॥
वैशाखस्य चतुर्दश्यां योऽर्च्चयेत् प्रयतः शिवम् ।
विशाखलोकमासाद्य तस्यैवानुचरो भवेत् ॥

ज्येष्ठमासे चतुर्दश्यां योऽर्च्चयेत् श्रद्धया हरम् ।
स्वर्गलोकमवाप्नोति यावदाचन्द्रतारकम् ॥
चतुर्दश्यां शुचौ मासे योऽर्च्चयेत्तु सुरेश्वरम् ।
सूर्यस्य लोके सुमुखि क्रीडते यावदीप्सितमम् ॥
श्रावणस्य चतुर्दश्यां कामलिङ्गसमन्वितम् ।
स याति वारुणं लोकं क्रीडते चाप्सरैः सह ॥
मासि भाद्रपदे नक्तमर्च्चयित्वा तु शङ्करम् ।
पुष्पैः फलैश्च विविधैरिन्द्रस्यैव स लोकभाक् ॥
पितृपक्षे चतुर्दश्यां पूजयित्वा तथेश्वरम् ।
सम्प्राप्य पितृलोकन्तु क्रीडते पूजितस्तु तैः ॥
प्रबोधमासे देवेशमर्च्चयित्वा महेश्वरम् ।
स चन्द्रलोकमासाद्य क्रीडते यावदीप्सितम् ॥
बहुले मार्गशीर्षस्य पूजयित्वा पिनाकिनम् ।
विष्णुलोकमवाप्नोति क्रीडते कालमक्षयम् ॥
अर्च्चयित्वा तथा पुष्ये स्थातुं हृष्टेन चेतसा ।
प्राप्नोति तस्य वै स्थानं मोदते तेन वै सदा ॥
माघे समर्च्चयित्वा वै पुष्प-मूल-फलैः शुभैः ।
प्राप्नोति शिवलोकन्तु मुक्त्वा संसारसागरम् ॥
कृत्तिवासेश्वरं देवमयते तं प्रयत्नतः ।
अविमुक्ते च वस्तव्यं यदीच्छेन्मामकं पदम् ॥

कृष्णादिक्रमेण चतुर्दशीष्विमानि कर्माणि शिवरात्रिमुपक्रम्य फाल्गुनादौ कथनात् । तथा व्यासेश्वरपश्चिमे घण्टाकर्णह्रदः । तत्र लिङ्गे-

स्नानं कृत्वा ह्रदे तस्मिन् व्यासेशस्य च दर्शनात् ।
यत्र तत्र मृतो देवि वाराणस्यां मृतो भवेत् ॥

खण्डखाते नरः स्नात्वा तर्पयित्वा स्वकान् पितॄन् ।
नरकस्थांश्च ये देवि पितृलोके वसन्ति ते ॥
पिशाचत्वं गता ये वै नराः पापेन कर्मणा ।
तेषाञ्च पिण्डदानेन देहस्योद्धरणं भवेत् ॥
दर्शनात्तस्य खातस्य कृतकृत्योऽभिजायते ॥

तत्रैव ललितामुपक्रम्य-

ये च त्वां पूजयिष्यन्ति तस्मिन् स्थाने स्थिताः स्वयम् ।
तेषां त्वं विविधान्भोगान् सम्प्रदास्यसि मानसे ॥
जागरं ये प्रकुर्वन्ति तवाग्रे दीपधारिणः ।
तेषां त्वमक्षयान् लोकान् निनयिष्यसि भाविनि ॥
आलयं ये प्रकुर्वन्ति भूमिं सम्मार्जयन्ति च ।
तेषामष्टसहस्रस्य सुवर्णस्य फलं भवेत् ॥
त्वामुद्दिश्य च यो देवि ब्राह्मणं ब्राह्मणीं तथा ।
भोजयिष्यति देवेशि तस्य पुण्यफलं श्रुणु ॥
तव लोके वसेत्कल्पमिहैव भारते पुनः ।
नरो वा यदि वा नारी सर्वभोगसमन्वितः ॥
धनधान्यसमायुक्तो जायते महतां कुले ॥
सुभगौ दर्शनीयौ च रूपयौवन दर्पितौ ।
भवेतामिदृशौ देवि सर्वसौभाग्य भाजनौ ॥
मानुष्यं दुर्ल्लभं प्राप्य विद्युतसम्पातचञ्चलम् ।
येन दुष्टाऽसि सुश्रोणि तस्य जन्मभयं कुतः ॥
पृथ्वीं प्रदक्षिणीकृत्य यत् फलं लभते नरः ।
तत्फलं ललितायाश्च वाराणस्यां न संशयः ॥
माघे मासि चतुर्दश्यां तस्मिन् काले उपोषितः ।
अर्च्चयित्वा तु यो देवि जागरं तत्र कारयेत् ॥

तस्यर्द्धिमत्कुलं देवी त्रैलोक्ये याति दुर्ल्लभम् ।
नलकुवेरेश्वरं नाम सर्वसिद्धिप्रदायकम् ।
तस्यैव दक्षिणे देवि मणिकर्णेति विश्रुतम् ॥
तस्य चाग्रे महातीर्थं सर्वपातकनाशनम् ।
मणिकर्णेश्वरो देवः कुण्डमध्ये च तिष्ठति ॥
अनेनैव तु देहेन सिध्यते तस्य दर्शनम् ।
तस्य दक्षिणपार्श्वे तु गङ्गायां स्थापितं पुरा ।
गङ्गेश्वरेति नामानं सुरलोकप्रदायकम् ॥
अन्यदायतनं वक्ष्ये वाराणस्यां सुरेश्वरि ।
यत्र वै देवदेवस्य रूचिरस्थानमीप्सितम् ॥
नीयमानं पुरा देवि तल्लिङ्गं शशिमौलिनः ।
राक्षसैरन्तरीक्षस्थैर्व्रजमानैस्तु सत्वरम् ॥
अस्मिन् देशे यदायातास्तदा देवेन चिन्तितम् ।
अविमुक्तेन मोक्षस्तु कथं मे सम्भविष्यति ॥
इदमर्थन्तु देवेशो यावच्चिन्तयते प्रभुः ।
तावत् कुक्कुटशब्दस्तु तस्मिन्देशे समुत्थितः ॥
शब्दं श्रुत्वा तु तं देवि राक्षसास्तत्रचेतसः ।
लिङ्गमुत्सृज्य भीतास्ते प्रभातसमये गताः ॥
गतैस्तु राक्षसैर्देवि लिङ्गं तत्रैव तं शिवः ।
स्थाने तु रुचिरे शुभे देवदेवः स्वयं प्रभुः ॥
अविमुक्ते तत्र मध्ये अविमुक्ततरं स्मृतम् ॥
तदा विमुक्त हि सुरैर्हरस्य नाम स्मृतं पुण्यतमा विमुक्तम् ।
मोक्षप्रदं स्थावरजङ्गमानां ये प्राणिनः पञ्चतां सम्प्रयान्ति ॥
कुक्कुटाश्चापि देवेश तस्मिन् स्थाने स्थिताः सदा ।
अद्यापि तत्र हन्यन्ते पूज्यमानाः शुभार्थिभिः ॥

अविमुक्तं सदा देवि चेच्छयादक्षया नरः ।
न तस्य पुनरावृत्तिः कल्पकोटि शतैरपि ॥

दक्षया दक्षिणया दक्षिणत आरभ्य अविमुक्तस्थानप्रवेशरूपेति यावत्।

देवस्य दक्षिणे भागे वापि तिष्ठति शोभना ।
तस्यास्तीर्थोदकं पीत्वा पुनरावृत्तिर्न विद्यते ॥
परेतमात्रेण तेनैव उदकेन सुरेश्वरी ।
त्रीणि लिङ्गानि वर्त्तन्ते हृदये पुरुषस्य तु ॥
यैस्तु तत्र जलं पीतं कृतार्थास्ते हि मानवाः ।
तेषान्तु तारकं ज्ञानमुत्पत्स्यति न संशयः ॥
वापीजलेन च स्नात्वा दृष्ट्वा च दण्डनायकम् ।
अविमुक्तं ततो दृष्ट्वा कैवल्यं लभते क्षणात् ॥
तत्र सन्ध्यामुपासित्वा ब्राह्मणं सकृदेव तु ।
कृतसन्ध्योऽथ विप्रः स्यात् पञ्च षट् च शतं समाः ॥
पुरीं वाराणसीं तान्तु श्मशानञ्चाविमुक्तकम् ।
अविमुक्तेश्वरं चैव दृष्ट्वा गणपतिर्भवेत् ॥
अविमुक्तेश्वरं लिङ्गं सम्यक् दृष्ट्वा तु मानवः
सद्यः पापविनिर्मुक्तः पशुपाशैर्विमुच्यते ॥
अविमुक्तक्षेत्रस्यैव श्मशानमिति संज्ञान्तरम् ।

लैङ्गे- अविमुक्तस्य चाग्रे तु लिङ्गपश्चान्मुखं स्मृतम् ।
प्रीतिकेश्वरनामानं प्रीतिं चेच्छति शाश्वतीम् ॥
अविमुक्तस्योत्तरेण लिङ्गं पश्चान्मुखं स्मृतम् ।
अविमुक्तं ततो देवि नाम्ना वै लक्षणेश्वरः ॥
तेन दृष्टेन देवेशि ज्ञानवान् जायते नरः ।
तस्य चोत्तरतो देवि लिङ्गं यद्वै चतुर्मुखम् ॥
चतुर्थेश्वरनामानं पापानां भयमोचनम् ॥

स्कान्दे- क्षेत्रं वाराणसी पुण्या मुक्तिदातु भविष्यति ।
अविमुक्तेश्वरं मा वै योऽत्र द्रक्षति मानवः ॥
गणपत्ये गतिस्तस्य यत्र तत्र स्थितस्य हि ।
प्राणानिह च संन्यस्य प्राप्यते मुक्तरुत्तमा ॥इति ।

अविमुक्तश्मशानोभयसंज्ञके क्षेत्रे शिवस्थापितम् । अविमुक्तेश्वरं लिङ्गं विश्वनाथनाम्ना लोकप्रसिद्धम् । तदेव च कुक्कुटमण्डपस्थानं तत्र च दक्षिणद्वारेण प्रवेशेऽप्यपुनरावृत्तिफलम् । तस्य तु दक्षिणे वापी विज्ञानप्रजननत्वाद्विज्ञानवरपीत्वेन प्रसिद्धा तस्यास्तु जलपानादुद्धृतये लिङ्गत्रयोदयः तारकज्ञानमपुनरावृत्तिश्च भवति । वाराणसीमविमुक्तनामकश्च विश्वनाथगृहक्षेत्रं विश्वनाथं च दृष्ट्वा गणपतिर्भवति ।

एतत् क्षेत्रस्य प्रथमावरणे प्राच्यां प्रीतिकेश्वरनामानं पश्चिमाभिमुखं लिङ्गमुत्तरस्यां पश्चिमाभिमुखं लक्षणेश्वरनामकं लिङ्गं वायव्ये मगधेश्वर दक्षिणस्यां विज्ञानवापी तद्दक्षिणे कामेश्वरं लिङ्गं एतदभ्यन्तरेऽविमुक्ततरे क्षेत्रे मृतस्य परं मुक्तिर्भवति ।

तथा द्वितीयावरणे प्राच्यां मणिकर्णिकेश्वरः, उत्तरस्यां चतुर्थेश्वरः, दक्षिणस्यां गङ्गेश्वरः । तथा-

सप्तकोट्यस्तु लिङ्गानि अस्मिन् स्थाने स्थितानि हि ।
तेषां दर्शनमात्रेण यज्ञानां फलमाप्नुयात् ॥
एतानि सिद्धलिङ्गानि कूपाः पुण्यास्तथा ह्रदाः ।
वाप्यो नद्योऽथ कुण्डानि तथा ते परिकीर्त्तिताः ॥
एतेषु चैव यः स्नानं करिष्यति समाहितः ।
लिङ्गानि स्पर्शयित्वा च संसारे न विशेत् पुनः ॥
पृथिव्यां यानि तीर्थानि अन्तरीक्षे च यानि च ।
तेषां मध्ये च ये श्रेष्ठा मया ते कीर्त्तिताः शुभाः ॥

तीर्थयात्रा वरारोहे कथिता पापनाशिनी ।
येन चैषा कृता दृष्टा सोऽपि वै मुक्तिभाग् भवेत् ॥
अविमुक्तश्च सुश्रेणि मया मध्यमकं शुभम् ।
तत्र तु कण्टकं नाम मृत्युकालेऽमृतप्रदम् ॥
अतः परं प्रवक्ष्यामि यात्राकालांस्तु सर्वगे ।
चैत्रमासे च देवैस्तु यात्रेयं विहिता शुभे ॥
तस्यैव कामकुण्डे तु स्नानपूजनतत्परैः ।
ज्येष्ठमासे तु सिद्धैस्तु यात्रेयश्च कृता पुरा ॥
रुद्रावासस्य कुण्डे तु स्नानपूजनतत्परैः ।
विद्याधरैस्तु यात्रेऽयं श्रावणे मासि तत्परैः ॥
लक्ष्मीकुण्डस्य पार्श्वे तु स्नानपूजनतत्परैः ।
पितृभिश्चापि यात्रेयमाश्विने मासि तत्परैः ॥
मार्कण्डेयह्रदस्थैश्च स्नापूजनतत्परैः ।
कृता यक्षैस्तु यात्रेयं मासि मार्गशिरे शुभा ॥
कपालमोचनस्थैस्तु स्नानपूजनतत्परैः ।
गुह्यकैश्चैव यात्रेयं पौषेमासि वरानने ॥
कालेश्वरस्य कुण्डस्थैः स्नानपूजनतत्परैः ।
पन्नगैश्चैव यात्रेयं माघे मासि तु तत्परैः ॥
कोटितीर्थे तु संस्थैश्च स्नानपूजनतत्परैः ।
पिशाचैस्तु यदा तस्मिन् फाल्गुनस्य चतुर्दशी ॥
तेन सा प्रोच्यते देवी पिशाची नाम विश्रुता ।
अतः परं प्रवक्ष्यामि यात्रायां निष्कृतिं पराम् ॥
उदकुम्भास्तु दातव्या मिष्टान्नेन समन्विताः ।
तेन देवि तदा प्राप्तं पूर्वोक्तं फलमेव तु ॥
अतः परं प्रवक्ष्यामि यात्रायाश्च वरानने ।

शुक्लपक्षे चतुर्दश्यां भवकान्ता महाफला ॥
तत्र गौरी तु द्रष्टव्या तां शृणुष्व वरानने ।
स्नानं कृत्वा तु गन्तव्यं गोप्रेक्षे तु यशस्विनि ॥
तस्मिन्नहनि सा देवी अर्च्चितव्या प्रयत्नतः ।
तस्मात्स्थानात्तु गन्तव्यमविमुक्तस्य चोत्तरे ॥
तत्र देवी सदा गौरी पूजितव्या प्रयत्नतः ।
अन्या चापि परा प्रोक्ता सम्बर्त्ता नमिता शुभा ॥
द्रष्टव्या चैव सा देवि सर्वकामफलप्रदा ।
सर्वान् कामानवाप्नोति यदि ध्यायेत मानवः ॥
ततस्तु भोजयन् विप्रान् मम भक्तान् शुभव्रतान् ।
वासैः सदक्षिणैश्चैव यथार्हमतिपुष्कलैः ॥
पञ्चगौरीन्तु यः कृत्वा भक्त्या देवी समाहितः ।
सर्वांश्चैव रसान् गन्धान् गौरीमुद्दिश्य ब्राह्मणे ॥
उत्तमं श्रेयमाप्नोति सौभाग्येन समन्वितः ।

सर्वरसो गन्धर्वशास्त्रोक्तः ब्राह्मणेभ्यो दद्यादिति शेषः । तथा तत्रैव-

विनायकान् प्रवक्ष्यामि अस्य क्षेत्रस्य विघ्नदान् ।
दोण्डिन्तु प्रथमं दृष्ट्वा तथा किल विनायकम् ॥
दिव्यं विनायकश्चैति गोप्रेक्षं हस्तिदन्तिनम् ।
विनायकं तथैवान्यं सिन्दूर्य्यं नाम विश्रुतम् ॥
चतुर्थ्यां देवि द्रष्टव्यामेवं पञ्च विनायकाः ।
लड्डुकाश्च प्रदातव्या एतानुद्दिश्य ब्राह्मणे ॥
एतेन चैव धर्मेण सिद्धिमान् जायते नरः ।
अतः परं प्रवक्ष्यामि चण्डिकाः क्षेत्ररक्षिकाः ॥
दक्षिणे रक्षते दुर्गा नैऋते चोत्तरेश्वरी ।
अङ्गारेशी पश्चिमे तु वायव्ये भद्रकालिका ॥

उत्तरे भीमचण्डा च महामत्तेशयस्तथा ।
ऊर्ध्वकेशसमायुक्ता शङ्खसी पूर्वतः स्मृताः ॥
अधः केशी तथाग्नेय्यां चित्रघण्टा तु मध्यतः ।
एतास्तु चण्डिकादेवीर्या वै द्रक्ष्यति मानवः ॥
तस्य तुष्टाश्च ताः सर्वाः क्षेत्रं रक्षन्ति तत्पराः ।
विघ्नं कुर्वन्ति सततं पापानां देवी सर्वदा ॥
तस्मात् देवि सदा पूज्याश्चण्डिकाः सविनायकाः ।
अन्यच्च ते प्रवक्ष्यामि तस्मिन् क्षेत्रे सुरेश्वरी ॥
तिस्रो नद्यस्तु तत्रस्था वहन्ति च शुभोदकाः ।
तासां दर्शनमात्रेण विप्रहत्या निवर्त्तते ॥
एकाऽपि तत्र त्रिस्रोता मन्दाकिनी तथा परा ।
मत्स्योदरी तृतीया च एतास्तिस्रस्तु पुण्यदाः ॥
मन्दाकिनी तथा पुण्या मध्यमेश्वरसंस्थिता ।
पितामहस्रोतिका च अविमुक्ते तु पुण्यदा ॥
मत्स्योदरी तु ॐकारे पुण्यदा सर्वदैव हि ।
तस्मिन् स्थाने यदा गङ्गा आगमिष्यति भाविनि ॥
तदा पुण्यतमः कालो देवानामपि दुर्ल्लभः ॥
वारणसिक्तसलिले जाह्नवीजलविप्लुते ।
तत्र नादेश्वरे पुण्ये स्नातः किमनुशोचति ॥
तस्मिन् काले च तत्रैव स्नानं देवि कृतं मया ।
तेन हस्ततलाद्देवी कपालपातनं क्षणात् ॥
कपालमोचनं नाम तत्रैव सुमहत्सरः ।
पावनं सर्वपापानां पुण्यदं पुण्यदेहिनाम् ॥
मत्स्योदराजले गङ्गा ॐकारेश्वरसन्निधौ ।
तदा तस्मिन् जले स्नात्वा दृष्ट्वा चोंकारमीश्वरम् ॥

शोकं जरां मृत्युक्लेशं न तेन संपृशेन् नरः ।
तस्मिँस्तु यः शिवः साक्षादोंकारेश्वरसंज्ञितः ॥
एतद् ह्रदस्य नामान्तं स्नेहात्तव वरानने ।
अकारश्च उकारश्च मकारश्च प्रकीर्त्तितम् ॥
अकारस्तत्र विज्ञेयो विष्णुलोकगतिप्रदः ।
तस्य दक्षिणपार्श्वे तु उकारः परिकीर्त्तितः ॥
तत्र सिद्धिं परां प्राप्तो देवाचार्यो बृहस्पतिः ।
उकारं तत्र विज्ञेयं ब्रह्मणाः पदमव्ययम् ॥
तयोस्तथोत्तरे भागे मकारं विन्दुसंज्ञितम् ।
तस्मिन् लिङ्गे तु संसिद्धः कपिलर्षिमहामुनिः ॥
तस्मात्त्वमपि गाङ्गेय मनः स्थैर्यं यदीच्छसि ।
लिङ्गस्याराधने यत्नं कुरुष्व नियतव्रतः ॥
निर्ममो निरहंकारः पदमाप्नोति शाश्वतम् ।
वाराणसीमभ्युपेत्य पश्चायत्तनमुत्तमम् ।
आराध्यमानो देवेशं तस्मिन् स्थाने स्थितः सदा ॥

गाङ्गेयः स्कन्दः प्रक्रमात् । स्कन्दपुराणे-

ततोऽहमास्थितो देवी स्थानेऽस्मिन् स्वयमेव हि ।
गोप्रेक्षक इति ख्यातः संस्तुतः सर्वदैवतैः ॥
गोप्रेक्षेश्वरमागत्य दृष्ट्वाभ्यर्च्च्य च मानवः ।
न दुर्गतिमवाप्नोति कल्मषैश्च विमुच्यते ॥
ततस्ता दह्यमानस्तु प्रसवैः सुरभीरपि ।
ह्रदेऽस्मिन् पितुरभ्येत्य शान्तास्तोयं पपुस्तदा ॥
कपिलाह्रद इत्येवं प्रभृति कथ्यते ततः ।
अत्रापि स्वयमेवाहं वृषध्वज इति स्मृतः ॥
सान्निध्यं भवने देवि सदा मे दृशतां स्थितम् ।

कपिलाह्रदतीर्थेऽस्मिन् स्नात्वा संयतमानसः ॥
वृषध्वजमिमं दृष्ट्वा सर्वयज्ञफलं लभेत् ।
स्वर्लोकतां मृतश्चापि अर्च्चयित्वा तु मामिह ॥
लभते देहभेदेन गणत्वञ्चातिदुर्लभम् ।
अस्मिन् पुण्यप्रदेशे तु गावो वै ब्राह्मण स्वयम् ॥
शान्त्यर्थं सर्वलोकानां सर्वदुर्गा यथा सुखम् ।
भद्रदोहं सरस्तत्तु पुण्यापापाहरं शुभम् ॥
शिरोभूत्वाहमत्रस्तः स्वर्गो मद्दर्शनाद् भवेत् ।
अत्राहमानीय विप्रान् स्थापितः परमेष्ठिना ॥
ब्रह्मणश्चापि संगृह्य विष्णुना स्थापितः पुनः ।
पुनश्चापि ततो ब्रह्मा स्वर्लोकेश्वरसंज्ञकम् ॥
स्थापयामास मे लिङ्गं स्वर्नालेश्वरनामकम् ।
दृष्टैव तत्र देवेशं मम लोके महीयते ॥
प्राणानिह नरस्त्यक्त्वा न पुनर्जायते क्वचित् ।
अनन्ता सा गतिस्तस्य योगिनामेव सा स्मृता ॥
अस्मिन्नेव महादेशे दैत्यो दैवतकण्टकः ।
व्याघ्ररूपं समास्थाय निहतो दर्पितो बलिः ॥
व्याघ्रेश्वर इति ख्यातो पुनरत्राहमास्थितः ।
न पुनर्दुर्गतिं यान्ति दृष्ट्वेनममरेश्वरम् ॥
हिमवत् स्थापितं लिङ्गं शैलेश्वरमिति श्रुतम् ।
दृष्ट्वैतन्मनुजो देवि न दुर्गतिमवाप्नुयात् ॥
उत्पन्नो विदलश्चैव यो दैत्यो ब्रह्मणो वरात् ।
दृप्तौ लिङ्गश्च तद्दृष्ट्वा त्वयैव निहतौ शुभौ ॥
सावज्ञं कण्टकेनात्र तस्येदं चिह्नमास्थितम् ।
दृष्ट्वैव मम लिङ्गन्तु ज्येष्ठस्थान समाश्रितम् ॥

न शोचति पुनर्मर्त्यः सिद्धो जन्मनि जन्मनि ।
समन्ताच्चैव देवैर्मे लिङ्गानि स्थापितानीह ॥
दृष्ट्वा च नियतं मर्त्यो देहभेदे गणो भवेत् ।
नदी वाराणसी चेयं पुण्या पातकनाशिनीम् ॥
क्षेत्रमेतदलङ्कृत्य जाह्नव्या सह सङ्गता ।
स्थापितं सङ्गमे तस्मिन् ब्रह्मणा लिङ्गमुत्तमम् ॥
सङ्गमेश्वरमित्येवं ख्यातं देवि प्रदृश्यताम् ।
सङ्गमे देवनद्याश्च यः स्नात्वा मनुजो भुविः ॥
अर्च्चयेत् सङ्गमेशानं तस्य जन्मभयं कुतः ।
स्थापितं लिङ्गमेतच्च शुक्रेण तव सूनुना ॥
नाम्ना शुक्रेश्वरं लिङ्गं सर्वसिद्धं सुरार्च्चितम् ।
दृष्ट्वैव मानवः सद्यो मुक्तः स्यात् सर्वपातकैः ॥
मृतश्च न पुनर्जन्म संसारे तु लभेन्नरः ।
जम्बूकोऽसौ हतो दैत्यो मयाऽतो जम्बूकेश्वरः ॥
जम्बुकेशं तत्र दृष्ट्वा सर्वान् कामानवाप्नुयात् ।
देवैः शक्रपुरगैश्च एतानि स्थापितानीह ॥
यस्माल्लिङ्गानि पुण्यानि सर्वकामप्रदानि च ।
एवमेतानि पुण्यानि मन्निवासानि पार्वति ॥
कथितानि तव क्षेत्रे वाक्यं गुह्यतरं शृणु ।
महालयालयस्थं मां केदारे च व्यवस्थितम् ॥
गणत्वं लभते दृष्ट्वा क्षेत्रेऽस्मिन् हरवल्लभे ।
गाणपत्यपदं तस्मादतः सा मुक्तिरुत्तमा ॥
अविमुक्तेश्वरं लिङ्गं मम दृष्ट्वेह मानवः ।
सद्यः पापविनिर्मुक्तः पशुपाशैर्विमुच्यते ॥
शैलेशं सङ्गमेशश्च स्वर्नीलं मध्यमे पुरे ।

हिरण्यगर्भमिशानं गोप्रेक्षश्च वृषध्वजम् ॥
उपशान्तिशिवश्चैव ज्येष्ठस्थान निवासिनम् ।
शुक्रेश्वरश्च विख्यातं व्याघ्रेशं जम्बूकेश्वरम् ॥
दृष्ट्वा न जायते मर्त्यः संसारे दुःखसागरे ।

इति कल्पतरौ वाराणसीमाहात्म्यम् ।

अथ माहात्म्यं काशीखण्डे-

अविमुक्तेशमात्रं तत्तदप्यक्षयतां व्रजेत् ।
अविमुक्तं गतः कश्चिन्नरकं नैति किल्विषी ॥
अविमुक्ते कृतं पापं किन्तु वज्रं भवेद्दृढम् ॥

भविष्ये- त्रैलोक्ये यानि तीर्थानि सत् क्षेत्राणि च कृत्स्नशः ।
सेवते सततं गङ्गां काश्यामुत्तरवाहिनीम् ॥
दशाश्वमेधे यः स्नात्वा दृष्ट्वा विश्वेश्वरं शिवम् ।
सद्यः पापैर्विमुक्तोऽसौ मुच्यते भवबन्धनात् ॥
गङ्गा हि सर्वतः पुण्या ब्रह्महत्याऽपहारिणी ।
वाराणस्यां विशेषेण यत्र चोत्तरवाहिनी ॥
वाराणायां तथाऽस्यांश्च जाह्नव्याः सङ्गमे नरः ।
स्नानमात्रेण सर्वेभ्यः पातकेभ्यो विमुच्यते ॥
काश्यामुत्तरवाहिन्यां गङ्गायां कार्त्तिके तथा ।
स्नात्वा विमुच्यते माघे महापापातिपातकैः ॥
सर्वलोकेषु तीर्थानि यानि ख्यातानि तानि च ।
सर्वाण्येतान्यशेषेण वाराणस्यान्तु जाह्नवीम् ॥
उत्तराभिमुखं पुण्यामागच्छन्ति दिने दिने ।
नित्यं पर्वसु सर्वेषु पुण्यैरायतनैः सह ॥
महापातकदोषादिदुष्टानां स्पर्शसम्भवम् ।
व्यपोहितं स्वपापश्च जनः पापापनुत्तये ॥

जन्मान्तरशतेनापि सत्कर्मनिरतस्य च ।
अन्यत्र ऋषिभिश्चापि मोक्षो लभ्येत वा न वा ॥
एकेन जन्मना चात्र गङ्गायां मरणेन च ।
मोक्षस्तु प्राप्यते काश्यां नरेणावियतात्मना ॥
तदारभ्य मुने काश्यां ख्यातो धर्मनदीह्रदः ॥

काञ्ची-

सप्तपुण्यक्षेत्रेषु काञ्चीपुरस्य नाम अन्यतमम् । स्कन्दपुराणानुसार-मस्यापि क्षेत्रस्य वर्णनं दृष्टिगोचरीमूतं भवति । यथा-

काशी काञ्ची च मायाख्या त्वयोध्याद्वारवत्यपि।
मथुरावन्तिका चैताः सप्तपुण्योऽत्र मोक्षदा ॥
(स्कन्द.काशीखण्ड ६/६८)

अत एव जम्बुद्वीपेऽस्मिन् भारतवर्षे परिगणितासु सप्तनगरीषु काञ्चीपुण्यक्षेत्रमध्ये अन्यतमा भवति । इयं च काञ्ची दक्षिणभारतस्य प्राचीननगरीषु मुख्या । यदि चीन् परिव्राजकेन हुएन्सां महोदयेन उल्लिखिता या जंनश्रुतिः तस्यानुसारं गौतमबुद्धः काञ्चीपुरं प्रति आजगाम। तत्र च अशोकमहाराजेन स्तुपं निर्मितम् । तस्मिन् कालेऽपि अस्याः नगर्याः महात्म्यमक्षुर्णमासीत् । तस्मिन् काञ्चिपुरे बहुनि देवमन्दिराणि सुशोभितानि आसन् । महाभाष्येऽपि काञ्चिपुरतः प्रयोगो दृश्यते । अनेकेष्वभिलेखेषु काञ्चीपुरस्येतिहासः प्राप्यते । समुद्रगुप्तस्य अभिलेखात् विज्ञायते काञ्चीमहाराजः विष्णुगुप्तः समुद्रगुप्तेन पराजितः। मणिमेखलादिषु ग्रन्थेषु शिलालेखादिषु च नगरस्यास्य माहात्म्यं प्राप्यते । पुराणेष्वपि काञ्चीपुरस्य वर्णनं प्राप्यते। ब्रह्माण्डपुराणे प्रतिपादितं विद्यते यत् भगवतः परमेश्वरस्य शिवस्य काशीकाञ्ची द्वे नगरे द्वे नेत्रे आस्ताम् । बार्हस्पत्यसूत्रेऽपि काञ्चीपुरी

एकं विख्यातं शाक्तक्षेत्रमासीत् । देवीभागवते प्रतिपादितं विद्यते यत् भगवत्याः जगदम्बिकायाः अन्नपूर्णायाः पीठं भवति काञ्चीपुरम्। वामनपुराणेऽपि अस्याः नगर्याः प्रशस्तिगानं वर्त्तते । ब्रह्माण्ड-पुराणानुसारं भगवतः शिवस्य क्षेत्रमिति प्रतिपादितं यथा-

नेत्रद्वयं महेशस्य काशीकाञ्चीपुरद्वयम् ।
विख्यातं वैष्णवक्षेत्रं शिवसान्निध्यकारकम् ॥

(ब्रह्मकाण्ड ४/१९/१५)

वामनपुराणानुसारं पद्यमिदं समालोचकानां दृष्टिगोचरीभवति यत्-

पुष्पेषु जाती नागरेषु काञ्ची, नारीषु रम्भाश्रमीणां गृहस्थः ।
कुशस्थली श्रेष्ठतमापुरेषु देशेषु सर्वेषु च मध्यदेशः ॥

(वामन १२/५०)

इयं काञ्चीपुरी विभिन्नेषु तीर्थेषु मन्दिरेषु च परिपूर्णा अद्यापि विराजमाना सुशोभना चास्ति । सर्वेष्वपि मन्दिरेषु पल्लवराजसिंहेन कैलासनाथशिवमन्दिरं वैकुण्ठपेरुमलविष्णुमन्दिरं सुविख्यातं विद्यते। भगवतः कैलासनाथस्य मन्दिरे सम्भवतः सहस्रसंख्यकाः स्तम्भाः विद्यन्ते। अस्मिन्नपि काञ्चीपुरे एकं सुप्राचीनं जैनमन्दिरमपि विद्यते। अतः क्षेत्रमिदं तीर्थदृष्ट्या अतीव पुण्यप्रदमिति नास्ति कश्चन विसंवादः। काञ्चीपुरं प्रति प्रत्येकस्मिन् वर्षे बहवः आस्तिकाः जनाः देवदर्शनार्थं गत्वा तत्र च देवपूजनं, दानं, ब्राह्मणभोजनं च कारयित्वा तीर्थफलं लभन्ते ।

अवन्तिका-

इयमपि पुरी पुराणप्रसिद्धा पुण्यक्षेत्ररूपेण च नितरां परिचर्चिता विद्यते। भारतस्य द्वादशज्योतिर्लिङ्गेषु अन्यतमस्य महाकालेश्वज्योति-र्लिङ्गस्य पीठमिदं भवति । अस्यामपि पुर्य्यां भगवतः परमपावनस्य नन्दनन्दस्य श्रीकृष्णस्य गुरोः सान्दिपनेः आश्रमः विद्यते । तस्मादपि

कारणात् भगवतः श्रीकृष्णस्य गुरुकुलत्वात् क्षेत्रमिदं सुप्रसिद्धश्चास्ति। अवन्तीपुर्याः राजधानी उज्जयिनी आसीत् । अस्मिन् विषये पाणिनिना वर्णनं कृतम् । रघुवंशे तथा मेघदूते तथा च वायुपुराणे मत्स्यपुराणे ब्रह्माण्डपुराणे ब्रह्मपुराणे अग्निपुराणे नारदीयपुराणे च क्षेत्रस्यास्य विषये उल्लेखः प्राप्यते । अस्मिन्नेव क्षेत्रे भारतस्य सुप्रसिद्धा यात्रा कुम्भमेला नाम्ना वर्षत्रय व्यवधानेन अनुष्ठिता भवति । अत्र मेलायां बहवः जनाः धर्मकांक्षिणः समवेताः भवन्ति । अत्र आगत्य जनाः महाकालस्य ज्योतिर्लिङ्गस्य दर्शनं कृत्वा सान्दिपनि-आश्रमस्य दर्शनं च कृत्वा आत्मानं पावयन्ति । अपरमपि पुण्यतोया सिप्रानदी प्रवहति । यस्यां नद्यां स्नानादिकञ्च विधाय तर्पणञ्च कृत्वा जनाः पितृपुरुषान् तर्पयन्ति। अत एव सप्तपुण्यतमेषु क्षेत्रेषु क्षेत्रस्यास्य महती प्रतिष्ठा सुतरां राजते । सिप्रानदीविषये वाल्मीकिना रामायणे उल्लेखो कृतः कालिदासेनाऽपि मेघदूते यक्षमुखेन मेघं प्रति कथनावसरे पूर्वमेघे उल्लेखो कृतः ।

द्वारका-

अस्याः नगर्याः नामस्मरणमात्रेण आस्तिकानां जनानां मनसि भक्तिभावना नितरां जागर्ति । इयमपि नगरी सप्ततीर्थक्षेत्रेषु मुख्यभूता भवति। यद्यपि वैदिकसाहित्ये क्षेत्रस्यास्य विषये न कश्चन उल्लेखः प्राप्यते तथापि महाभारते पुराणेषु च बहुविस्तृतं वर्णनं समालोचकानां दृक्गोचरीभूतं भवत्येव । समालोचकानामनुशीलनेन द्वारकाद्वय-मस्तीति प्रतीयते । यस्याः द्वारकायाः अधिका काचित्प्रचीनता अन्या च किञ्चिन्मात्रमर्वाचीना भवति। प्राचीना द्वारका कोडिनरपार्श्वे आसीत्। इयं नद्याः समुद्रस्य च तटभूमावेव आसीत् । अत्रापि मन्दिरस्य भग्नावशेषोऽपि दृश्यते । क्षत्रमिदमाद्यद्वारका इति जनाः कथयन्ति । द्वितीया द्वरका भवति ओखामण्डलान्तर्गता द्वारका।

पुराणानां वर्णनानुसारं भगवता श्रीकृष्णेन स्वप्रजानां रक्षणार्थमियं नगरी प्रतिष्ठापिता । श्रीकृष्णस्य शत्रुः जरासन्धः आक्रमणं कृतवान्। तस्याक्रमणेन श्रीकृष्णः विवशोभूत्वा एकस्यां रात्र्यामेव द्वारिकायाः निर्माणं कृतवान् । रात्रौ शयनावस्थायां सर्वेऽपि जनाः तेषां द्रव्याणि च तत्र सम्प्राप्ताः श्रीकृष्णेन । यदा प्रातः सर्वे जागरिताः भवन्ति तदा नूतनां द्वरकापुरीमवलोकयन्ति । अस्मिन्नेवविषये श्रीमद्भागवते वराहे ब्रह्मपुराणे विष्णुपुराणे च विस्तृतं वर्णनं प्राप्यते । ब्रह्मपुराणानुसारं प्राप्यते यत्- श्रीकृष्णेन समुद्रं प्रति द्वादशयोजनं क्षेत्रं याचितम् । तत्रैव क्षेत्रे राजभवनमुद्यानं प्राकारं निर्मितम् । तस्मिन्नेव अभ्यन्तरे सर्वेऽपि मथुरावासिनः निवासं कृतवन्तः । तस्यामेव नगर्यां भगवान् श्रीकृष्णः शताधिकवर्षं यावत् राज्यशासनं चकार । यदा भगवतः श्रीकृष्णस्य देहावसानं सञ्जातं तदा इयं राजधानी जलमग्ना सञ्जाता। अस्मिन्नेव विषये भारतीयदूरदर्शनेऽपि सुरभिकार्यक्रममध्ये वैज्ञानिकपद्धत्या समुद्रजलस्याभ्यन्तरे अस्याः नगर्याः भग्नावशेषः उद्घाटितः प्रदर्शितश्च।

भविष्यवाण्यानुसारं भगवतः श्रीकृष्णस्य निवासस्थलं विहाय अन्यत्सर्वमपि जलमग्नं सञ्जातम् । अस्मिन्नेव प्रकरणे पद्मपुराणे मत्स्यपुराणे ब्रह्मपराणे विष्णुपुराणे भविष्यपुराणे च उल्लेखो दृश्यते । हरिवंशेऽपि द्वरकानिर्माणस्य कथाः प्राप्यन्ते । जैनग्रन्थेष्वपि द्वारकायाः रैवतक-शिखरस्य विषये उल्लेखः समागच्छति । बौद्धजातकग्रन्थेष्वपि वर्णनं प्राप्यते । स्कन्दपुराणस्य प्रभासखण्डे चतुश्चत्वारिंशदध्यायेषु प्रायशः द्विसहस्रश्लोकेषु द्वारकाप्रकरणं विद्यते । यत्र उल्लेखोऽस्ति यत्- तीर्थाभिलाषी यदा कश्चिज्जनः काशीं कुरुक्षेत्रं वा गच्छति तत्र गमनेन यत्पुण्यं भवति तत्पुण्यं द्वारकायां निमिषमात्रेण प्राप्तं भवति । द्वारकायां तीर्थयात्रायां जनः मुक्तिं प्राप्नोति । अत्र द्वारकां प्रति यदा

कश्चित् तीर्थयात्री समागच्छति तदा देवदर्शनार्थं एतादृशः क्रमः स्कन्दपुराणे प्राप्यते । सर्वप्रथमस्तु गणेशस्य ततः बलरामस्य ततःपरं भगवतः श्रीकृष्णस्य तदनन्तरं भगवत्या दर्शनमनन्तरं चक्रतीर्थं ततः द्वारकागङ्गा ततः शङ्खोद्धारं ततः गोमतीस्नानं करोति । काशीखण्डे स्कन्दपुराणे प्राप्यते यत् अस्मिन् क्षेत्रे सर्वेषां वर्णानां देवदर्शनाय अधिकारो विद्यते। तदर्थं सर्वेषां जनानां क्षेत्रमिदं द्वारमिति कृत्वा इयं द्वारका भवति। द्वारकामाहात्म्ये एतत् प्रतिपादितं विद्यते यत् जीवानां अस्थिष्वपि चक्रचिह्नं मनुष्यानां हस्तेषु शङ्खचक्रचिह्नमपि प्राप्यते । तदर्थमेव कथितमस्ति मथुरा काशी अवन्तिदर्शनं तु सरलं भवति किन्तु अयोध्या, माया, द्वारकादर्शनन्तु कलियुगे अतीव कठिनं भवति । यश्च द्वारकादर्शनं करोति तस्य मोक्षप्राप्तिर्भवति इति अस्याः नगर्याः नामकरणं द्वारका इति सञ्जातम् ।

कुरुक्षेत्रम्-

पुण्यक्षेत्रेषु कुरुक्षेत्रमन्यतमम् । अस्माभिः नित्यकर्मप्रसङ्गे क्षेत्रस्यास्योच्चारणं प्रत्यहं क्रियते । तद्वचनं यथा-

गङ्गे च यमुने चैव गोदावरिसरस्वती ।
नर्मदे सिन्धु कावेरी जलेऽस्मिन् सन्निधिं कुरु ॥
कुरुक्षेत्र गया गङ्गा प्रभासे दुर्गमे तथा ।
संग्रामे सर्वकार्येऽस्मिन् विघ्नस्तस्य न जायते ॥

क्षेत्रस्यास्य विषये अथर्ववेदे शतपथब्राह्मणे तैतरीयब्राह्मणे मैत्रायणीसंहितायामुल्लेखो विद्यते । ऋग्वेदेऽपि क्षेत्रस्यास्य विषये उल्लेखः विद्यते । वैदिककाले ब्राह्मणकाले च वैदिकसंस्कृत्याः मूलकेन्द्रमासीत् कुरुक्षेत्रम् । आश्वलायन-लाट्यायन-कात्यायन-श्रौतसूत्रेषु ताड्यब्राह्मणे च उल्लेख दृश्यते यत् अस्मिन् क्षेत्रे बहूनां विशिष्टसत्राणामनुष्ठानं जातम् । छान्दोग्योपनिषदि उषस्ति

चाक्रायणस्तु कथाप्रसङ्गे कुरुक्षेत्रस्योल्लेखः आयाति । प्रप्रथम-धर्मशास्त्रकारेण भगवता मनुना कुरुक्षेत्रस्य विषये उल्लेखः कृतः। ततः क्षेत्रस्यास्य बहुप्राचीनकालात् सुतरां प्राधान्यं विद्यत एव । कुरुक्षेत्रं भगवतः ब्रह्मणः यज्ञवेदी भवति । पर्शुरामकाले क्षेत्रमिदं समन्त-पञ्चकमिति नाम्ना अभिहितम् आसीत् । परवर्तिकाले क्षेत्रस्यास्य नाम महाराजसाम्बरणस्य पुत्र कुरुनामानुसारं कुरुक्षेत्रमिति सञ्जातम्। उच्यते च वामनपुराणे-

आद्यैषा ब्रह्मणो वेदीस्ततो रामह्रदाः स्मृताः ।
पुरुणा च यतः कृष्णं कुरुक्षेत्रं ततस्स्मृतम् ॥
(वामन. २२/१८-२०) ।

विष्णुपुराणानुसारं य इदं धर्मक्षेत्रं कुरुक्षेत्रं चकार । धर्मक्षेत्र-निमित्तं महाराजकुरुणा इन्द्रं वरं ययाच यत्- इदं क्षेत्रं धर्मक्षेत्रं भवतु अत्र यः स्नानं करोति अथवा मरणं प्राप्नोति स जनः महापुण्यफलं प्राप्स्यति । वामनपुराणे वचनमिदं प्राप्यते यत्-

यावदेतं मया कृष्णं धर्मक्षेत्रं तदस्तु वः ।
स्नातानाञ्च मृतानाञ्च महापुण्यफलं त्विह ॥
(वामन. २२/३३-३४)।

कुरुक्षेत्रविषये श्रीमद्भगवद्गीतायां प्रथमश्लोकेऽपि प्राप्यते तत्रैव पाण्डवकौरवाणां विश्वप्रसिद्धमहाभारतयुद्धमभूत् । अपि च क्षेत्रमिदं धर्मक्षेत्रमिति प्रथमश्लोके विद्यते । अर्वाचीनः चीनपरिव्राजकहुएन्सांमहोदयोऽपि अस्य क्षेत्रस्य विषये चर्च्चां कृतवान्। तेनापि क्षेत्रस्यास्य धार्मिकदृष्ट्या पुण्यभूमिरिति प्रशंसा कृता । वनपर्वणि वामनपुराणे तथा शल्यपर्वणि पद्मपुराणे नारदीये क्षेत्रस्यास्य विषये चर्च्चा दृश्यते । वनपर्वणि क्षेत्रस्यास्य विषये उच्यते यत्-

ततो गच्छेत राजेन्द्र कुरुक्षेत्रमभिष्टुतम् ।
पापेभ्यो विप्रमुच्यन्ते सद्गताः सर्वजन्तवः ॥
कुरुक्षेत्रं गमिष्यामि कुरुक्षेत्रे वसाम्यहम् ।
य एवं सततं ब्रूयात् सर्वपापैः प्रमुच्यते ॥

क्षेत्रस्यास्य विषये ईदृशी तुलना प्राप्यते यत्- 'कुरुक्षेत्र समा गङ्गा' इति विभिन्नेषु पुराणेषु क्षेत्रस्यास्य विषये बहुनि वचनानि प्राप्यन्ते। अतः कुरुक्षेत्रं नितरामेव पुण्यतमं भवति ।

प्रयागः-

समग्रेऽस्मिन् भारतवर्षे यावन्ति तीर्थक्षेत्राणि विराजन्ते तराम्, तेषु सर्वेष्वपि क्षेत्रेषु अयं प्रयागः तीर्थराजो भवति । अतः अस्यैव तीर्थराजस्य प्रयागस्य विषये मया कानिचित्पुराणवाक्यान्युपस्थाप्यन्ते।

सितासिते सरिते यत्र सङ्गते तत्राप्लुतासु दिवमुत्पतन्ति ।
ये वै तनुं विसृजन्ति धीरास्ते जनासोऽमृतत्वं भजन्ते ॥
(त्रिस्थली पृ-३)

रघुवंशेऽपि तत्त्वबोधेन विनापि भूयस्तनुत्यजां नास्ति शरीरबन्धः (ती.प्र. पृ-१२३) ।

स्कान्देऽपि- श्रुतिभिः परिपठ्येते सितासिते सरिद्वरे ।
तत्राप्लुताङ्गा ह्यमृतं भवन्तीति विनिश्चितम् ॥
(काशीखण्ड ७/५४) ।

दशतीर्थसहस्राणि तिस्रः कोट्यस्तथापराः ।
समागच्छन्ति मध्यां तु प्रयागे भरतर्षभः ॥
माघमासं प्रयागे तु नियतः संशितव्रतः ।
स्नात्वा तु भरतश्रेष्ठः निर्मलः स्वर्गमाप्नुयात् ॥
(अनुशासन. २५/३६/३८) ।

दर्शनात्तस्य तीर्थस्य नाम संकीर्त्तनादपि ।
मृत्तिकालम्भनाद्वापि नरः पापात् प्रमुच्यते ॥
(मत्स्य १०४/१२)

एतत् प्रजापतेः क्षेत्रं त्रिषु लोकेषु विश्रुतम् ।
अत्र स्नात्वा दिवं यान्ति ये मृतास्तेऽपुनर्भवाः ॥
(कूर्म. १/३६/२०)

अत एव नारदीयपुराणेऽपि क्षेत्रमिदं प्रजापतिक्षेत्रमिति संज्ञा विद्यते ।

गङ्गायमुनयोर्वीर सङ्गमं लोकविश्रुतम् ।
यत्रायजत भूतात्मा पूर्वमेव पितामहः ॥
प्रयागमिति विख्यातं तस्माद्भरतसत्तम ॥
(वनपर्व ८७/१८-१९) ।

तथा सर्वेषु लोकेषु प्रयागं पूजयेद् बुधः ।
पूज्यते तीर्थराजस्तु सत्यमेव युधिष्ठिर ॥
(मत्स्य १०९/१५) ।

प्रकृष्टं सर्वयागेभ्यः प्रयागमिति गीयते ।
दृष्ट्वा प्रकृष्टयागेभ्यः पुष्टेभ्यो दक्षिणादिभिः ॥
प्रयागमिति तन्नाम कृतं हरिहरादिभिः ॥
(त्रिस्थलीसेतु पृ-१३) ।

प्रभावात्सर्वतीर्थेभ्यः प्रभवत्यधिकं विभो ।
(मत्स्य. ११०/११) ।

प्रकृष्टत्वात्प्रयागोऽसौ प्राधान्याद् राजशब्दवान् ॥
(ब्रह्मपुराणे त्रिस्थलीसेतु पृ-१३) ।

पञ्चयोजनविस्तीर्णं प्रयागस्य तु मण्डलम् ।
प्रविष्टमात्रे तद्भूमावश्यमेधः पदे पदे ॥
(मत्स्य १०८/९/१०) ।

पञ्चयोजनविस्तीर्ण ब्रह्मणः परमेष्ठिनः ।
प्रयागं प्रथितं तीर्थं यस्य महात्म्यमीरितम् ॥
(कूर्म. २/३५/४) ।
आप्रयागं प्रविष्टनाद्यत्पुरा वासुकेर्ह्रदात् ।
कम्बलाश्वतरौ नागौ नागश्च बहुमूलकः ॥
एतत्प्रजापतेः क्षेत्रं त्रिषु लोकेषु विश्रुतम् ॥
(मत्स्य. १०४/५) ।
प्रयागं सप्रतिष्ठानं कम्बलाश्वेतरावुभौ ।
तीर्थभोगवती चैव वेदीरेषा प्रजापतेः ॥
तत्र वेदाश्च यज्ञाश्च मूर्त्तिमन्तो युधिष्ठिर ॥
(वनपर्व. ८५/७६-७७) ।
माघसितासिते विप्र राजसूयैः समो भवेत् ।
धनुर्विंशतिविस्तीर्णे सितनीलाम्बुसङ्गमे ॥
इति पद्मोक्तेः ।
तत्र त्रीण्यग्निकुण्डानि येषां मध्येन जाह्नवी ।
(वनपर्व ८५/७३) ।
त्रीणि चाप्यग्निकुण्डानि येषां मध्ये तु जाह्नवी ।
(मत्स्य ११०/४) ।
गङ्गायमुनयोर्मध्यं पृथिव्याः जघनं स्मृतम् ।
प्रयागं जघनस्थानमुपस्थमृषयो विदुः ॥
(वनपर्व ८५/७५) ।
प्रयागं निवसन्त्येते ब्रह्मविष्णुमहेश्वराः ।
उत्तरेण प्रतिष्ठानाच्छद्मना ब्रह्मतिष्ठति ॥
वेणीमाधवरूपस्तु भगवांस्तत्र तिष्ठति ।
महेश्वरो वटो भूत्वा तिष्ठते परमेश्वरः ॥

ततो देवाः सगन्धर्वा सिद्धाश्च परमर्षयः ।
रक्षन्ति मण्डलं नित्यं पापकर्म निवारणात् ॥
(मत्स्य. १११/४-१०) ।

कुरुक्षेत्रे प्रयागे च गङ्गासागरसङ्गमे ।
गङ्गायां पुष्करे सेतौ गङ्गाद्वारे च नैमिषे ॥
यद्दानं दीयते शक्त्या तदनन्त्याय कल्पते ॥
(ब्रह्माण्ड पृ- २४) ।

ओमित्येकाक्षरं ब्रह्म परंब्रह्मभिधायकम् ।
तदेव वेणीविज्ञेया सर्वसौख्यप्रदायिनी ॥
अकारः शारदा प्रोक्ता प्रद्युम्नस्तत्र जायते ।
उकारो यमुना प्रोक्ता निरुद्धस्तज्जलात्मकः ॥
मकारो जाह्नवी गङ्गा तत्र शङ्कर्षणो हरिः ।
एवं त्रिवेणी विख्याता वेदवीजं प्रकीर्त्तिता ॥
(त्रिस्थली सेतु पृ-८) ।

प्रयागे वपनं कुर्याद्गयायां पिण्डपातनम् ।
दानं दद्यात्कुरुक्षेत्रे वाराणस्यां तनुं त्यजेत् ॥
किं गयापिण्डदानेन काश्यां वा मरणेन किम् ।
किं कुरुक्षेत्रदानेन प्रयागे वपनं यदि ॥
(ना.पु. उत्त.ख. ६३/१०३-१०४) ।

न देववचनात्तात न लोकवचनादपि ।
मतिरुत्क्रमणीया ते प्रयागमरणं प्रति ॥
(वन. ८५/८३) ।

ब्रह्मज्ञानेन मुच्यन्ते नान्यथा जन्तवः क्वचित् ।
ब्रह्मज्ञानमये क्षेत्रे प्रयागे वा तनुत्यजः ॥
ब्रह्मज्ञानं तदेवाहं काशीसंस्थितभागिनाम् ।

दिशामि तारकं प्रान्ते मुच्यन्ते ते तु तत्क्षणात् ॥
(मत्स्य.पु. १८२/२२-२५) ।
साक्षान्मोक्षो न चैतासु पुरीषु प्रियभाषिणि ।
अन्तःकाले मनुष्याणां च्छिद्यमानेषु मर्मसु ॥
वायुना प्रेष्यमाणानां स्मृतिर्नैवोपजायते ।
अविमुक्ते ह्यन्तकाले भक्तानामीश्वरः स्वयम् ॥
कर्मभिः प्रेर्यमाणानां कर्णजापं प्रयच्छति ।
मणिकर्ण्यां त्यजन् देहं गतिमिष्टां व्रजेन्नरः ॥
(मत्स्य १८२/२२-२५) ।

गङ्गा-

अस्माकं भारतवर्षे बह्वीषु पुण्यतोयासु नदीषु गङ्गायाः प्राधान्यं नितरां वरीवर्त्तते । इयं गङ्गा हिमालयात् प्रवाहिता भूत्वा वङ्गोपसागरे सम्मिश्रिता वर्त्तते । अस्याः नद्याः तीरभागे भारतस्य प्रसिद्धानि तीर्थक्षेत्राणि विराजन्ते। तेषु हरिद्वारं तीर्थक्षेत्रं, कनखलं, प्रयागः, काशी, एतानि तीर्थक्षेत्राणि मुख्यरूपेण विराजमानानि सन्ति । गङ्गाविषये सर्वप्राचीनग्रन्थे ऋग्वेदे नदीसूक्तेषु सर्वप्रथमं गङ्गायाः आवाहनं प्राप्यते। शतपथब्राह्मणे गङ्गाविषये प्राप्यते । महाभारते अनुशासनपर्वणि पुराणेषु नारदीय-पद्म-अग्नि-मत्स्यादिषु स्कान्दे च गङ्गायाः माहात्म्यं प्राप्यते । इयं गङ्गा यथा विशाला तथैव जनजीवनेन सह अस्याः प्रगाढसम्बन्धो दरीदृश्यते । गङ्गाजलस्य गङ्गास्नानस्य गङ्गातटस्थितस्य तीर्थस्य वर्णने अस्माकं पुराणधर्मशास्त्राणि नितरां मुखराणि भवन्ति। मनुस्मृतावपि पवित्रार्थं गङ्गायाः ग्रहणं दृश्यते। यथा-

यमो वैवस्वतो देवो यस्तवैष हृदिस्थितः ।
तेन चेदविवादस्ते मा गङ्गां मा कुरुन्गमः ॥
(म.स्मृ. ८/९२) ।

विष्णुपुराणेऽपि प्राप्यते ।

वामपादाम्बुजाङ्गुष्ठनखस्रोतोविनिर्गताम् ।
विष्णोर्विभर्ति यां भक्त्या शिरसाहर्निशं ध्रुवः ॥
नदी सा वैष्णवी प्रोक्ता विष्णुपादसमुद्भवा ॥
(पद्म.पु. ५/२५/१८८) ।

गङ्गागङ्गेति यैर्नाम योजनानां शतेष्वपि ।
स्थितैरुच्चारितं हन्ति पापं जन्मत्रयार्जितम् ॥
(विष्णुपु. २-८/१२०-१२१) ।

दर्शनात्स्पर्शनात्पानात्तथा गङ्गेति कीर्त्तनात् ।
स्मरणादेव गङ्गायाः सद्यः पापैः प्रमुच्यते ॥
(भविष्यपु.ती.चि. पृ-१९८) ।

सर्वत्र सुलभा गङ्गा त्रिषु स्थानेषु दुर्लभा ।
गङ्गाद्वारे प्रयागे च गङ्गासागरसङ्गमे ॥
तत्र स्नात्वा दिवं यान्ति ये मृतास्तेऽपुनर्भवा ।
(पद्मपु. ५/६०/१२०) ।

तिस्रः कोट्योर्द्धकोटि च तीर्थानां वायुरब्रवीत् ।
दिविभुव्यन्तरीक्षे च तत्सर्वं जाह्नवी स्मृता ॥
(कूर्मपु. १/३९/८) ।

किं यज्ञैर्न हविष्याद्यैः किं तपोभिः सुदुष्करैः ।
स्वर्गमोक्षप्रदागङ्गा सुखसौभाग्यपूजिता ॥
(पद्मपु. ५/६०/३९) ।

किमष्टाङ्गेन-योगेन किं तपोभिः किमध्वरैः ।
वास एव हि गङ्गायां सर्वतोऽपि विशिष्यते ॥
(नारदीयपु. उत्त.ख. ३८/३८) ।

तीराद्गव्युतिमात्रन्तु परितः क्षेत्रमुच्यते ।

तीरं त्यक्त्वा वसेत् क्षेत्रे तीरे वासो न चेष्यते ॥
एकयोजनविस्तीर्णा क्षेत्रसीमा तटद्वयात् ॥
(नारदीयपु.उत्त.ख. ४३/११९/१२०) ।

गङ्गास्नानविषये यदा कश्चित्तीर्थदृष्ट्या स्नानं करोति तदा तत्र ग्रहणे संक्रान्त्यां पूर्णिमायाममायामष्टम्याश्च प्रातः शौचादिशुद्धान्तःकरणो कृत्वा गङ्गातटे सङ्कल्पमाचरेत् । स च सङ्कल्पः-'ॐ विष्णुरिति त्रिवार उच्चारणं कृत्वा अद्य अमुकमासि अमुकपक्षे अमुकतिथौ अमुकवासरे अमुकनक्षत्रे अमुकराशौ स्थिते श्रीभास्करे अमुकराशौ स्थिते श्रीचन्द्रमसि एवं विधिविशेषणविशिष्टायां पुण्यतिथौ अमुकशर्मा भरद्वाजगोत्र अशेषयोनिजन्मजनितपापप्रणाशनपूर्वकं सर्वपुण्यप्राप्ति-कामो श्रीमत्यां गङ्गायां स्नानमहं करिष्ये' इति सङ्कल्पवाचनं स्वस्तिवाचनं च विधाय ततः गङ्गां प्रविशेत् । तत्र गङ्गायां स्नानं विधाय मानसिक-कायिक-वाचिक-रहस्यकृतपापानां विशुद्ध्यर्थं गङ्गाम्बुपानं कुर्यात् । गङ्गापानप्रसङ्गे अयं मन्त्रः स्मार्त्तैः पठ्यते यथा-

ॐ सद्यः पातकसंहत्री सद्यः दुःखविनाशिनी ।
सुखदा मोक्षदा गङ्गा गङ्गैव परमा गतिः ॥

एवं जलपानञ्च विधाय ततस्तर्पणमाचरेत् । तर्पणान्ते पितॄन् प्रार्थयेत्। यथा-

आब्रह्मस्तम्भपर्यन्तं देवर्षिपितृमानवाः ।
तृप्यन्तु पितरः सर्वे मातृमातामहादयः ॥
अतीतकुलकोटीनां सप्तद्वीपनिवासिनाम् ।
आब्रह्मभूवनाल्लोकादिदमस्तु तिलोदकम् ॥

तर्पणकाले च सतिलकुशमिश्रितजलमञ्जलित्रयं दद्यात् ।

विष्णुपादाब्जसम्भूते गङ्गे त्रिपथगामिनि ।
धर्मव्रतेति विख्याते पापं मे हर जाह्नवी ॥

अस्याः गङ्गायाः स्मृतिचन्द्रिकायां मत्स्यपुराणे च द्वादशनामानि पद्मपुराणे मत्स्यपुराणे च गङ्गायाः सहस्रं नामानि प्राप्यन्ते । इयं गङ्गा यदा देवलोके प्रवाहिता भवति, तत्र भिन्नं नाम मर्त्ये च भिन्नं पातालेऽपि भिन्नं भवति ।

यावदस्थि मनुष्यस्य गङ्गायाः स्पृशते जलम् ।
तवत्स पुरुषो राजन् स्वर्गलोके महीयते ॥
केशास्थिनखदन्ताश्च भस्मापि नृपसत्तम ।
नयन्ति विष्णुसदनं स्पृष्टा गाङ्गेन वारिणा ॥

(नारदीयपु. १५/१६३) ।

स्नानार्थं विशिष्टानि दिनानि तत्राधिकानि पुण्यान्यपि भवन्तीति स्कन्दपुराणस्य काशीखण्डे प्राप्यन्ते ।

दर्शे शतगुणं पुण्यं संक्रान्तौ च हस्रकम् ।
चन्द्रसूर्यग्रहे लक्षं व्यतीपाते त्वनन्तकम् ॥
सोमग्रह सोमदिने रविवारे रवेर्ग्रहे ।
तच्चूडामणिपर्वाख्यं तत्र स्नानमसंख्यकम् ॥ इति ।

(काशीखण्डः २७/१२९-१३१) ।

गोदावरी-

गोदावरीविषये वैदिकसाहित्ये न किमपि प्रमाणं प्राप्यते । परन्तु पाणिनिना गोदावरीविषये चर्च्चा कृता । सूत्रमध्ये च वार्त्तिके च अस्याः नाम प्राप्यते । रामायणे महाभारते गोदावरीविषये चर्च्चा उपलभ्यते । वनपर्वणि अस्याः किञ्चिद्वर्णनमवलोक्यते । रामायणस्यारण्यकाण्डे गोदावरीसमीपवर्त्ति पञ्चवट्या वर्णनं दृश्यते। ब्रह्मपुराणे तीर्थसारे नृसिंहपुराणे च गोदावरीविषये महत्यालोचनं प्राप्यते । अस्याः अपरं नाम गौतमीति ब्रह्मपुराणे प्राप्यते । यथा-

विन्ध्यस्य दक्षिणे गङ्गा गौतमी सा निगद्यते ।
उत्तरे साऽपि विन्ध्यस्य भागिरथ्यभिधीयते ॥
(ब्रह्मपु. ७७/७८) ।

तत्रैव ब्रह्मपुराणे प्राप्यते-

तिस्रः कोट्योर्द्धकोटि च योजनानां शतं द्वये ।
तीर्थानि मुनि शार्दुल सम्भविष्यन्ति गौतम ॥
धर्मबीजं मुक्तिबीजं दण्डकारण्यमुच्यते ।
विशेषाद् गौतमी श्लीष्टो देशः पुण्यतमोऽभवत् ॥
सह्यस्यानन्तरे चैत्रे तत्र गोदावरी नदी ।
पृथिव्यामपि कृत्स्नायां सप्रदेशो मनोरमः ॥
यत्र गोवर्द्धनो नाम मन्दरोगन्धमार्दनः ॥
(मत्स्यपु. ११४/३७-३८) ।

गोदावरीसमीपे बहूनां तीर्थानां समवायो विद्यते । तेषु मुख्यानि तीर्थानि त्र्यम्बककोषावर्त्त, जनस्थान, गोवर्द्धन, नासिक, पञ्चवटी इत्यादिनि प्रसिद्धानि । क्षेत्रमिदं दक्षिणभारतीयानां तथा भारतीयजनानां पुण्यक्षेत्ररूपेण परिगणितं समादृतं च विद्यते ।

नर्मदा-

अस्माकं पुण्यतमे भारतवर्षे यावत्यः नद्यः विद्यन्ते तासु गङ्गानन्तरं नर्मदायाः वैशिष्ट्यं महत्त्वश्च अस्माभिः प्राप्यते । सङ्कल्पवाक्ये 'नर्मदे सिन्धु कावेरी' इति उल्लेखोऽस्ति । वैदिकसाहित्ये यद्यपि नर्मदाविषये न कश्चन स्पष्टः सङ्केतस्तथापि शतपथब्राह्मणे रेवाविषये किञ्चित्प्राप्यते । नर्मदायाः अपरा संज्ञा रेवा भवति । पाणिनिनाऽपि 'महिष्मत्' शब्दस्य व्युत्पत्तिः कृता । येन नर्मदासमीपवर्त्ति माहिष्मतीपुरस्य ग्रहणं भवति । रघुवंशेऽपि अस्मिन्विषये प्राप्यते । परन्तु भागवतपुराणानुसारमियं रेवा नर्मदा

भिन्ना भवति । वामनपुराणे अग्निपुराणे कूर्मनारदीये च महाभारतस्य वनपर्वणि एतस्मिन् विषये सङ्केतः मिलति । विष्णुधर्मसूत्रेऽपि नर्मदाविषये प्राप्यते यत्- नर्मदायाः सम्पूर्णा भूमि श्राद्धदानयोग्या भवति । श्राद्धदानविषये बहुषु पुराणेषु नर्मदा श्रेष्ठा इति वचनानि उपलभ्यन्ते । यथा-

नर्मदा सरितां श्रेष्ठा रुद्रदेहात् विनिश्रुता ।
तारयेत् सर्वभूतानि स्थावराणि चराणि च ॥

(मत्स्य.१९०/१७, कूर्म. २/४०/५, पद्म.आदि. १७/१३ च) ।

अपि च- पितॄणां दुहिता पुण्या नर्मदा सरिताम्बरा ।
तत्र श्राद्धानि दत्तानि अक्षयाणि भवन्त्युत ॥

(वायुपु. ७७/३२) ।

योजनानां शतं साऽग्रं श्रूयते सरिदुत्तमा ।
विस्तरेण तु राजेन्द्र योजनद्वयमायता ॥

(कूर्म.२/४०/१२, अग्नि. ११३/२,
मत्स्य. १८६/२४-२५ च)।

कूर्मपुराणे अस्याः रमणीयताविषये वर्णना विद्यते ।

कलिङ्गदेशपश्चार्द्धे पर्वतेऽमरकण्टके ।
पुण्या च त्रिषु लोकेषु रमणीया मनोरमा ॥

(कूर्म.२/४०/९, मत्स्य. १८६/१२) ।

विष्णुपुराणे अस्याः प्रार्थना प्राप्यते, यथा-

नर्मदायै नमः प्रातः नर्मदायैः नमोनिशि ।
नमोऽस्तु नर्मदे तुभ्यं त्राहि मां विषसर्पतः ॥

(विष्णुपु. ४३/१२-१३) ।

मत्स्यपुराणेऽपि प्राप्यते अत्र यदि कश्चित्प्राणत्यागं करोति तर्हि रुद्रलोकं प्राप्नोति । जन्मग्रहणं वा करोति तर्हि स अनाशको भवति।

यथा-

अनाशकं तु यः कुर्यात् तस्मिन् तीर्थे नराधिप ।
गर्भवासे तु राजेन्द्र न पुनर्जायते पुमान् ॥
परित्यजति यः प्राणान् पर्वतेऽमरकण्टके ।
वर्षकोटि शतं साग्रं रुद्रलोके महीयते ॥

अतः क्षेत्रमिदं नूनमेव पवित्रभूतं तीर्थयोग्यं पुण्यकरं भवतीति नास्ति कश्चन विसंवादः ।

गया-

आधुनिककाले सर्वेषां धार्मिकानां हिन्दूनां गयां प्रति दृष्टिनिपतिता भवति । तदर्थं गयायाः विलक्षणं महत्त्वं प्राचीनकालादारभ्य अद्यावधि विराजतेतराम् । क्षेत्रस्यास्य महत्त्वविषये श्राद्धदानविषये च सर्वेषु पुराणेषु धर्मशास्त्रनिबन्धेषु च विशेषोल्लेखः प्राप्यते । वायुपुराणान्तर्गते गयामाहात्म्ये क्षेत्रस्य माहात्म्यं विषदीकृतमस्ति । गयायां बहुन्युपतीर्थान्यपि विद्यन्ते । यथा ब्रह्मकुपः प्रभासः, रेतपर्वतः, उत्तरमानसः, उदीचिः, कनखलः, दक्षिणमानसः, धर्मारण्यः, गदाधरः, मतङ्गश्च । गयामाहात्म्यस्य बहवः श्लोकाः स्मृतिचन्द्रिकायां श्राद्धाशौचविषये उद्धृताः विद्यन्ते। गयामाहात्म्यस्य प्राचीनताविषये समालोचकाः विविदन्ते । सम्भवतः गयाक्षेत्रस्य विषये सप्तमशताब्दीतः आलोचनं दृश्यते । इतः प्रागपि ऋग्वेदादिषु गयानामोल्लेखोऽस्ति । वनपर्वणि गयायां श्राद्धदानविषये विद्यते यत्-

एष्टव्या बहवः पुत्राः यद्येकोऽपि गयां व्रजेत् ।
यजेत वाश्वमेधेन नीलं वा वृषमुत्सृजेत् ॥
महानदी च तत्रैव तथा गयाशिरो नृपः ।
यत्रासौ कीर्त्यते विप्रैरक्षयकरणो वटः ॥

यत्र दत्तं पितृभ्योन्नमक्षयं भवति प्रभो ।
सा च पुण्यजलातत्र फल्गुनामा महानदी ॥
(वनपर्व. ८७/१०-१२)।

राजर्षिणा पुण्यकृता गयेनानुपमद्युते ।
नगो गयाशिरो यत्र पुण्या चैव महानदी ॥
ऋषियज्ञेन महता यत्राक्षयवटो महान् ।
अक्षये देवयज्ञेन अक्षयं यत्र वै फलम् ॥
(वनपर्व. ९५/९/१४) ।

आत्मजोवान्यजो वापि गयाभूमौ यदा यदा ।
यन्नाम्ना पातयेत्पिण्डं तन्नयेद् ब्रह्मशाश्वतम् ॥
नामगोत्रे समुच्चार्य पिण्डपातनमिष्यते ॥
(वायुपु. १०५/१४-१५) ।

ब्रह्मज्ञानं गयाश्राद्धं गोग्रहे मरणं तथा ।
वासः पुंसां कुरुक्षेत्रे मुक्तिरेषा चतुर्विधा ॥
ब्रह्मज्ञानेन किं कार्यं यदि पुत्रो गयां व्रजेत् ।
गयायां सर्वकालेषु पिण्डं दद्याद्विचक्षणः ॥
(वायुपु. १०५/१६,१८) ।

दण्डं प्रदर्शयेद् भिक्षुर्गयां गत्वा न पिण्डदः ।
दण्डं न्यस्य विष्णुपदे पितृभिः सह मुच्यते ॥
(वायु.१०५/२६, नरदीय.२/४५/३१. तीर्थप्र. पृ-३८ च)।

पञ्चक्रोशं गयाक्षेत्रं क्रोशमेकं गयाशिरः ।
तन्मध्ये सर्वतीर्थानि त्रैलोक्ये यानि सन्ति वै ॥
(वायुपु. १०५/२९-३०, १०६/६५) ।

पिण्डाशनं पिण्डदानं पुनः प्रत्यवनेजनम् ।
दक्षिणा चान्नसंकल्पस्तीर्थश्राद्धेष्वयं विधिः ॥

नावाहनं न दिग्बन्धो न दोषो दृष्टिसम्भवः ।
अन्यत्राविहिता काले पितरो यान्ति दिवं प्रति ॥
तीर्थे सदा वसन्त्येते तस्मादावाहनं न हि ।
(वायुपु. १०५/३७-३९)।

गयायां न हि तत्स्थानं यत्र तीर्थं न विद्यते ।
गदालोलमितिख्यातं सर्वेषामुत्तमोत्तमम् ॥
(वायु. १०५/४६, अग्नि. ११६/२८ च) ।

आद्यया गदया भीतो यस्माद् दैत्यः स्थिरीकृतः ।
स्थित इत्येतद् हरिणा तस्मादादिगदाधरः ॥
(वायुपु. १०५/६०) ।

अष्टकासु च वृद्धौ च गयायां च मृतेऽहनि ।
मातुः श्राद्धं पृथक्कुर्यादन्यत्र पतिना सह ॥
(वायु. ११०/१७, ती.प्र. पृ-३८९ च) ।

मुष्टिमात्रप्रमाणं च आर्द्रामलकमात्रकम् ।
शमीपत्रप्रमाणं वा पिण्डं दद्यात् गयाशिरे ॥
उद्धरेत्सप्तगोत्राणि कुलानि शतमुद्धरेत् ।
पितुर्मातुः स्वभार्याया भगिन्या दुहितुस्तथा ॥
पितृष्वसृर्मातृष्वसुः सप्तगोत्राः प्रकीर्त्तिताः ।
(वायुपु. ११०/२५-२६) ।

नागकूटाद् गृध्रकूटाद्यूपातरमानसात् ।
एतद्गयाशिरः प्रोक्तं फल्गुतीर्थं तदुच्यते ॥
(अग्निपु. ११५/२५-२६) ।

गङ्गापादोदकं विष्णोः फल्गुर्ह्यादिगदाधरः ।
स्वयं हि द्रव्यरूपेण तस्माद्गङ्गाधिकं विदुः ॥
(वायुपु. १११/१६)।

RASHTRIYA SANSKRIT SANSTHAN DEEMED UNIVERSITY UNDER MINISTRY OF H.R.D. GOVT. OF INDIA
ACCESSION NO. 27818
DATE 11/8/16

पञ्चामृतेन स्नानमर्चायां तु विशिष्यते ।
(उत्तर.४३/५३) ।
क्रौञ्च पादात्फल्गुतीर्थं यावत्साक्षाद्गयाशिरः ।
(वायुपु. १११/४४) ।
क्रौञ्चरूपेण हि मुनिर्मुखे पृष्ठे तपोऽकरोत् ।
तस्य पादाङ्कितो यस्मात् क्रौञ्चपादस्ततः स्मृतः ॥
(कौ.पा.वायु. १०८/७५)।
गयाशिरसि यः पिण्डान्येषां नाम्ना तु निर्वपेत् ।
नरकस्था दिवं यान्ति स्वर्गस्था मोक्षमाप्नुयुः ॥
(त्रिस्थली. पृ- ३६६)।
हेत्यसुरस्य यच्छीर्श गदया यद् द्विधा कृतम् ।
ततः प्रक्षालिता यस्मात्तीर्थं तच्च विमुक्तये ॥
(वायुपु. १११/७५) ।
ये युष्मान्पूजयिष्यन्ति गयायामागता नराः ।
हव्यकव्यैर्धनैः श्राद्धैस्तेषां कुलशतं व्रजेत् ॥
नरकात् स्वर्गलोकाय स्वर्गलोकात्परां गतिम् ॥
(अग्निपु. ११४/३९-४०) ।
क्रमतोऽक्रमतो वापि गयायात्रा महाफला ।
(अग्निपु. ११५/७४) ।
गजागजो गयादित्यो गायत्री च गदाधरः ।
गया गयाशिरश्चैव षड् गया मुक्तिदायिकाः ॥
(वायुपु. ११२/६०) ।
पितरो यत्र पूज्यन्ते तत्र मातामहा अपि ।
अविशेषेण कर्त्तव्यं विशेषान्नरकं व्रजेत् ॥
इति गौतमोक्तेः ।(त्रिस्थली.पृ-३४९, स्मृ.सा. पृ-५६ च) ।

ततश्चान्वष्टकादित्रये स्त्रिणां श्राद्धं पृथग् एव ।
गयामहालयादौ तु पृथक् सह वा भर्तृभिरितिसिद्धम् ॥
(अपरार्क.पृ-४३२) ।

श्राद्धं तु नवदैवत्यं कुर्याद् द्वादशदैवतम् ।
अन्वष्टकासु बृद्धौ च गयायां मृतवासरे ॥
(गरुडपु. १/८४/२४) ।

तत्र मातृश्राद्धं पृथक् प्रशस्तम् । मातामहानां सपत्नीकमेव । गयायां जनः सङ्कल्पं कृत्वा वाक्यमिदमुच्चारयेत् यत्- 'ॐ विष्णुरिति त्रिवारं पठित्वा अद्यामुकगोत्राणां पितृपितामहप्रपितामहानाममुक-देवशर्मणाम्, अमुकगोत्राणां मातृपितामहीप्रपितामहीनाममुकामुक-देवीनाम्, अमुकगोत्राणां मातामह-प्रमातामह-वृद्धप्रमातामहाना-ममुकामुकदेवशर्मणाममुकगोत्राणां मातामही-प्रमातामही-वृद्धप्रमातामहीनाममुकदेवीनां प्रेतत्वविमुक्तिकामः प्रेतशिलायां श्राद्धमहं करिष्ये' ।

आत्मनस्तु महाबुद्धे गयायां तु तिलैर्विना ।
पिण्डनिर्वपणं कुर्यात्तथा चान्यत्रगोत्रजाः ॥
(वायुपु. ८३/३४, त्रिस्थली.पृ-३५०) ।

पिण्डो देयस्तु सर्वेभ्यः सर्वैश्च कुलतारकैः ।
आत्मनस्तु तथा देयो ह्यक्षयं लोकमिच्छता ॥
(अग्निपु. ११५/६८) ।

आत्मजोप्यन्यजो वापि गयाभूमौ यदा तदा ।
यन्नाम्ना पातयेत्पिण्डं तं नयेद् ब्रह्म शाश्वतम् ॥
नामगोत्रे समुच्चार्य पिण्डपातनमिष्यते ।
येन केनापि कस्मैचित् स याति परमां गतिम् ॥
(वायुपु. १०५/१४-१५) ।

पञ्चक्रोशं गयाक्षेत्रं क्रोशमेकं गयाशिरः ।
(वायु. १०६/६५, अग्नि.११५/४२ च) ।
मुण्डपृष्ठश्च पूर्वस्मिन् दक्षिणे पश्चिमोत्तरे ।
सार्द्धं क्रोशद्वयं मानं गयेति परिकीर्त्तितम् ॥
(वायुपु. त्रिस्थलीसेतु पृ-३४२) ।
अयोध्या मथुरा माया काशी काञ्ची ह्यवन्तिका ।
एताः पुण्यतमाः प्रोक्ताः पुरीणामुत्तमोत्तमाः ॥
(ब्रह्माण्डः ४/४०/९) ।
काशी काञ्ची च मायाख्या त्वयोध्या द्वारवत्यपि ।
मथुरावन्तिका चैताः सप्तपुर्योत्र मोक्षदाः ॥
(स्कन्द. काशीखण्ड. ६/६८) ।

एवमेव विभिन्नेषु पुराणेषु गयापुरीविषये विभिन्नानि वचनानि उपलभ्यन्ते । अद्यापि आधुनिके युगे पितृश्राद्धार्थं जनाः गयापुरीमागच्छन्ति। श्राद्धं, दानं, ब्राह्मणभोजनञ्च कारयन्ति । अतः क्षेत्रस्यास्य माहात्म्यं नितरां सुविदितमस्ति ।

तीर्थानां पापक्षयहेतुत्वविचारः—

अत्र धर्मशास्त्रस्य मुख्यविषयेषु पापक्षयत्वविचारः सम्पाद्यते। मन्वादिषु धर्मशास्त्रेषु मुख्यतया त्रय एव विषयाः समालोचकैः आलोच्यन्ते । त एव विषयाः यथा आचारः, व्यवहारः, प्रायश्चित्तमिति। आचारप्रसङ्गे मुख्यतः गर्भाधानाद् आरभ्य अन्त्येष्टिं यावत्संस्काराणां विशद् आलोचनं यथा अधिकारी, मुख्यकालः, गौणकालः, द्रव्याणि, कर्माणि च प्रतिपादितानि विद्यन्ते । तथा च अस्यैव आचारस्य मध्ये श्राद्धस्यापि अन्तर्भावो भवति । श्राद्धं नाम पितृद्देश्येन श्रद्धया दीयमानमदनीयं द्रव्यं श्राद्धमिति । तच्च श्राद्धं मुख्यतः द्विविधम् । एकोद्दिष्टं पार्वणमिति । द्विविधस्यापि श्राद्धस्य

पुनः त्रिविधत्वं विद्यते। यथा नित्यनैमित्तिककाम्यमिति । ततः आचारमध्ये शुद्धिविषयकम् आलोचनं प्राप्यते ।

व्यवहाराध्याये मुख्यरूपेण अष्टादशविवादपदानां तथा च प्राड्विवाक-साक्षि-व्यवहारस्य पादचतुष्टयं राज्ञः व्यवहारदर्शन-प्रकारः राजाऽभावे कस्य तावद् व्यवहारदर्शनेऽधिकारः, एतेषां विषये मुख्यतः आलोचनमस्माभिः प्राप्यते । धर्मशास्त्रे आचारस्य यादृशं महत्त्वं व्यवहारस्य तथैव गाम्भीर्यं वरीवर्त्तते । परन्तु यस्य सकाशात् यस्य कारणाद्धर्मशास्त्रस्य स्थितिः महत्त्वं सर्वैः स्वीक्रियते स एव विषयो भवति प्रायश्चित्तम् । प्रायश्चित्तविषये यद्यपि धर्मशास्त्रे पुराणे बहु आलोचनं प्राप्यते, तथापि विषयस्यास्य वैशिष्ट्यकारणात् मया किञ्चिल्लिख्यते । अस्माकं संस्कृतौ हिन्दुपरम्परायाश्च त्रिविधानि कर्माणि विद्यन्ते। तत्तु अकरणेप्रत्यवायाख्यं नित्यं कर्म, कमपि निमित्तमुररी-कृत्य जातकर्मादि ग्रहणस्नानादि वा नैमित्तिकं कर्म, कामनामुररीकृत्य क्रियमाणमग्निहोत्रं जुहुयात्स्वर्गकाम' इतिवत् काम्यं कर्म । विभिन्नेषु शास्त्रेषु एतानि कर्माणि उपलब्धानि भवन्ति । त्रिविधेष्वपि कर्मसु नैमित्तिककर्ममध्ये प्रायश्चित्तस्यान्तर्भावो भवति। प्रायश्चित्तमध्ये निमित्तं किमित्याकांक्षायामुच्यते निमित्तं तु पापमेव । पुनश्चाकांक्षा जायते यत् किं प्रायश्चित्तेन पापक्षयो भवति न वा पापक्षयनिमित्तं कानि कानि कर्माणि शास्त्रानुमोदितानि विद्यन्ते एतस्मिन् विषये क्षुद्रोऽयं विचारः उपस्थाप्यते। मुख्यतः पापं तु द्विविधं भवति, तद्यथा- कामकृत-मकामकृतश्चेति । तत्र योगीश्वरेण याज्ञवल्क्येन (३/२२६) प्रतिपादितं यत्-

प्रायश्चित्तैरपैत्येनः यदज्ञान कृतं भवेत् ।
कामतो व्यवहार्यस्तु वचनादिह जायते ॥

अज्ञानाद्यदेनः पापं कृतं तदपैति गच्छति, न कामतः कृतम् ।

किन्तु तत्र प्रायश्चित्तविधायकवचनवलादिह लोको व्यवहार्यो जायते। अत्र च प्रायश्चित्तैरप्यैत्येनःयदज्ञानकृतम्' इत्युपक्रमात् तत्र प्रतियोगितया 'ज्ञानत' इति वक्तव्ये यत् 'कामतः' इत्युक्तं तत् ज्ञानकामयोस्तुल्यत्व-प्रदर्शनार्थम् । तथापि 'विहितं यदकामानां कामात्तत् द्विगुणं भवेत्'। तथाऽबुद्धिपूर्वक्रियायामर्धं प्रायश्चित्तम् । तथा 'म्लेच्छेनाधिगतः शूद्रस्त्वज्ञानात्तु कथञ्चन । कृच्छ्रत्रयं प्रकुर्वीत ज्ञानात्तु द्विगुणं भवेत्। इत्यादिभिर्वचनैर्ज्ञानकामनयोस्तुल्यप्रायश्चित्त-दर्शनात्तुल्यफलता एव। किं च स्वतन्त्रप्रवृत्तिर्विषयज्ञानकामनाभ्यां नियता, तयोरन्यतरा-पायेऽपि तस्या असम्भवादतः 'कामत' इत्युक्तम्, 'ज्ञानाज्ञानत' इत्युक्तेऽपि कामः प्राप्नोत्यविनाभावात् । न च चौरादिभिर्बलात् प्रवर्त्यमानस्य सत्यपि विषयज्ञाने कामनाभावान्नाविनाभाव इति वाच्यम् । ततोऽत्र विद्यमानस्यापि ज्ञानस्य प्रवृत्तिहेतुत्वाभावेना-सत्समत्वम् । यत्तु शुष्केऽपि पिपतिषोर्भ्रान्त्या कर्दमपतनं, तत्रापि वास्तवज्ञानाभावात्तद्विषयकामनायाश्चाभाव एव। एवमज्ञानाकामनयो-रप्यभिचार एव। ननु 'प्रायश्चित्तैरपैत्येन'इति न युक्तम्। फलविनाश्य-त्वात् कर्मणः मैवम्, यथा पापोत्पत्तिः शास्त्रगम्या तथा तत्परिक्षयोपीति नात्र प्रमाणान्तरं क्रमते । अत एव गौतमे पूर्वोत्तरपक्षभंग्या अयमर्थो दर्शितः। तत्र प्रायश्चित्तं कुर्यान्न कुर्यादिति मीमांसन्ते । न कुर्यादित्याहुर्न हि कर्म क्षीयते इति । कुर्यादित्यपरे । 'पुनः स्तोमेनेष्ट्वा पुनः सवनमायान्तीति विज्ञायते । व्रात्यस्तोमेष्ट्वा तरति सर्वं पाप्मानं तरति भ्रूणहत्यां योऽश्वमेधेन यजते, इति पुनः सवनमायान्तीति संवनसम्पाद्य ज्योतिष्टोमादिद्विजातिकर्मणि योग्यो भवतीत्यर्थः । न चेदमर्थवादमात्रम् अधिकारिविशेषणाकांक्षायां रात्रिसत्रन्यायेनार्थ-वादिकफलस्यैव कल्पनया न्यायत्वात्, अतो युक्तं 'प्रायश्चित्तरपैत्येनः' इति । ननु कामकृते प्रायश्चित्ताभावात्कथं व्यवहार्यत्वं तदभावश्च

'अनभिसन्धिकृतेऽपराधे प्रायश्चित्तमिति वसिष्ठवचनात् (११/८९)-

इयं विशुद्धिरूदिता प्रमाप्याकामतो द्विजम् ।
कामतो ब्राह्मणवधे निष्कृतिर्न विधीयते ॥

इति मनुवचनाच्चावगम्यते । नैतत् ।

यः कामतो महापापं नरः कुर्यात्कथञ्चन ।
न तस्य निष्कृतिर्दृष्टा भृग्वग्निपतनादृते ॥

तथा- 'विहितं यत् अकामानां कामात्तद् द्विगुणं भवेत् ।'

इति च कामकृतेऽपि प्रायश्चित्तदर्शनात् । यत्तु वसिष्ठवचनं 'तस्याप्यकाम-कृतेऽपराधे प्रायश्चित्तं शुद्धिकरम्' इत्यभिप्रायो न पुनः कामकृते प्रायश्चित्ताभाव इति । यत्तु मनुवचनम्- 'इयं विशुद्धिरुदिता' इत्यादि तदपीयमिति सर्वनाम परामृष्टद्वादशवार्षिकादिव्रतचर्याया एव ।

"कामतो ब्राह्मणबधे निष्कृतिर्न विधीयते ।"

इत्यनेन प्रतिषेधो न पुनः प्रायश्चित्तमात्रस्य मरणान्तिकादेः प्रायश्चित्तस्य दर्शितत्वात् । ननु यत् कामकृतेऽपि प्रायश्चित्तमस्ति तर्हि पापक्षयोऽपि कस्मान्न स्यादविशेषाद्यदि पापक्षयोऽपि नास्ति तर्हि व्यवहार्यताऽपि कथं भवति ? उच्यते- उभयत्र प्रायश्चित्ताविशेषेऽपि फलविशेषः शास्त्रतोऽवगम्यते । अज्ञानकृते तु सर्वत्र पापक्षयः । यत्र तु ब्रह्महा-सुराप-गुरुतल्पग-मातृपितृयोनिसंबद्धसंबद्धावागमस्तेन नास्तिक-निन्दितकर्माभ्यासिपतितात्याग्यपतितत्यागिनः पतिताः पातक-संयोजकाश्च इति गौतमोक्तमहापातकादौ व्यवहार्यत्वं निषिद्धं, तस्मिन् पतनीये कर्मणि कामतः कृते व्यवहार्यत्वमात्रं न पापक्षय इति । न च पापक्षयाभावे व्यवहार्यत्वमनुपपन्नम् । द्वे हि पापस्य शक्ती नरकोत्पादिका व्यवहारनिरोधिका चेति । तत्रेतरशक्त्यविनाशेऽपि व्यवहारनिरोधिकायाः शक्तेर्विनाशो नानुपपन्नस्तस्मात्पापानपगमेऽपि व्यवहार्यत्वं नानुपपन्नम् । यत्तु मनुवचनम्(११/४५)-

अकामतः कृते पापे प्रायश्चित्तं विदुर्बुधाः ।
कामकारकृतेऽप्याहुरेके श्रुतिनिदर्शनात् ॥

इति तदपि कामकृते प्रायश्चित्तप्राप्त्यर्थं न पुनः पापक्षयप्रतिपादनपरम्। अपतनीये पुनः कामकृतेऽपि प्रायश्चित्तेन पापक्षयो भवत्येव इति मनुस्मरणात् (११/४६)-

अकामतः कृतं पापं वेदाभ्यासेन शुद्ध्यति ।
कामतस्तु कृतं मोहात्प्रायश्चित्तैः पृथक्विधैः ॥

पतनीयेऽपि कर्मणि कामकृते मरणान्तिकप्रायश्चित्तेषु कल्मषक्षयो भवत्येव । फलान्तराभावात् नास्यान्यस्मिल्लोके प्रत्यापत्तिर्विद्यते कल्मषन्तु निहन्यते । इत्यापस्तम्बस्मरणात् । अतः पापस्योत्पत्तिः कथं भवतीति प्रबन्धेऽस्मिनुपस्थाप्यते । यथा-

विहितस्याननुष्ठानान्निन्दितस्य च सेवनात् ।
अनिग्रहाच्चेन्द्रियाणां नरः पतनमृच्छति ॥
तस्मात्तेनेह कर्त्तव्यं प्रायश्चित्तं विशुद्धये ।
एवमस्यान्तरात्मा च लोकश्चैव प्रसीदति ॥

विहितमिति यदावश्यकं सन्ध्योपासनाग्निहोत्रादिकं नित्यमशुचि-स्पर्शादौ नैमित्तिकत्वेन चोदितं स्नानादिकं च तदुभयमुच्यते तस्याकरणात्, निन्दितस्य निषिद्धस्य सुरापानादेः कारणात्, इन्द्रियाणामनिग्रहाच्च नरः पतनमृच्छति प्राप्नोति । प्रत्यवायी भवतीति यावत् । ननु इन्द्रियार्थेषु सर्वेषु न प्रसज्येत कामतः (मनु. ४/१६) इतीन्द्रियप्रसक्तेरपि निषिद्धत्वात् 'निन्दित' ग्रहणेनैव गतार्थत्वात्-किमर्थम् 'अनिग्रहाच्चेन्द्रियाणाम्' इति पृथगुपादानम् ? अतोच्यते-इन्द्रियप्रसक्तिनिषेधस्य नैकान्ततः प्रतिषेधरूपता स्नातकव्रत-मध्येऽस्य पाठात्तत्र च 'व्रातानीमानि धारयेत्' (मनु. ४/१३) इति व्रतशब्दाधिकारान्नाञ्श्रवणाच्चेन्द्रियप्रसक्तिप्रतिषेधकः सङ्कल्पो

विधीयते। स च उभयरूप इति पृथगुपादानम्। ननु विहिताकरणात् प्रत्यवैतीति कुतोऽवसितम्? न तावदग्निहोत्रादिचोदना पुरुषप्रवर्त्तनात्मिकाऽननुष्ठानस्य प्रत्यवायहेतुतामाक्षिपति। विषयानुष्ठानस्य पुरुषार्थत्वावगतिमात्रपर्यवसायिनी हि सा तावन्मात्रेण प्रवृत्त्युपपत्तेः न पुनरकरणस्य प्रत्यवायहेतुत्वमपि वक्ति, क्षीणशक्तित्वादनुपपत्तेः। किं च यद्यनुपपत्त्युपशमेऽपि प्रवृत्तिसिद्ध्यर्थमर्थान्तरं कल्प्यते तर्हि निषिद्ध्यमानक्रियाजन्यप्रत्यवायपरिहारार्थतयैव तद्वर्जनस्य पुरुषार्थत्वसिद्धावपि फलान्तरं कल्प्येत। न चैतत् कस्यचिदपि सम्मतम्। ननु यथा निषिद्धेष्वर्थवादावगतप्रत्यवायपरिहारार्थतयैव पुरुषार्थत्वं तथा विहितेष्वप्यर्थवादावगताकरण-जन्यप्रत्यवायपरिहारार्थता कस्मान्न स्यात्? मैवम्। न हि सर्वत्राग्निहोत्रादिषु तादृग्विधार्थवादाः सन्ति। न च 'विहितस्याननुष्ठानान्नरः पतनमृच्छति' इतीयं स्मृतिरेव वाक्यशेषस्थानीयेति चतुरस्रम्। न हि वाक्यान्तरप्रमिते कार्ये वाक्यान्तरेणार्थवादः सम्भवति। भवतु वा कथञ्चिदेकवाक्यतयार्थवादस्तथापि नाभावरूपं विहिताकरणे कार्यान्तरं जनयितुं क्षमते। ननु 'ज्वरे चैवातिसारे च लङ्घनं परमौषधम्' इत्यायुर्वेदवचनाद्भोजनाभावरूपं लङ्घनं ज्वरशान्तिं जनयतीति यथावगम्यते तथात्रापि भवतु। मैवम्, यतो नात्रापि लङ्घनाज्ज्वरशान्तिः, किं तर्हि ज्वरनाशप्रतिबन्धकभोजनाभावे सति जठरानलपरिपाकजनिताद्धातुसाम्यादिति मन्तव्यम्। तस्मात् 'विहितस्याननुष्ठानान्नरः पतनमृच्छति' इति कथमस्याः स्मृतेर्गतिरिति वाच्यम्। उच्यते- 'अग्निहोत्रादिविषयाधिकारासिद्धिरूपप्रत्यवायाभिप्रायेणेति न दोषः।

मनुनाऽपि (१२/७१-७२)-

वान्ताश्युल्कामुखः प्रेतो विप्रो धर्मात्स्वकाच्च्युतः।
अमेध्यकुणपाशी च क्षत्रियः कटपूतनः॥

मैत्राक्षज्योतिकः प्रेतो वैश्यो भवति पूयभुक् ।
चैलाशकस्तु भवति शूद्रो धर्मात्स्वकाच्च्युतः ॥

इत्येतानि विहिताकरणप्रत्यवायपराणि मनुवचनानि कथं घटन्ते ? उच्यते यथा वान्तमश्नत उल्कया वा दह्यमानमुखस्य दुःखं तथास्यापि विहितमकुर्वतः पुरुषस्य पुरुषार्थासिद्धेरित्यकरणनिन्दनमनुष्ठान-प्ररोचनार्थमित्यविरोधः । यद्वा प्राग्भवीयनिषिद्धाचरणाक्षिप्तविहिता-नुष्ठानविरोधिरागालस्यादिजन्यवान्ताश्युल्कामुखप्रेतत्वादिरूपमिति न क्वचिदभावस्य कारणतेति मन्तव्यम् । ननु पुंश्चलीवानरखरदृष्ट (श्वदष्ट) मिथ्याभिशस्तादौ विहिताकरणादिनिमित्तानामन्यतमस्याप्यभावात् कथं प्रत्यवायिता ? कथं च तदभावे प्रायश्चित्तविधानम् उच्यते-अस्मादेव पापक्षयार्थप्रायश्चित्तविधानाज्जन्मान्तराचरितनिषिद्धसेवादि-जन्यपापापूर्वं समाक्षिप्तमित्यभिशापादिकं तन्निमित्तप्रायश्चित्ता-पनोद्यमनेनानुष्ठितमिति कल्प्यते, पुरुषप्रयत्ननैरपेक्ष्येण कार्यरूप-पापोत्पत्त्यनुपपत्तेः । न च पुंश्चल्पादिगतप्रयत्नेन पुरुषान्तरे पापोत्पत्तिः, कर्त्तृसमवायित्वनियमाद्धर्माधर्मयोः तस्माद्युक्तैव प्रायश्चित्ते निमित्तत्रयपरिगणना । तथा च मनुः (११/४४)-

अकुर्वन्विहितं कर्म निन्दितं च समाचरन् ।
प्रसक्तश्चेन्द्रियार्थेषु प्रायश्चित्तीयते नरः ॥ इति ।

'नर'ग्रहणं प्रतिलोमजातानामपि प्रायश्चित्ताधिकारप्राप्त्यर्थम् । तेषामप्यहिंसादिसाधारणधर्मव्यतिक्रमसम्भावात्, यस्मादेवं निषिद्धा-चरणादिना प्रत्यवैति तस्मात्तेन कृतनिषिद्धसेवादिना पुरुषेण प्रायश्चित्तं कर्त्तव्यमिह लोके परत्र च विशुद्ध्यर्थम् । प्रायश्चित्तशब्दश्चायं पापक्षयार्थे नैमित्तिके कर्मविशेषे रुढः । एवं प्रायश्चित्ते कृते अस्यान्तरात्मा शुद्धतया प्रसीदति लोकश्च संव्यवहर्त्तुं प्रसीदति । एवं वदतैतद्दर्शितम् । नैमित्तिकोऽयं प्रायश्चित्ताधिकारः, तथा

चार्थवादगतदुरितक्षयोऽपि जातेष्टिन्यायेन साध्यतया स्वीक्रियते । न च दुरितपरिजिहासुनानुष्ठीयत इत्येतावता कामाधिकारशङ्का कार्या । यस्मात् मनुना (११/५३) उट्टङ्कितम्-

चरितव्यमतो नित्यं प्रायश्चित्तं विशुद्धये ।
निन्द्यैर्हि लक्षणैर्युक्ता जायन्तेऽनिष्कृतैनसः ॥

इत्यकरणे दोषश्रवणेनावश्यकत्वावगमात् ।

प्रायश्चित्तमकुर्वाणाः पापेषु निरताः नराः ।
अपश्चात्तापिनः कष्टान्नरकान्यान्ति दारुणान् ॥

पापेषु शास्त्रार्थव्यतिक्रमजनितेषु प्रसक्ता पुरुषाः अपश्चात्तापिनो मया दुष्कृतं कृतमित्येवमुद्वेगरहिताः प्रायश्चित्तमकुर्वाणाः दुःसहान्नरकान् प्राप्नुवन्ति ।

पापस्य परिशोधनार्थं यदाऽस्माभिः प्रायश्चित्तस्य आलोचनं क्रियते, तदा प्रायश्चित्तमध्ये व्रतजपादिवत्तीर्थस्यापि पापक्षयत्व-नैमित्तिकमध्ये समागच्छति । स्मृतिष्वपि एतत्प्रतिपादितं विद्यते यथा संहिताजपपूर्वकं सरस्वत्याः प्रतिकूलगमनमपि च साक्षिप्रकरणे व्यवहाराध्याये प्राड्विवाकः साक्षिणं सम्बोधयति यद्दृष्टं यच्छ्रुतं च तत्सर्वं ममाग्रे सत्यं वद, अन्यथा पापं भविष्यति । पापक्षालननिमित्तं 'मा गङ्गां मा कुरुन्गम' इति । इत्यस्माद्वाक्यात् कुरुक्षेत्रदर्शनेन गङ्गास्नानेन वा पापक्षयो भवतीति स्मृतिकाराणां मतम्। अत एव धर्मशास्त्रपुराणानां पर्यालोचनेन प्रायश्चित्तस्यानुशीलनेन तीर्थस्य सुमहत् योगदानं बहुप्राचीनकालाद् विद्यते। अतः यद्यपि प्रायश्चित्तेन अकामकृतस्य पापस्य विशोधनं भवति । किन्तु तीर्थाचरणेन अकामकृतस्य कामकृतस्य रहसिकृतस्य पापस्य विशोधनं भवतीति सुमहान् विचारः शास्त्रेषु दरीदृश्यते । पापक्षयनिमित्तं तीर्थाचरणम् अनिवार्यमिति नास्ति काचित् विप्रतिपत्तिः।

उत्कले प्रतिमण्डलं तीर्थक्षेत्राणां नामानि तेषामैतिह्यं माहात्म्यं शास्त्रीयत्वञ्च

उत्कलशब्दार्थः उड्र-कलिङ्ग-उत्कलशब्दानां विमर्शश्च—

भगवता परंब्रह्मणा विरचितं जगदिदं नितरां वैचित्र्यपूर्णं विभाति। जगतः सृष्टिविषये विभिन्नानि मतानि श्रीमद्भिः प्रेक्षावद्भिः समालोचकैश्चावलोक्यन्ते । अस्मिन् प्रसङ्गे सृष्टिसर्जनविषये अस्माकं धर्मशास्त्रे एकमेव मतं धर्मशास्त्रकारैः स्वीक्रियते । यतो हि आदिधर्मशास्त्रकारेण भगवता मनुना तस्य धर्मशास्त्रे प्रथमाऽध्याये अधुनोपलब्धे मनुस्मृतिग्रन्थे सृष्टिप्रकरणविषये बहुचर्च्चा विहिता । एतन्मतमस्माभिः धर्मशास्त्रपरम्परानुगामिभिः अवश्यमेव ग्रहीतव्यम्। यतः-

'मन्वार्थविपरीता तु या स्मृतिः सा न शस्यते' ।

इति सूक्त्यनुसारं मनुस्मृतेः मनुधर्मशास्त्रस्य वा प्राधान्यं प्राथम्यं व्यापकत्वं च नितरां सुतराञ्च वरीवर्त्तते। अर्वाचीनानामध्ययनाभाव-कारणात् यद्यपि जगतः उत्पत्तिविषये मनुमतस्य ग्रहणं न भवति, तथापीदं तावत् मतं वैज्ञानिकं तत्त्वपूर्णं बहुजनसमादृतं च भवति । डारउईन्प्रभृतीनां मतं तु कपोलकल्पितं भाति । अत एव-

'अप एव ससर्जादौ तासु वीजमवासृजत् ।'

इत्यस्मात् वाक्यात् सृष्टेः आदिमकाले जलस्यैव उत्पत्तिः सञ्जाताः। अतः तदनन्तरं तद् बीजं च सहस्रांशु समप्रभं हैममण्डं सञ्जातम् । ततः तदण्डं भागद्वयं भूत्वा एकेन स्वर्गलोकः अपरेण अयं पृथिवीलोकः सञ्जातः । अस्मिन् तावत् लोके भारतवर्षस्य महानता सुसंस्कृतेः परिपूर्णता आस्तिकता इत्यादिगुणेन अयं देशः प्राचीनकालादारभ्य अद्यावधि सुविख्यातो वर्त्तते। अस्मिन् भारतवर्षे

बहवः प्रदेशाः शासनसौकर्यार्थं निरूपिताः आसन्। अयं च भारतदेशः बहुप्राचीनकालाद् वर्त्तते इति इतिहासपुराणानां पर्यालोचनेन अस्माभिः अवकलयितुं शक्यते । अस्मिन् भारतवर्षे बहुविधेषु प्रदेशेषु राज्येषु वा उत्कलस्य कलिङ्गस्य उड्रस्य त्रिकलिङ्गस्य च नितरां प्राधान्य-मासीत्। यतो हि सर्वप्राचीनस्मृतिः मनुस्मृतिः, तत्र स्मृतौ एतेषां देशानां नामग्रहणमपि च ब्रह्मादिपुराणेषु आदिकाव्ये रामायणे, महाभारते, पुनश्च महाकविकालिदासकृतरघुवंशमहाकाव्ये एतेषां त्रयाणां देशानां नामग्रहणं समालोचकानां दृष्टिपथम् आकर्षयति । अतः मूढमतिना मया किञ्चिदत्र अस्य देशत्रयस्य प्राचीनतादिविषये ऐतिहासिकानां व्यासादिपौराणिकानां मतानि संगृह्य विचार्यते ।

स्वाधीनोत्तरभारतवर्षे ओडिशा इति यः भूभागः प्रदेशः अस्माभिः अवलोक्यते नायं भागः प्राचीनकाले एतावता परिमाणेन आसीत् । अपि तु उत्तर-दक्षिण-पश्चिमदिग्भागे देशस्यास्य परिसीमा बहुदूरं यावत् परिव्याप्ता विस्तृता चासीत् । अस्योत्कलस्य अयं तावत् अर्थः उत् कलिङ्ग अथवा उर्ध्वमथवा उत्तरकलिङ्ग अथवा उत्खाता उत्कृष्टाः कलाः यस्मात् स एव उत्कलः । अतिप्राचीनकाले कलिङ्गनाम्ना एकं सुबृहद्राज्यं बहुविभवयुक्तं, बहुवीरत्वपूर्णं चासीत्। तदेव राज्यं समान्यतः भागत्रयेण विभक्तमासीत् । यथा दक्षिणभागः दाक्षिणात्यम्, मध्यभागः कलिङ्गभागः, उत्तरभागः उत्तरकलिङ्गः अथवा उत्कलदेशः आसीत् । प्राचीनकाले राजानः शासनं चक्रुः । एतेषां राज्यशासनसौकर्यार्थमस्य सुविस्तृतराज्यस्य दक्षिणभागः वंशधारा नदीतः गोदावरीनदीं यावत् मुख्यकलिङ्गदेशः इति अभिहितो जातः । अस्य देशस्य राजधानी कलिङ्गपत्तनम्, 'कलिङ्गपाटणा' वा आसीत् । ऋषिकुल्यानदीतः वंशधारापर्यन्तं भूभागं मध्यकलिङ्ग आसीत् । अस्य राजधानी प्राचीनकाले समाप अथवा जउगड इति

आसीत् । केषाञ्चनमते अस्य समापस्य नामान्तरं सोमपेटा अथवा सोमपेण्ठ इति समालोचकाः विचारयन्ति । उत्तरकलिङ्ग अथवा उत्कलदेशः ऋषिकुल्यानदीतः उत्तरस्यां गङ्गानदीं यावत् सिंहभूमि-मेदिनीपुरम्, वाङ्कडामण्डलं सुव्याप्य आसीत् । अस्य भूभागस्य राजधानी एक प्रस्तर अथवा तोषाली आधुनिकभुवनेश्वरस्य निकटवर्त्ती खण्डगिरि, धवलगिरि, मध्यवर्त्तिस्थानम् इतिहासेषु अस्य भागत्रयस्य भूखण्डस्य समुदायः कदाचित् त्रिकलिङ्ग इति नाम्ना अभिहित आसीत् ।

मनुमहाराजस्य पौत्रः सुद्युम्नस्य पुत्रः उत्कलनामधेयः राजा आसीत् । स यस्मिन् भूभागे राजत्वमकरोत् तस्यैव भूभागस्य संज्ञा उत्कल आसीत् । अस्यैव महाराजस्य नामानुसारं भूभागस्यास्य नामकरणं सञ्जातमिति मत्स्यपुराणं वदति । उत्कलस्य कलाविद्या अतीव प्रसिद्धा विशिष्टा चासीत् । अस्मिन् विषये वङ्गीयाः पण्डिताः पाश्चात्य-समालोचकाश्च मुक्तकण्ठेन गुणकीर्त्तनं कुर्वन्ति । अतः तत्र भवन्तः विद्वांसः प्रायशः स्वीकुर्वन्ति ।

यस्य देशस्य कलाकुशलता समुत्कृष्टा तस्य देशस्य नाम उत्कल इति समीचीनम् नामकरणम् । त्रिविडात् मत्स्यवंशीय राज्ञः अर्जुनस्य ताम्रशासनं प्राप्तमस्ति । तस्मात् सुविज्ञातं भवति यत् तदानीन्तनस्य उत्कलस्य राज्ञः एकमात्र कन्यायाः पद्मावत्याः मृत्युमार्त्तण्डः विवाहं चकार । ततः तमेव जामातारं मृत्युमार्त्तण्डम् उडवाडि अथवा उड्रदेशनामकं स्थानमपि राजत्वकर्त्तुं समर्पयामास। उत्कलस्य राजा अपुत्रिकः आसीत् तस्यैव राज्ञः मरणानन्तरं मृत्युमार्त्तण्डः तदानीन्तनकाले उत्कलस्य राजा अभूत् । अहं चिन्तयामि तदानीन्तनकाले उत्कल अथवा उडवाडि ओडिशा नाम्ना कथितो जातः । अपरश्च उड्रनामकः कश्चन राजा उत्कले शासनं

कृतवान् । स एव उड्रः चन्द्रवंशीयः क्षत्रियः आसीत् । महाभारताद्विज्ञायते उड्रराजा पाण्डवेभ्यः हस्तिदन्तान् उपढौकनरूपेण दत्तवान् । अधुनातन उत्कलस्य नानास्थानेषु विशेषतः खोर्द्धा-मण्डलान्तर्गते अद्यापि उड्रवंशीयाः दृष्टिगोचरीभूताः भवन्ति । त एव जनाः आत्मानम् उड्र इति परिचयं प्रयच्छन्ति । अतः ते उड्राः उड्रराजवंशीया इति स्पष्टीभवति । एते उड्राः युद्धविद्यायामत्यन्तं पारङ्गताः आसन् । एतेषां प्रधानकर्म भवति युद्धकर्म । अद्यापि एतेषां देशाचारे, व्यवहारे च पूर्वगुणवशात् युद्धविद्यायाः क्षीणाभासः अस्माभिः अवलोक्यते । अतः तद्दिनमधुना नास्ति । स रामो नास्ति । सा अयोध्यापि विनष्टा सञ्जाता । उत्कलस्य भाग्यलक्ष्मी अन्तर्हिता विलीना च विद्यते । एतेषाम् उड्रानामपि का कथा अशीबलेन येषां जीवनयापनमतीव रमणीयं विलासपूर्णश्चासीत्, तेषामेव भाग्ये कृषिजीवनं संघटितम् । यद्यपि क्षत्रियत्वस्य विलोपः सञ्जातस्तथापि एते वास्तविकतया जात्या क्षत्रियाः भवन्ति ।

कलिङ्गस्य नाम समेषां सुविदितमेव । अङ्ग-वङ्ग-कलिङ्ग नाम अतिप्राचीनमित्यत्र नास्ति काचित् विप्रतिपत्तिः । उत्कलदेशः कदा कलिङ्गस्य अन्तर्गतः कदा वा पृथक् सञ्जातः इत्यस्मिन् विषये ऐतिहासिकानां विदुषां समालोचकानां विवादः अद्यापि न चूर्णीभूतः । कविताकामिनीविलासकालिदासः विश्वप्रसिद्धः महाकविः स्वकीये अद्वितीये रघुवंशमहाकाव्ये रघुकुलावतंशस्य महाराजस्य रघोः दिग्विजयवर्णनावसरे वर्णितवान् यत्-

'उत्कला दर्शितः पथः कलिङ्गाभिमुखं ययौ ।

इति एतेन वचनेन कलिङ्गोत्कलयोः भेदः सम्यक् प्रतिपादितो भवति । कलिङ्ग बलिमहाराजस्य पुत्रः आसीत् । तस्याधिकृतं राज्यं कलिङ्गनाम्ना अभिहितमासीत् । वङ्गदेशस्य समुद्रतीरवर्त्तिराज्यात्

तैलङ्गपर्यन्तस्य स्थानविशेषस्य नाम कलिङ्गमासीत् । तथैव आदिकाव्ये वाल्मीकिरामायणे किष्किन्धाकाण्डे, महाभारतस्य वनपर्वणि हरिवंशप्रभृतिषु उपादेय ऐतिहासिकतथ्यसम्बलितप्राचीन-ग्रन्थेषु कलिङ्गशब्दस्योल्लेखो दृश्यते । कलिङ्गदेशे पुण्यतोया वैतरणीनदी प्रवाहिता भवतीति इतिहासपुराणानां पर्यालोचनेन समालोचकानां मतम्। सुतरां स्वाधीनतोत्तरभारतस्य यः ओडिशाभूभागः तदानीन्तनकाले कलिङ्गस्य अन्तर्गत आसीत् इति नास्ति कश्चन सन्देहस्य लेशावसरः। हरिवंशमतानुसारं कलिङ्गताम्रलिप्तस्य समीपवर्त्ती आसीत् । कलिङ्गनृपतिः महाभारतस्य विश्वप्रसिद्धस्य युद्धस्य दुर्योधनस्य पक्षे युद्धं कृतवानिति प्रतिपादितं विद्यते । अस्मिन्नेव विषये महाभारतस्य भीष्मपर्वणि अपि एतत् सुविस्तृतं प्रतिपादनं विद्यते । प्राचीनशिलालिपीनामनुशीलनेन अपरस्य कलिङ्गोत्कल-उड्र्व्यतिरिक्तस्य त्रिकलिङ्गाख्यस्य विषये सम्यग् आभासः प्राप्यते । कनिंहाम्महोदयानां मतानुसारं त्रिकलिङ्गशब्दात् तेलङ्गनामकरणं सञ्जातम् । हुएन्सां महोदयानां मतानुसारं कलिङ्गदेशः गञ्जाममण्डलात् ३०० माइल दूरे अवस्थितः आसीत् । कलिङ्गस्य राजधानी सिकाकुलमासीत् । उत्कलः कलिङ्गस्य उत्तरस्यां दिशि अवस्थितः आसीत् । उत्तरकलिङ्गः अथवा उत्कलिङ्गः कालक्रमेण उत्कलनाम्ना परिणतो जातः इति स्पष्टमनुमीयते।

दीर्घतमायाः कृपाबलेन बलिराजस्य भार्या सुदेष्णायाः गर्भे पञ्चपुत्राः सञ्जाताः । तेषां नामानि अङ्ग-वङ्ग-कलिङ्ग-कुण्ड तथा च सुह्मः। एते प्रत्येकं स्वकीयस्य राज्यस्य स्वनामानुसारं राज्यानामपि नामकरणं चक्रुः। दुर्योधनः कलिङ्गराजस्य चित्राङ्गदस्य कन्यायाः विवाहं कृतवान्। तदानीन्तनकाले कलिङ्गराजस्य चित्राङ्गदस्य

राजधानी राजमाहेन्द्रीस्थाने आसीत् । महाभारतस्य वनपर्वानुसारं यदा युधिष्ठिरः वनवासं कृतवान् तदा लोमशमुनिः तं कथितवान् यत् वैतरणिप्रवाहिते प्रदेशे धर्मदेवः यज्ञं कृतवानिति । अतः तदेव स्थानं तस्मादेव कालात् यज्ञपुरनाम्ना सुप्रसिद्धं भवति । अद्यापि अपभ्रंशतया अस्य स्थानस्य नाम याजपुरमिति । अपि च एतदेव स्थानं कलिङ्गप्रदेशे आसीत् । उत्कलप्रदेशस्य प्राचीनता सम्बन्धे केचन लेखकाः, समालोचकाः ऐतिहासिकाश्च संदिग्धाः भवन्ति । मादलापाञ्जि इति उत्कलस्य प्राचीनग्रन्थाद्विज्ञायते यत् युधिष्ठिर ख्री.पू. ३१०१ संवत्सरात् ३०८९ संवत्सरपर्यन्तं राजत्वं कृतवान् । महाभारते उत्कलस्य नामोल्लेखों भवति। महाभारतस्य प्राचीनतया सह उत्कलस्य प्राचीनता संश्लिष्टा विद्यते । अतः उत्कलस्य विषये प्रतिपादयितुं महाभारतस्य विचारः कर्त्तव्यः । महाभारतस्य कालनिर्णयप्रसङ्गे पाश्चात्यानां पण्डितानां तथा च भारतीयानां पण्डितानां मध्ये मतभेदो दृश्यते । पाश्चात्यपण्डिताः कोल्वृक्, उईल्सन्, एल्फिन्, स्टोन्प्रभृतयः ख्री.पू. चतुर्दशशताब्द्यां महाभारतस्य युद्धमभूत् इति प्रतिपादयन्ति । रमेशचन्द्रमहोदयानां मते ख्री.पू. त्रयोदशशताब्द्यां महाभारतयुद्धमभूत् । परन्तु कलिद्वापरयोः योगयोः सन्धिकाले अर्थात् पञ्चसहस्राधिकवर्षेभ्यः प्राक् कुरुपाण्डवयोर्मध्ये विश्वप्रसिद्धं महाभारतयुद्धमभूदिति । पृथिवी इतिहासस्य लेखकः एतेषां मतानां सुविस्तृतमालोचनं कृत्वा सिद्धान्तयति यत् 'एतत् पर्यन्तं ये केचन समालोचकाः एतस्मिन् विषये यत् किमपि आलोचयन्ति ते सर्वेऽपि शाखातः मूलं गच्छन्ति परन्तु न कोऽपि मूलतः शाखां विचारयति । उत्कलप्रदेशस्यास्य प्राचीनता सम्बन्धे समालोचकानां प्रायशः वैमत्यं नैव दृष्टिगोचरीभूतं भवति। भगवतः करुणावरुणालयस्य नीलकन्दर-नाथस्य जगन्नाथस्य श्रीमन्दिरे प्रचलितायां मादलापञ्जिकायां

उल्लेखोऽस्ति इमां भूमिं धर्मराजेन युधिष्ठिरेण शशास । पृथिवीतिहास-कारमतेन महाभारतयुद्धस्य कालो भवति पञ्चसहस्रवर्षात् प्राक् । यदा द्वापरकलियुगयोः कालयोः सन्धिकालो अभूत् । तस्मिन् महाभारते यदा उत्कलशब्दस्य उल्लेखो दृश्यते तदा देशस्यास्य प्राचीनताविषये न कश्चन सन्देहस्य लेशावसरो विद्यते । हरिवंशेऽपि देशस्यास्य विषये उल्लेखो दृश्यते । यथा-

सुद्युम्नस्य तु दायादास्त्रयः परमधार्मिकाः ।
उत्कलश्च गयश्चैव विनताश्वश्च भारत ॥
उत्कलस्योत्कला राजन् विनताश्वस्य पश्चिमा ।
दिक् पूर्वा भारतश्रेष्ठ गयस्य तु गयापुरी ॥

पुराणेषु जम्बुद्वीपान्तर्गतभारतवर्षवर्णनप्रसङ्गे कलिङ्ग-उड्रनामोच्चारणं बहुवारं विद्यते । सर्वत्र पुराणादिषु मनुनामश्रवणात् मनुमतस्य सर्वप्राचीनता विद्यते । रामायणे बालीप्रश्नप्रसङ्गेऽपि रामचन्द्रेण मनुश्लोकः समुदाहृतः अर्थात् सर्वप्राचीनोऽयं मनुः उड्र-उत्कलीयानां देशानामुल्लेखो कृतः ।

कपिलसंहितायाम्—

वर्षाणां भारतः श्रेष्ठो देशानामुत्कलः श्रुतः ।
उत्कलस्य समो देशो देशो नास्ति महीतले ॥

मनुस्मृतौ (१०/४४)—

पौण्ड्रकाश्चौड्रद्रविडाः काम्बोजाः यवनाः शकाः ।
पारदाः पह्लवाश्चीनाः किराताः दरदाः खसाः ॥

स्कन्दपुराणे साह्याद्रिखण्डे—

सारस्वताः कान्यकुब्जा उत्कलाः मैथिलाश्च ये ।
गौडाश्च पञ्चधा चैव पञ्चगौडा प्रकीर्त्तिताः ॥

ब्रह्माण्डपुराणे—

तत्रास्ते भारते वर्षे दक्षिणोदधि संस्थितेः ।
उड्रदेश इति ख्यातः स्वर्गमोक्षप्रदायकः ॥
समुद्रादुत्तरे तीरे यावत् विरजमण्डलम् ॥

स्कन्धपुराणे—

ऋषिकुल्यां समासाद्य यावत् वैतरणी नदी ।
तीर्थयात्रा विना गच्छन् पुनः संस्कारमर्हति ॥

त्रिकाण्डशेषे—

उड्र उत्कलनामानो मगधाः कीकटा मताः ।

बृहन्नृसिंहपुराणे—

पुरुषोत्तमात् परं क्षेत्रं नास्त्यत्र पृथिवीतले ।
भूस्वर्गमिति विख्यातं देवानामपि दुर्लभम् ॥

शिवपुराणे—

अयोध्या मथुरा गया काशी काञ्ची ह्यवन्तिका ।
पुरी द्वारावती चैव सप्तैताः मोक्षदायिकाः ॥
सीमामुत्कलदेशस्य विभजन्ति वनान्तरे ।
मार्गस्थां चण्डिकां प्राप्य चर्च्चितं मुण्डमालया ॥
पुरुषोत्तमात्परं क्षेत्रं नास्त्यन्यद् भवमोचनम् ।
यत्र साक्षात् परंब्रह्म दारुव्याजशरीरभृत् ॥

भीष्मपर्वणि (९/५१)—

किराताः वर्वराः सिद्धाः विदेहास्ताम्रलिप्तकाः ।
उड्राः म्लेच्छाः ससेरिन्ध्राः पार्वतीयाश्च मारीषः ॥

सभापर्वणि (३१/११)—

पाण्ड्यंश्च द्राविडाश्चैव संहितांश्चोड्रकेरलौ ।
आन्ध्रां तालवनां चैव कलिङ्गानुष्टकर्णिकान् ॥

सभापर्वणि (३१/५१)—

चीनांश्चकास्तथा चोड्रान् सर्वरान् वनवासिनः ।

वनपर्वणि (५१)—

सवङ्गान् सपौण्ड्रांश्च सचोलद्राविडीककान् ।

यत्र सर्वान् महीपालान् शस्त्रतेजो भयार्दितान् ॥

किष्किन्धाकाण्डे (४१)—

ततो गोदावरीं नद्यां कृष्णवेण्यां महानदीम् ।

मेलानुत्कलांश्चैव दशार्णनगराण्यपि ॥

तथा मत्स्याः कलिङ्गाश्च कौशिकाश्च समन्ततः ॥

उत्कलमाहात्म्ये—

जगन्नाथप्रान्तदेश उत्कलः परिकीर्त्तितः ॥

शक्तिसङ्गमतन्त्रे—

जगन्नाथात् समारभ्य कृष्णशिरान्तगः शिवे ।

कलिङ्गदेशः संप्रोक्तो वाममार्गः परायणः ॥

स्कन्दपुराणे—

उड्रदेश इति ख्यातो वर्षे भारत संज्ञीतम् ।

दक्षिणस्योदधेस्तीरे क्षेत्रं श्रीपुरुषोत्तमम् ॥

तत्र नीलगिरिनाथ समन्तात् काननावृत्तम् ।

तस्य पश्चादतिख्यातं कुण्डं रोहिणी संज्ञीतम् ॥

द्रोणपर्वणि—

उत्कला मेखलाः पौण्ड्राः कलिङ्गाश्रयसंयुगे ।

निषाद्रश्च त्रिगर्भाश्च वाक्हकाश्च जितास्तथा ॥

बृहत्संहितायाम्—

उदयगिरि भद्रगोडक पौण्ड्रो सोत्कलः

काशीमेककम्बष्ठा ताम्रलिप्तकः ।

कोशलकवर्द्धमानश्चाज्ञायां

विशिकोशल कलिङ्ग वङ्गोपवङ्गराङ्ग ॥ इत्यादिः ।

केचन समालोचकाः देशस्यास्य सभ्यतां संस्कृतिं कला-भास्कर्यं भक्तिवैभवं साहित्यशिक्षां प्रति ईर्षान्विताः भूत्वा अस्य देशस्य विरोधगानं कुर्वन्ति । परन्तु तत्सर्वमपि भारतीयसंस्कृतेरुन्नायकरूपाणि विराजन्तेतरां तानि सर्वदैव उत्कलस्य माहात्म्यं प्राधान्यं वैशिष्ट्यं च समुद्वहन्ति । यदि कदाचित् हण्टरमहोदयेन अनभिज्ञताकारणात् अयं देशः पापीनां देश इति वर्णितमिति । तत्तु निर्मूलतया तदुज्झितं भवति । मयात्र प्रसङ्गे एतादृशानां पण्डितानां मतविरोधपुरःसरं प्राचीनानां वाग्देवताऽवतारभूतानां पण्डितानां मतमुपस्थापनं क्रियते । एतद्वाक्यात् उत्कलस्य महत्त्वं नितरां प्रकाशितं भवति । अज्ञताकारणात् यदि कश्चित् कस्यापि विरोधं करोति न तेन स देशः हीनो भवेत् । शास्त्रोक्तानि प्रमाणानि क्रमशः मया उपस्थाप्यन्ते ।

महाभारते—

उत्कलादर्शितपथः कलिङ्गाभिमुखं ययौ ।
श्रियं महेन्द्रनाथस्य जहार न तु मेदिनीम् ॥
ततः समुद्रतीरेण जगाम वसुधाधिपः ।
भ्रातृभिः सहितो वीरः कलिङ्गान् प्रति भारत ॥
तस्योत्कलो गयो राजन् विमलश्च त्रयः सुना ।
दक्षिणगणराजानो बभूवुर्धर्मवत्सलाः ॥

स्कन्दपुराणे—

सागरस्योत्तरतीरे महानद्यास्तु दक्षिणे ।
सप्रदेशं पृथिव्यां हि सर्वतीर्थफलप्रदः ॥

तन्त्रयामले—

भारते चोत्कले देशे भूस्वर्गे पुरुषोत्तमे ।
दारुरूपी जगन्नाथो भक्तानामभयप्रदः ॥

ब्रह्मपुराणे—

विरजे विरजा नाम ब्रह्मणा सम्प्रतिष्ठिता ।
यस्याः सन्दर्शने मर्त्यः पुनात्यासप्तमं कुलम् ॥

ब्रह्माण्डपुराणे—

सन्ति तीर्थानि पुण्यानि पुण्यस्यायतनानि च ।
उत्कले तु मुनिश्रेष्ठो वेदितव्यानि तानि वै ॥
समुद्रस्योत्तरे तीरे तस्मिन् देशे द्विजोत्तमः ।
आस्ते पुण्यं परं क्षेत्रं मुक्तिदं पापनाशनम् ॥
धन्यास्ते विविधप्रख्या ये वसन्त्युत्कले जनाः ।
तीर्थराजजले स्नात्वा पश्यन्ति पुरुषोत्तमम् ॥
स्वर्गे वसन्ति ते मर्त्या न वसन्ति यमालये ॥

रघुनन्दनः—

तत्रास्ते भारते वर्षे दक्षिणोदधिसंस्थितः ।
उड्रदेश इति ख्यातः स्वर्गमोक्षप्रदायकः ॥

कूर्मपुराणे—

सिंहादौ देवदेवेशं वैकुण्ठं मागधे वने ।
सर्वपापहरो विन्ध्ये उड्रे श्रीपुरुषोत्तमम् ॥

भारतस्य प्राचीनसभ्यता सर्वेषां विश्ववासिनां स्वीकार्या भवति । भारते प्राचीनकाले मुख्यतः हिन्दुजातीनां यादृशी शिक्षा-संस्कृति-सभ्यता-परम्परा हिमालयस्य शिखरमिव विश्वस्य सर्वोत्कृष्टाऽसीदिति न काचित् विप्रतिपत्तिः । हण्टरसाहेवसदृशाः ये केचन पाश्चात्त्याः पण्डिताः इमां संस्कृतिं सभ्यतां च अङ्गुलिनिर्देशं

कुर्वन्ति त एव सर्वेषां शास्त्राणामध्ययनं विना एवं भूतं मन्तव्यं प्रदत्तवन्तः । अस्माकं भारतीयसाहित्यस्य मुख्याङ्गानि वेदस्मृति-पुराणादीनि शतसहस्रवर्षेभ्यः प्राक् विरचितानि आसन् । यदि कश्चित् समालोचकः प्राच्यदेशीय भवतु वा पाश्चात्त्यदेशीयो भवतु कामपि गवेषणां कर्त्तुं वाञ्छति एतेषां समेषां शास्त्राणाम् अध्ययनं विना न कदापि स सफलकामो भवति । अतः अस्माकं पितापितामह-प्रपितामहवृद्धप्रपितामहादीनां या संस्कृतिः या च परम्परा तामुपरि यदि कश्चित् कुठाराघातं करोति तर्हि तत्र मुक्तकण्ठेन विरोधः कर्त्तव्यः । येन म्लेच्छानां यवनानां सुशिक्षाप्राप्तिर्भवेत् । यतो हि बहुवर्षात् प्राक् मनुना (२/२०) प्रतिपादितं यत्-

एतद्देशप्रसूतस्य सकाशादग्रदजन्मनः ।
स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः ॥

१५८० ख्रीष्टाब्दे मोगलराजस्य चूडामणि आकवरः स्वकीयं प्रधानमन्त्रिणं शिवाजी जयसिंहं बहुसैन्यैः उत्कलविजयाय प्रेषितवान्। परन्तु जयसिंहः युद्धमकृत्वा प्रत्यागतवान् । यतो हि अस्मिन् प्रदेशे पुण्यतोया महानदी असंख्यदेवालयः ब्राह्मणानां नित्यकर्म, भास्कर्यपूर्णानि मन्दिराणि दृष्ट्वा स विमुग्धोऽभूत् । प्रत्यावर्त्तनं कृत्वा आकवराय निवेदितवान् यत् स एव देशः संग्रामयोग्यो नास्ति। तत्र सर्वेषु प्रान्तेषु विभिन्नानि तीर्थानि मन्दिराणि देवखातानि भास्कर्यपूर्णानि मन्दिराणि विद्यन्ते यत्र एवंभूतं संस्कृतिरूपं स्थानं वर्त्तते न कदाचिद् स देशः स्वर्गादपि न्यूनं भवति।

एतेषां समेषां प्रमाणानां पर्यालोचनेन उत्कलस्य प्राचीनता, पवित्रता, सुशिक्षा, सुपरम्परा, सुसंस्कृतिः, सुसभ्यतादिविषये बहुनि प्राचीनप्रमाणानि समालोचकानां हस्तगतानि भवन्ति । ये केचन सर्वेषामनवलोकनं कृत्वा लेखनीधारणपूर्वकं यत् किमपि स्वकल्पना

प्रसूतमनुमाननिर्भरो भूत्वा अवहेलया लिखन्ति ते न कदाचिदपि समालोचकपदवाच्याः भवन्ति । परवर्त्तिनः समालोचका अपि अर्वाचीनकाले न तेषां मतं स्वीकरिष्यन्ति ।

उत्थानपतनं तु प्रकृत्याः नियमः । न कश्चिद्देशः चिरकालं यावत् चन्द्रार्कोन्नतो भूत्वा तिष्ठति । अनेके प्राचीनसभ्यदेशाः अद्य भूगर्भे विलीनाः सञ्जाताः । अनेकस्य देशस्य सभ्यतायाः लेशोऽपि न विद्यन्ते । अनेके असंस्कृतिसम्पन्नाः देशा अधुना सुसभ्यतायाः चरमं सोपानमधिरोहन्ति । उत्कलस्य भाग्यमपि एतादृशं यस्य अवलीलाक्रमे सर्वं विनष्टमगात् । परन्तु धनं शौर्यं विनष्टं भवतु नाम एतस्य गौरवं नाद्याऽपि विनष्टम् । अधुना अपि बहवः पापीतापि-मुमुक्षुपिपासवः जनाः उत्कलं शान्तिलाभाय आगच्छन्ति । अत एव उत्कलस्य पुरातत्त्वं महनीयत्व-माध्यात्मिकत्वं च नितरां सर्वोत्कृष्टमेव भवति ।

प्राचीनोत्कलस्य भौगोलिकी स्थितिः ऐतिह्यं संस्कृतिश्च—

उत्कलस्य प्राचीनता सम्बन्धे यदा समालोचकाः किमपि पर्यालोचनां कुर्वन्ति तदा कलिङ्गस्य नाम स्वत एव समागच्छति । परन्तु उड्र-उत्कल-कलिङ्गानां स्थितिः भिन्ना आसीत् । स्वाधीनोत्तरभारतवर्षे तस्याः परिसीमायाः ग्रहणं न भवति । अतः उडिशाप्रदेशनाम्ना यः भूखण्डः अस्माभिः अवलोक्यते स भूभागस्तु बहु कर्त्तितः अशीरपादो वर्त्तते । परन्तु प्राचीनकाले पुराणे धर्मशास्त्रे रामायणे महाभारते रघुवंशे शक्तिसङ्गमतन्त्रे दिग्विजयप्रकाशादिग्रन्थे प्राचीनोत्कलस्य नामदर्शनं पुरःसरं देशस्यास्य गौरवं बहुधा प्रतिपादितम् । रामायणे कलिङ्गः तथा च कलिङ्गपदस्यापि प्रयोगो दृश्यते । किस्किन्धाकाण्डस्य वर्णनानुसारं यदा भरतः अयोध्यातः मातुलायं गच्छति तदा मार्गे कलिङ्गनाम्ना कश्चन जनपदः आगच्छतीति

वाल्मीकिः प्रतिपादयति । परन्तु कलिङ्गस्तु भारतस्य दाक्षिणात्य-प्रदेशरूपेण अवस्थितः आसीत् । रामायणवर्णनानुसारं भरतः मातुलालयात् अयोध्यां प्रति प्रत्यागमनकाले एकशकनामक ग्रामस्य समीपे स्थणुमती नाम्नी नदीमुत्तीर्य विनतग्रामं प्रविष्य तत्र गोमतीनाम्नी नदीं च उत्तीर्य कलिङ्गनगरे उपस्थितोऽभूत् । अस्माभिः विज्ञायते गोमती अयोध्याभ्यन्तरे अवस्थिताऽभूत् । श्रीरामचन्द्रस्य यज्ञाश्वकलिङ्गदेशे सम्मानितः अभूत् इति पद्मपुराणात् विज्ञायते । सावरमतीकूले सुरथराजेन सह समाधिनामको वैश्यः भगवत्याः दुर्गायाः उपासनां चकार। अस्यैव वैश्यस्य पितामह विरोधः कलिङ्गस्य राजा अभूदिति ब्रह्मवैवर्त्ताद्विज्ञायते । महाभारतस्य वनपर्वणि युधिष्ठिरस्य वनभ्रमणकाले कलिङ्गस्य नामोल्लेखो वर्त्तते । तत्र लोमशमुनिना एवमुदाहृत्य प्रतिपादितम्—

एते कलिङ्गाः कौन्तेय यत्र वैतरणी नदी ।
यत्राऽयजद्धर्मोऽपि देवाश्चारणमेत्य वै ॥

हरिवंशानुसारम् 'अङ्गाश्च कलिङ्गस्ताम्रलिप्तकाः' अस्मादेव वाक्यात् याजपुरं यावत् कलिङ्गस्य अवस्थितिः कलिङ्गस्य समीपे ताम्रलिप्तोऽपि आसीत् । कालिदासानुसारमुत्कलस्य सीमान्तवर्त्ती कलिङ्गः आसीत्। यथा रघुवंशे (४/३८/४३)—

उत्कलदर्शितपथः कलिङ्गाभिमुखं ययौ ।
श्रियं महेन्द्रनाथस्य जहार न तु मेदिनीम् ॥

शक्तिसङ्गमतन्त्रेऽपि—

जगन्नाथात्पूर्वभागे कृष्णातीतान्तगं शिवे ।
कलिङ्गदेशः सम्प्रोक्त राममार्गः परायणः ॥
कलिङ्गदेशमारभ्य पश्चाष्टयोजनं शिवे ।
दक्षिणस्यां महेशानि कलिङ्गः परिकीर्त्तितः ॥

दिग्विजयप्रकाशग्रन्थे च एतस्य देशस्य विषये उल्लेखो दृश्यते । यथा-

उड्रदेशादुत्तरे च कलिङ्गो विश्रुतो भुवि ।
तद्राज्यं भीमकेशस्य सर्वलोकेषु विश्रुतम् ॥

भुवनेश्वरस्य समीपवर्त्ती खण्डगिरि-पवित्रगात्रस्य शिलालिप्यां कलिङ्गस्य नाम वारत्रयमुल्लेखो वर्त्तते । शाक्यमुनेः कालः ख्रीष्टपूर्वं द्वितीयशताब्द्याः प्राक् इति पण्डिताः आमनन्ति । बुद्धदेवस्य परलोकानन्तरं कलिङ्गाधिपतिः बुद्धदेवस्य एकं दन्तमानीय तस्मिन् दन्तोपरि सुदृश्यं स्तुपं निर्मितवान् । तस्मात् कलिङ्गस्य राजधानी तदानीन्तनकाले दन्तपुरमासीत् । अस्मिन् दन्तपुरसम्बन्धे विभिन्नानि मतानि परिदृश्यन्ते । केचन उत्कलस्य परमपावनस्य जगन्नाथस्य पुरीक्षेत्रस्यापरं नाम दन्तपुरी इति कथयन्ति । अपरञ्च मतं पश्चिमवङ्गस्य मेदिनीपुरमन्तर्गत दान्तुन्-नगरं दन्तपुरमिति अथवा केचन दन्तवक्रगडमपि दन्तपुरी इति । अस्मिन् दन्तपुरे कलिङ्गस्य राजधानी अभूत् । यस्मात् प्राक् सिंहवाहो नाम्ना राजा सिंहपुरे कलिङ्गस्य राजधानीं प्रतिष्ठापयामास । बौद्धानां महावंशग्रन्थे अस्मिन् प्रसङ्गे उल्लेखोऽस्ति । केषांचित् मते सिंहबाहुपुत्रः विजयसिंहः सिंहलं वा लङ्कापुरीं जितवान् । सिंहवाहुनामानुसारं सिंहल इति सञ्जातम् । उत्कलस्य राजधानी सिंहपुरी गञ्जाममण्डलतः पश्चिमभागे ११५ माइलदूरे लागलानदीतीरे सिंहपुरस्य ध्वंसावशेषो मिलति ।

सत्य-त्रेता-द्वापर-कलिषु चतुर्षु युगेषु कलिङ्गस्य परिचयो सुस्पष्टो जायते। परन्तु अधुना कलिङ्गराज्यस्य अस्तित्वं न प्राप्यते । वङ्गस्य उत्कलस्य स्थितिः विद्यते ।-कलिङ्गजनपदो विलुप्तो वर्त्तते। अयं च कलिङ्गदेशः एकदा त्रिकलिङ्ग नाम्ना परिचितो अभूत् । दाक्षिणात्यस्य अधिकांशभागः कलिङ्गस्य विशालाङ्गस्य अङ्गीभूत आसीत् । देशस्यास्य सीमा गङ्गाकुलस्थ नवद्वीपनगरात् दक्षिणस्थ

गोदावरीं यावत् विस्तृताऽसीत् । अद्यापि आन्ध्रप्रदेशस्य बहुनि नगराणि प्राचीनकलिङ्गस्य नामानुसारं वर्त्तन्ते यथा राजमहेन्द्र, कलिङ्गपत्तनं, विशाखपत्तनं च । दुर्भाग्यस्यायं विषयः अद्य तादृशः देशो न विद्यते । उत्कलस्य भाग्यमधुना हीनं वर्त्तते । अद्य यः राजेन्द्रासने पूजितो वर्त्तते आगामिनी दिवसे स एव दरिद्रो भवेत् । तथैव दशा उत्कलस्य सञ्जाता।

कलिङ्गराज्ये गङ्गवाणी नाम प्रधाननगरम् आसीत् । सम्भवतः अस्मिन् स्थाने गङ्गादिकलिङ्गः अवस्थापितमासीत् । अधुना अपि पारलाखेमुण्डि इति स्थाने गङ्गावाडीग्रामो विद्यते । अयं ग्रामः पारलातः ९ माईल दूरे वर्त्तते । समालोचकानां मते गोकर्णेश्वरमहादेवः राज्यस्यास्य प्रधान इष्टदेवोऽभूत् । मञ्जुषातः २ माईल उत्तरस्यां दिशि महेन्द्राचलं विद्यमानम् । अस्मिन् पर्वतशिखरे गोकर्णेश्वरस्य अवस्थितिः । अतः अस्मिन्नेव प्रान्ते गङ्गवंशीयनृपतीनामादि-मवासस्थानमासीत् । भारतीयरेलसंस्थया स्थानस्यास्य नाम गङ्गबाला इति प्रदत्तम् । ताम्रशासने उपलब्धं भवति यत्-

धनकनकसमृद्धो गङ्गवाडी प्रसिद्धः ।
सकलविषयभूतं स्वर्गवर्गोपभोग्यः ॥
तदधिप इति ख्यातोऽनन्तवर्मा नृपेन्द्रः ।
समभवदिति रूपगङ्ग नाम्ना तदाद्यः ॥

वंशस्यास्य नाम रूपगङ्गमिति आसीत् । अनन्तवर्मा अस्य वंशस्य प्रथम राजा अभूत् । चोडगङ्गदेवः, अनङ्गभीमदेवः तत्परवर्त्तिराजानः अस्मिन् एव वंशे जन्मितवन्तः । पुरीस्थितः गजपतिवंशीयाः राजानः अस्मिन् वंशे सम्भूता आसन् । प्राचीनोत्कलः आगङ्गातः गोदावरीं यावत् विस्तृतोऽभूत् । महाराजः प्रतापरुद्रदेवः गोदावरीतः दक्षिणस्यां दिशि बहुदूरं यावत् उत्कलराज्यस्य विस्तारं कृतवान् । अत एव

कालक्रमे कलिङ्गः उत्कलस्य विशालाङ्गे स्वकीयां सत्तां विसर्जयामास। यदि कश्चित् समालोचकः कलिङ्गस्योत्कलस्य वा का तावत् प्राचीना सीमा आसीदिति अनुसन्धानं कुर्यात् तर्हि गोदावरीतः गङ्गां यावत् एकैव सीमा आसीदिति पर्यालोचनस्य सिद्धान्तो भवेत् । प्राचीनोत्कलस्य आचार-व्यवहार-भाषा अद्यापि सर्वं समानमस्ति । केवलन्तु राजनैतिकशासनसौकर्यार्थम् अस्य देशस्य सीमा खण्डिता सञ्जाता । कालक्रमेण आन्ध्रदेशस्य जना अपि अस्मिन् भूभागे वसतिं चक्रुः । परन्तु स देशस्तु उत्कलैवासीत्। कलिङ्ग-उत्कलयोर्मध्ये सुमहान् सम्बन्ध आसीत् । कालक्रमेण कलिङ्गः स्वनाम त्यक्त्वा उत्कले समाश्रितो आसीदिति न काऽपि अतिशयोक्तिः । विभिन्नानां पुराणानां पर्यालोचनेन तथा च श्रीजगन्नाथमन्दिरस्य मादलापाञ्जितः विज्ञायते उत्कलस्य स्थितिः स्वाधीना आसीत् । अयं देशः उत्कलराजानां शासनाधीनो भूत्वा गौरवमवाप्तवान् । यस्य देशस्य राज्ञः उपाधिरासीत् श्रीगजपति-गौडेश्वरनवकोटिकर्णाटोत्कलवर्गेश्वरवीराधिवीरवर इत्यादि । अस्मात् नवकोटिशब्दात् नवसंख्यकानां दुर्गाणां परिचयो मिलति । येषां नामानि कवि लक्ष्मणेन विरचिते तेलुगुभाषायां हिन्दुदेशकथासंग्रहग्रन्थे उदयगिरि, वीडु, कोण्डापल्ली, वेल्लामकोण्डा, नागार्जुनकोण्डा, अब्दाङ्क, अम्मानावुकु, ताङ्गेडु इति उपलब्धानि भवन्ति ।

गङ्गवंशावतंसस्य महाराजस्यानङ्गभीमदेवस्य शासनकाले आयतनं ३९४०७ वर्गमाइलपरिमितमासीत् । गङ्गवंशात् प्राक् उत्कलस्य दैर्घ्यं १८५ माइलपरिमितं प्रस्थं च ६० माइल-परिमितमासीत् । महाराजप्रतापरुद्रदेवस्य काले उत्कलस्य कलेवरम् अधिकमपि विवृद्धमासीत् । तेन स्वकीय-बाहुबलेन कुमारिका-अन्तरीपं यावत् स्वकीय उत्कलराज्यस्य सीमानिरूपणं कृतवान् ।

स प्रतापरुद्रस्य समसामयिकः रायरामानन्दः येन श्रीजगन्नाथवल्लभ-नाटकग्रन्थः व्यलेखि । यत्र एतादृशी वर्णना विद्यते—

यन्नामापि निशम्य संविविशते सेकन्दरकन्दरम् ।
स्ववर्गं कलवर्गभूमितिलकः साश्रुं समुद्वीक्षते ॥
मेने गुर्ज्जरभूपतिर्जरदिवारण्यं निजं पत्तनम् ।
वातव्यग्रपयोधिपोतगमिव स्वंवेद गौडेश्वरः ॥

अस्मिन् जगन्नाथवल्लभनाटके उत्कलस्य गजपतिमहाराजस्य नवकोटिकर्णाटोत्कलवर्गेश्वरवीराधिवीरवरप्रतापरुद्रदेवस्य प्रतापकीर्त्ति अधिकृतराज्यानां विषये वर्णनमस्ति । अस्मादेव उपरोक्तवचनात् प्रतापरुद्रदेवस्य नामश्रवणेन एव परिवारवर्गाणां नेत्रेषु अश्रुणि समागच्छन्ति। गौडदेशस्य राजा यथा घुर्णिवातेन समुद्रस्य पोतः विघ्नुर्णितो भवति तथैव शङ्काकुलो भूत्वा स तिष्ठति स्म ।

ष्टर्लिंमहोदयानां मते प्रतापरुद्रदेवः रामेश्वरस्य सेतुबन्धं यावत् सर्वाणि राज्यानि अजयत् । वङ्गीयसाहित्यपरिषत् पुस्तकालये प्राचीनभारतस्य मानचित्रमेकं वर्त्तते यत्र प्रतापरुद्रदेवस्य साम्राज्यं समालोचकानां मनांसि हृतान्यैव ।

अधुना उत्कलस्य सा परिसीमा विनष्टा वर्त्तते । ऐतिह्य-मितिहासपुराणादिषु वर्णितं वर्त्तते । प्राचीना संस्कृति विखण्डिता जाता, प्राचीनोत्कलस्य इतिहासं दृष्ट्वा यः कोऽपि संवेदनशीलः वैदेशिकः चिन्ताशीलो भवति, का कथा वा उत्कलीयानाम् ? अद्यापि विहारप्रदेशमध्ये केचनग्रामाः वङ्गप्रदेशमध्ये केचन जनपदाः तथैव आन्ध्रप्रदेशमध्ये केचन ग्रामाः अवलोक्यन्ते । यत्र उत्कलजनानां निवासः, उत्कलीय उत्सवाः उत्कलीयपरम्परा, उत्कलस्य संस्कृतिः अनुभूता भवन्ति। अतः निःसन्देहेन वक्तुमेतत् शक्यते तं तं भूभागं परिव्याप्य उत्कलदेशः आसीदिति । ष्टर्लिंमहोदयानां मतानुसार-

मुत्कलस्य सीमा एतादृशी आसीत् यत् उत्तरस्यां दिशि त्रिवेणीतः आरभ्य विशनपुरं संस्पृश्य पाटकुमं यावत् दक्षिणे गोदावरीं पूर्वे च हुगुलिनदीं संस्पृश्य आसमुद्रं पश्चिमे तु सिंहभूमिः, सोनपुरं, राजगाङ्गपुरं, सम्बलपुरं, वस्तराञ्चलं, मेदिनीपुरमिति अञ्चल-परिव्याप्य उत्कला भूमि गर्विता स्फिता चासीत्। अधुना या उत्कला भूमिः परिदृश्यमाना भवति सा तु नष्टकलेवरा भूत्वा क्षीणतामवाप । अङ्गच्छेदस्य विभिन्नानि कारणानि सन्ति । मुख्यतः यवनाः एव विशालकलेवरस्यास्य देशस्य शासनसौकर्यार्थं खण्डनं कृतवन्तः। १७२६ ख्रीष्टाब्दे हाइद्रावादस्य निजाममहोदयेन गञ्जाममण्डलस्य क्षमताशालीनां जनानामेकत्रीकरणं कृत्वा तेषां सहायेन चिलिकाह्रदस्य दक्षिणभागादेव समस्तभूभागः संगृहीतः । नवाव-सुजाउद्दिन् महम्मदखाँमहोदयेन राजस्वग्रहणसौकर्यार्थं जलेश्वरं यावत् अर्थात् सुवर्णरेखानदीं यावत् पूर्वभूभागः मूर्शिदावादस्य सर्वकार-स्याधीने संस्थापितः। अवशिष्टं क्षेत्रम् आलिवर्द्दिखाँ किञ्चित् पारिश्रमिकं गृहीत्वा मरहट्टामहोदयेभ्यः समर्पितवान् । मरहट्टानाम-नन्तरमाङ्गलानामयं भागः हस्तगतो जातः । मद्रासग्रहणानन्तर-माङ्गलानां दक्षिणोत्कलस्यापि हस्तगतो जातः । अवशिष्टः मध्योत्कलभूभागः १८०३ ख्रीष्टाब्दे आंग्लानां हस्तगतोऽभूत् । १५०९ ख्रीष्टाब्दात् उत्कलस्य अङ्गच्छेदस्य आरम्भो भूत्वा १९२६ ख्रीष्टाब्दं यावत् अयं कार्यक्रमः प्रचलितोऽभूत् । समृद्धस्य प्राचीनोत्कलस्य अङ्गहानिः पूर्णं सार्धत्रिंशत् वर्षाणि यावत् सञ्जाता। अद्यापि स्वाधीनोत्तरभारतवर्षे उत्कलीयानामुत्कलीयभाषाभाषिणां जनानामेकत्रीकरणं न सञ्जातम्। प्रायशः अस्माकं तादृशी जातीयता भावना प्राणेषु च तादृशी व्याकुलता न वर्त्तते । यदि अन्या काचित् जातिः अभविष्यत् तर्हि एतादृशं अमानुषिकं दारुणं जातीयं कष्टं न

कदापि अम्लानेन वदनेन षोढुं समर्था न भवेत् । सीमापरिवर्त्तनस्य असीमं दुःखमनुभवं कृत्वापि वयमुत्कलीयाः नीरवद्रष्टारः सञ्जाताः। उत्कलमणिगोपबन्धुदासः उत्कलसम्मिलनी कालादद्यावधिः उत्कलभाषाभाषिणां जनानामेकत्री-करणाय बहुनि आवेदनानि सर्वकारीयस्तरे वर्त्तन्ते । परन्तु तानि सर्वाणि निर्जीवभूतानि दृश्यन्ते। यतो हि स्मर्यते- 'यादृशी भावना यस्य सिद्धिर्भवति तादृशी'। अस्माकं तथा उत्साह उद्यमो न विद्यते येन एतादृशं कर्म येन उत्कलस्य संस्कृतेः परम्परायाः शिक्षायाः कलायाः भास्कर्यस्य च अभ्युन्नतिः भवेत् । अद्यापि तादृश उद्यमः जातीयचिन्तनसम्पन्न-जनानां नेतृत्वगामित्वमपेक्षितो वर्त्तते । येन कर्मेदं साङ्गं सुप्रतिष्ठितश्च भवेत्।

प्राचीनोत्कले विभिन्नानां वर्णानां विभिन्नानां धर्माणाश्च अभ्युदयो अस्मिन् भूभागे शैलजा-पुलिन्दा-कीरातप्रभृतीनामुप-जातीनामपि निवासः आसीत् । एते प्राचीनवर्णाः आदिमसभ्यता-सम्पन्नाः भूत्वाऽपि देशस्यार्यसभ्यतायां, सुपरम्परायां, सुसंस्कृतेश्च सपक्षभूताश्चासन् । यतो हि जैनकाले बौद्धकाले वैदिककालेऽपि एतेषां सहृदयता आसीदिति इतिहासात् प्रमाणं प्राप्यते । प्राचीनोत्कले जैनधर्मस्य बौद्धधर्मस्य च महती लोकप्रियता आसीत्। चतुर्थशतकं यावत् ब्राह्मण्यधर्मस्य तथा लोकप्रियता नानुभूता तथापि तदा ब्राह्मणस्य धर्मं प्रति सदिच्छा लोकप्रियता च क्रमविवर्द्धिता आसीत्। जातकग्रन्थे दुर्विनीतनामकस्य एकस्य ब्राह्मणस्योल्लेखो दृश्यते । जातकग्रन्थादपि विज्ञातो भवति यत् तदानीन्तनकाले ब्राह्मणाः धर्मग्रन्थानां विश्लेषणं कृत्वा भविष्यवाणीं श्रावितवन्तः । तन्त्रविद्यया, ऐन्द्रजालिकविद्यया अन्यधर्मान् जनान् स्वधर्मं प्रति आकर्षयामासुः । अस्मिन्नेव काले ब्राह्मण्यधर्मस्य कानिचित्

देवायतनानि प्रतिष्ठापितानि। कलिङ्गसम्राट ऐरखारवेलः जैनधर्मी भूत्वाऽपि देवमूर्त्तिनां पूजां कृतवान् । देवमन्दिराणाञ्च संस्कारमपि कृतवान् । स कालक्रमे गुप्तयुगीयनृपतीनां पृष्ठपोषकतया ब्राह्मण्य-धर्मस्य अभ्युत्थानं, भारतीयसमाजस्य च रूपं परिवर्त्तितमकरोत् । उत्कलेऽपि माठर-वसिष्ठ-शैलोद्भव-सोमभौमकरप्रभृतयःराजानः गुप्तराजानां धर्मनीतिमनुसृत्य ब्राह्मण्यधर्मस्य प्रतिष्ठां कृतवन्तः । उत्कलस्य गङ्गवंशीया राजानः गजपति राजानश्च ब्राह्मणेभ्यः ग्रामं भूमिञ्च दत्वा वर्णाश्रमधर्मस्य प्रतिष्ठां कृतवन्तः । वर्णाश्रमधर्मानुसारं समाजेऽस्मिन् चत्वारवर्णाः मुख्यरूपाः भवन्ति । ये च वर्णाः ब्राह्मण-क्षत्रिय-वैश्य-शूद्राः तथैव चत्वारः आश्रमाः अपि परिकल्पिताः सञ्जाताः ते च आश्रमाः ब्रह्मचर्य-गृहस्थ-वानप्रस्थसंन्यासश्चेति । 'शतायुर्वै पुरुषः' इति श्रुत्यनुसारं समान्यतः एकस्य मनुष्यस्य आयुः शतवर्षात्मकं भवति । तत्र चतुर्णां आश्रमाणां कृते आयुषः चत्वारः भागा भवन्ति । प्रथमभागे ब्रह्मचर्याश्रमः द्वितीयभागे गृहस्थाश्रमः, तृतीयभागे वानप्रस्थाश्रमः, चतुर्थभागे संन्यासाश्रमः च भवति । प्रत्येकमाश्रमस्य कालक्रमानुसारं पञ्चविंशति वर्षाणि भवन्ति । ब्रह्मचर्याश्रमे ब्राह्मण-क्षत्रिय-वैश्याश्च उपनीतो भूत्वा गुरुगृहे अध्ययनं कुर्वन्ति । अत्र वेदं वेदौ वेदान् वा अधीत्य अनन्तरं समावर्त्तितो भूत्वा गुरवे यथा अभिलषितं वस्तु प्रदाय गृहस्थाश्रमं प्रति आगच्छन्ति। गृहस्थाश्रमे च कृतदारो गृहे वसेत् इति नियमेन विवाहेन दारग्रहणं कृत्वा गृहस्थो भवति । अयं स्नातकः अनन्यपूर्विकां कान्ताम् असपिण्डां यवियसीं भ्रम्तृमतीमरोगिणीं कन्यामुद्बाह्य तस्यां पुत्रोत्पादनं कृत्वा पितृऋणाद् विमुक्तो भवति । जायमान वै मनुष्यः त्रिभिः ऋणैः जायते । तच्च ऋणत्रयं देवऋणम्, ऋषिऋणं, पितृऋणं चेति । एतेषां चतुर्णां वर्णानामपि पृथक् पृथक् कर्माणि आसन् ।

तद्यथा ब्राह्मणस्य षट्कर्माणि अध्ययनं, अध्यापनं, यजनं, याजनं तथा दानं प्रतिग्रहश्चेति ।

तथा मनुस्मृतौ(१०/७५)—

अध्यापनमध्ययनं यजनं याजनं तथा ।
ते सम्यगुपजीवेयुः षट्कर्माणि यथाक्रमम् ॥

एतेन ब्राह्मणस्य त्रीणि कर्माणि जीविकानिमित्तानि त्रीणि च स्वकीय अभ्युदयनिमित्तानि तानि च त्रीणि कर्माणि यथाऽध्यापनं प्रतिग्रह-याजनरूपाणि । यथा मनुस्मृतौ (१०/७६)—

षण्णां तु कर्मणामस्य त्रीणि कर्माणि जीविका ।
याजनाध्यापने चैव विशुद्धाच्च प्रतिग्रहः ॥

क्षत्रियस्य अध्ययनं, दानं, यजनं, प्रजापरिरक्षणमिति चत्वारि कर्माणि भवन्ति । यथा मनुस्मृतौ(१०/७७)—

त्रयो धर्माः निवर्त्तन्ते ब्राह्मणात्क्षत्रियं प्रति ।
अध्यापनं याजनञ्च तृतीयश्च प्रतिग्रहः ॥

वैश्यस्यापि कर्म यथा- अध्ययनं, यजनं, दानं, कृषि, पशुपालनं, वाणिज्यमिति । कृषिपशुपालनवाणिज्येन कर्मणा स जीविकानिर्वाहं कुर्यादिति मनुरुपदिशति । यथा (१०/७८-८०)—

वैश्यं प्रति तथैवैते निवर्त्तेरन्निति स्थितिः ।
न तौ प्रति हि तान्धर्मान्मनुराह प्रजापतिः ॥
शस्त्रास्त्रभृत्वं क्षत्रस्य वणिक्-पशु-कृषिर्विशः ।
आजीवनार्थं धर्मस्तु दानमध्ययनं यजिः ॥
वेदाभ्यासो ब्राह्मणस्य क्षत्रियस्य च रक्षणम् ।
वार्त्ता कर्मैव वैश्यस्य विशिष्टानि स्वकर्मसु ॥

शूद्रस्य तु एतेषां त्रयाणां द्विजातीनां ब्राह्मणक्षत्रियवैश्यानां शुश्रूषां कृत्वा स्वजीवननिर्वाहं कुर्यात् ।

सकलमातृभाषाप्रसविनी इयं तावत् संस्कृतभाषा एकदा भारतस्य अत्यन्तमुत्कर्षतामवाप । इयं संस्कृतभाषा देवभाषेति प्रख्याता वर्त्तते। प्राचीनभारतस्य साहित्यस्य पर्यालोचनेन सर्वाण्यपि काव्यनाटकादीनि साहित्यरत्नानि संस्कृतभाषया एव लिखितानि वर्त्तन्ते । वेद-वेदान्त-स्मृति-व्याकरण-ज्योतिष-आयुर्वेद-नीतिशास्त्र-पुराण-काव्य-नाटक-प्रभृतीनि समस्तशास्त्राणि संस्कृतभाषया लिखितानि वर्त्तन्ते । संस्कृतसाहित्यं तु पृथिव्यां सर्वश्रेष्ठं साहित्यं भवति । इयं भारतभूमिः भगवत्याः सरस्वत्याः क्रीडाभूमिरासीत् । संस्कृतसाहित्यस्य महत्त्वमद्यापि पाश्चात्य-पण्डितानां समालोचकानाञ्च मनांसि समाकर्षयति ।

यद्यपि संस्कृतसाहित्यस्य स्रोतस्विनी समग्रां भारतभूमिं प्लावयति स्म । तदानीन्तनकालेऽपि प्राचीने उत्कले संस्कृतस्य महती चर्चा आसीत्। प्राचीनोत्कलस्य साहित्यं संस्कृतिश्च भारतस्य अन्यप्रदेशस्य समकक्षमासीत्।

उत्कला भूमिः संस्कृतचर्चायाः लीलाभूमिः आसीत् । उत्कलीयकवयः पण्डिताश्च बहून् ग्रन्थान् लिखितवन्तः । उत्कलस्य राजानः शासनमपि संस्कृतभाषया कृतवन्तः । प्राचीनराजवंशावली पर्यालोचनेन अस्माभिः अवलोक्यते यत् तत्र शासनं दानपत्रं मानपत्रं विज्ञापनं सर्वमपि संस्कृतभाषया एव अभूत् । अतः प्राचीनोत्कलस्य राजभाषा संस्कृत एव आसीत् । उत्कलस्य अपि तु भारतवर्षस्य परमपावनमुक्तिक्षेत्रं भवति श्रीजगन्नाथक्षेत्रम् । अस्य क्षेत्रस्य विषये विभिन्नेषु पुराणेषु आलोचनं वर्त्तते। अस्मिन्नेव क्षेत्रे अद्यापि संस्कृतभाषया अध्ययनमध्यापनं प्रचलति । अतः प्राचीनोत्कले संस्कृतस्य मूलकेन्द्रं पुरीक्षेत्रमासीत् । प्राचीनोत्कले विद्यापदेन संस्कृतविद्या तत्र ग्रन्थकथनेन संस्कृतसाहित्यस्य ग्रन्थाः एव

साधारणजनानां ज्ञानमासीत् । ब्राह्मणेतरजनानामपि संस्कृतसाहित्ये सुमहत् पाण्डित्यं सुमहती च व्युत्पत्तिः प्राचीनकाले संस्कृतभाषया प्राधान्यात् उत्कलभाषा गौणाऽसीत् । अतः उत्कलभाषायां काव्यनाटकादीनां विरचनं बहुकालान्तरे सञ्जातम् । संस्कृतभाषातः उत्कलभाषायाः उत्पत्तिः सञ्जाता । अस्माकं भारतवर्षे यावत्यः भाषाः परिदृश्यमानाः भवन्ति तासु भाषासु उत्कलभाषा अधिकसंस्कृतनिष्ठा इति बहूनां भाषाविज्ञानिनां मतं विद्यते । अतः उत्कलभाषया अपि संस्कृतस्य पुराणकाव्यनाटकादीनि अनुदितानि सन्ति । अपि च बहुनि मौलिकसाहित्यानि विराजन्तेतराम् । उत्कलभाषायाः स्वकीयं स्वातन्त्र्यमपि दृष्टिगोचरं भवति । तत्र केचन शब्दाः संस्कृतभाषातः केचनाशब्दाः प्राकृतात् आगताः । अपि च केचन शब्दाः न तु संस्कृतभाषातः न वा प्राकृतभाषातः समागता । अत उत्कलस्य भाषा दृष्ट्या महती प्रतिष्ठा चास्ति । यस्य देशस्य भाषा साहित्यं यावद् उत्कृष्टं तस्य देशस्य महत्त्वमपि तादृशमुत्कृष्टम्। उत्कलस्य प्राचीन ऐतिह्यं समेषां प्रेक्षावतां विदुषां गोचरिभूतं विद्यते। तथैव उत्कलसाहित्यस्य अपि प्राचीनत्वमपि च स्वातन्त्र्यं नितरामस्ति। उत्कलसाहित्यं तु संस्कृतसाहित्यादेव जन्मग्रहणं कृतम्। प्राकृतभाषातः प्रागैव अस्मिन् उत्कले भूभागे संस्कृतभाषायाः व्यवहारः साहित्यिकभाषारूपेण च आसीत् । संस्कृतभाषा सामान्यानां जनानां बोधगम्याऽभावात् क्रमशः विकृताकारेण मन्ये प्राकृतभाषा सञ्जाता। साधारणतः एकभाषाभाषिणः जनाः एकत्रवासं कुर्वन्तीति स्वाभाविकोऽयं नियमः । अस्मादेव कारणात् एकस्मिन् प्रदेशे एकभाषाभाषिणः जनाः निवसन्तीति दृष्टिगोचरं भवेत्। केषाञ्चन वङ्गीयपण्डितानाम् इयं धारणा आसीत् यत् उत्कलभाषा वङ्गभाषायाः एका विकृता शाखा नेयं स्वतन्त्रा भाषा

इति । परन्तु एतादृशी धारणा स्वपुष्पवदेव निर्मूला वर्त्तते । अद्ययुगे लेखनी स्वतन्त्रा वर्त्तते । यदि वा कश्चित् एतादृशमाक्षेपं करोति तर्हि तस्य लेखनस्य प्रतिष्ठा सङ्कीर्णतां तथा सङ्कीर्णमनोभावं प्रकटयति । यतो हि तुलनात्मकदृष्ट्या विचारे कृते सति वङ्गभाषातः उत्कलभाषा अतीव प्राचीना । वङ्गभाषा अपि न स्वतन्त्रा भाषा आसीत् । अतः वङ्गीयानां मतं न कदापि ग्रहणीयमपि तु 'वङ्गभाषा ओ साहित्य' नामक-पुस्तकस्य २२१ पृष्ठामवलोकनेन अस्माकमेतेषां प्रश्नानामुत्तरं मिलति।

वङ्गभाषायाः उत्पत्तिः वङ्ग इत्यस्य स्वतन्त्रं नामकरणमित्यादि प्राचीनोत्कलसाहित्यस्याधिकांशभागः पद्यसाहित्येन परिपूर्णः । गद्यसाहित्यं तु क्वचित् वर्त्तते । प्राचीनपद्यसाहित्ये कला कुशलता महती विद्यते । यथा- कलाकौतुकनामकग्रन्थे आद्यमक्षरं 'क' अन्त्याक्षरमपि 'क' भवति । एवमेव सम्पूर्णास्यापि ग्रन्थस्य विरचनं जातम् । तथैव वैदेहिशविलासे ग्रन्थे 'व' इत्यस्य अक्षरस्य ग्रहणं प्रत्येकपदस्य आद्य अक्षरत्वेन ग्रहणं सञ्जातम् । तथैव संस्कृतसाहित्ये यानि रस-यमक-अनुप्रास-रीति-गुणेत्यादीनि सन्ति तथैव उत्कलीयप्राचीनसाहित्येऽपि परिदृष्टानि सन्ति । अपि तु संस्कृत-साहित्ये यस्य अलङ्कारस्य एकमात्रमुदाहरणं तादृशस्य उदाहरणस्य बहुलप्रचार उत्कलसाहित्ये दृष्टिगोचरं भवति । अतः प्राचीनोत्कलस्य महत्त्वं वैशिष्ट्यञ्च नितरां वर्त्तते ।

उत्कलीयाः स्ववीरत्वबलेन गङ्गातः गोदावरीं यावत् सुविस्तृतं भूभागं करायत्तं कृत्वा यथा सुसमृद्धा आसन् तथैव उत्कलस्य पण्डितानां लेखनीवैभवेन सुसमृद्धं साहित्यमपि सञ्जातम् । तथैव उत्कलस्य प्राचीनकाले निर्मितानि कलानैपुण्ययुक्तानि मन्दिराणि अद्यापि अत्यन्तं रुचिकराणि एव सन्ति । एतेन उत्कलस्य कलासाहित्यं वीरत्वं प्रकटितं भवति । परन्तु अन्योऽपि कश्चन

मार्गविशिष्टो वर्त्तते यस्मिन् विषये अधुना अयं किञ्चिदालोचयति । स च मार्गः प्राचीनोत्कलस्य वैदेशिकीनीतिः प्राचीनोत्कले उत्कलीयाः जनाः सिंहलः, चीन, जाभा, सुमात्रा, रोम इत्यादिषु देशेषु सम्बन्धं कृतवन्तः । कलिङ्गसम्राट अशोकः स्वपुत्रं कन्यां च सिंहलं बौद्धधर्मप्रचारनिमित्तं प्रेषितवान् । अपि च मध्ययुगे सिंहलदेशोपरि उत्कलस्य राजनैतिकप्रभावः विशेषभावेन परिलक्षितो भवति । उभयराज्ययोः मध्ये वैवाहिकबन्धनमस्य अन्यतमं कारणं भवति । सिंहलस्य राजा चतुर्थमहेन्द्रस्य (ख्रीष्टाब्दः ९५३तः ९६९) राणी कलिङ्गराजकुमारी आसीत् । तस्य पुत्रः पञ्चमसेनः पितुः मरणानन्तरं द्वादशवर्षे एव राज्यशासनं कृतवान् । तदनन्तरं तस्य भ्राता पञ्चममहेन्द्रः राज्यशासनं कृतवान् । अस्मिन् एव काले सिंहले राजनैतिकः सङ्कटः आसीत् । तस्मिन्नेव प्रसङ्गे उत्कलस्य राजकीयसेना राज्ञः पञ्चममहेन्द्रस्य साहाय्यं कृतवान् । अतः युद्धेऽस्मिन् कलिङ्गबलेन राजा विजयी अभूत् । एवमेव चीनदेशेन सह उत्कलस्य सुमहान् सम्बन्ध आसीत् । चीनदेशस्य फाहियान्-महोदयः हुएन्सांमहोदयश्च भारतपरिदर्शनकाले तु उत्कलान् आगतौ। प्रत्यागमनकाले उत्कलस्य शुभङ्करनामकं राजकुमारं चीनदेशस्य सम्राट् हुसान्शृङ्गस्य राजसभां प्रति सम्मानार्थं नीतवन्तौ। तत्र च स्थित्वा स महावैरोचनसूत्रस्य चीनभाषायामनुवादं कृतवान् । अपि च चीन् उत्कलेन सह सांस्कृतिकवणिज्यिकसम्बन्धश्च बहुकालं यावत् आसीत् । चतुर्दशशतके केनापि चीना लेखकेन उयाङ्गताउयाङ्ग-महोदयेन लिखितं यत् उत्कलस्य जीवनयापनस्य मानमत्यन्तम् उत्कृष्टं तथा च सुलभमासीत् । अतः वाणिज्योद्देश्येन आगताः चीन्देशीयाः जनाः दशसंख्यातः नवमसंख्यकाः जनाः प्रत्यावर्त्तयितुमनिच्छां प्रकटयन्ति स्म इति तेन प्रतिपादितम् ।

प्राचीनोत्कलस्य यथा चीनदेशेन सह सुसम्बन्ध आसीत् तथैव रोम्देशेन सह वाणिज्यिकसम्बन्धः सुप्रतिष्ठितः आसीत् । प्रायशः खीष्टीय-षष्ठशताब्द्यां रचित पेरिप्लस् आफ् दि एथेन्सि नामके ग्रन्थे वर्णितं वर्त्तते यत् कलिङ्गोपकूलस्य दक्षिणतः उत्तरतः यथाक्रमे थुण्ड, कलोर, गङ्गा, ताम्रलिप्तवन्दरेभ्यः रोम्साम्राज्येन सह वाणिज्यसम्बन्ध आसीत् । एतेभ्यः स्थानेभ्यः कार्पासम्, वस्त्रम्, जीरकादीनि द्रव्याणि अपि च विभिन्नानि रङ्गवस्तुनि ग्रीस्देशं प्रति आगतानि । तदानीन्तनकाले उत्कलस्य सम्बलपुरनगरात् आगतम् हरिलं रोमनगर्यामत्यन्तमादृमासीत् । अपि च रोम्साम्राज्यस्य मुद्रासु मयूरभञ्जस्य वामनघाटी, विलासपुरम्, भाईजाग्पट्टम् एतेषां चित्रं तु आविष्कृतं सञ्जातम् । एतेन प्राचलोत्कलेन सह रोमदेशस्य सुसम्बन्ध आसीदिति सूचितो भवति ।

पूर्वआफ्रिकादेशेन सह प्राचीनोत्कलस्य नौवाणिज्यमासीत्। अस्मिन्नेव प्रसङ्गे कोणार्कमन्दिरगात्रे खोदितस्य जीराफस्य अविकलमूर्त्तिः अस्माकं दृष्टिमाकर्षयति । अस्मिन् चित्रे कोणार्क-मन्दिरस्य निर्माता राजा प्रथमनरसिंहदेवः एकजीराफोपहारस्वरूपं ग्रहणं कृतवान्निति चित्रितमस्ति। कोणार्कस्य जीराफमूर्त्ति एतादृशं जीवन्तमेव प्रतिभाति येन शिल्पी अति समीपे दृष्ट्यैव तं निर्माति । तदानीन्तनकाले सुविशालानां हस्तिनामादानप्रदानमासीत् का कथा वा जिराफस्य अतः जिराफस्य आनयनं तथा दुरुहं नासीत् । अस्मादेव प्रमाणात् पूर्व-आफ्रिकादेशेन तथा च तन्निकटवर्त्तिना देशेन सह उत्कलस्य नौवाणिज्यं सम्बन्धश्चासीदिति द्रढयितुं शक्यते अस्माभिः। अतिप्राचीनकालात् पञ्चदशशतकं यावत् उत्कलः समुद्रभागे विभिन्नैः राज्यै सह वाणिज्यिकं सम्बन्धं तथा च सांस्कृतिकसम्बन्धं स्थापित-वान् । अनेन भारतस्य सुमहती संस्कृति सुप्रचारिता आसीत्। पुनश्च

समुद्रयानकुशलाः उत्कलीयाः वाणिज्येन आर्थिकसमृद्धिं, प्रगतिं, गौरवं, सम्मानवृद्धिं च कृतवन्तः। तेन प्राचीना उत्कलीयाः स्ववीरत्व-बलेन प्रख्याताः सञ्जाताः। अपि च उत्कलदेशः शक्तिशाली साम्राज्यरूपेण स्वमस्तकमुन्नतं कृतवान्। परन्तु पञ्चदशशतका-दनन्तरम् उत्कलस्य नौवाणिज्यस्य द्रुतमवक्षयमभूत्। परिशेषे सम्पूर्णो विलुप्तः सञ्जातः। अधुना तु तस्य स्मृतौ केवलं कार्त्तिकपूर्णिमायां सागरकूले नौकावन्दनं कृत्वा स्मृतिचारणं भवति। षोडशशतकस्य मध्यभागे उत्कलदेशः यवनैः बहुवारम् आक्रान्तः तेन च उत्कलस्य गौरवरविः अस्तमितो जातः। एतेन उत्कलदेशः यवनैः पराधीनो सञ्जातः। समालोचकाः प्रतिपादयन्ति यत् प्राचीनोत्कलस्य अधोपतनं तु नौवाणिज्यस्य अभावादेव सञ्जातमिति मुख्यं कारणमिति।

एतादृशः सुमहान् उत्कलः कालक्रमेण यवनैः आंग्लैः आक्रान्तो भूत्वा जर्जरितः सञ्जातः। तादृशी विशालता नष्टा भ्रष्टा परिहृष्टा च सञ्जाता। प्राचीनमैतिह्यं भूलुण्ठितं, धनं मानं गर्वगौरवमपि अपहृतम् अस्माकं, कलाभास्कर्योपरि वारम्वारमाक्रमणं सञ्जातम्। उत्कलस्य आराध्यदेवः सर्वेषां प्राणस्वरूपः श्रीजगन्नाथः, तस्य मन्दिरस्योपरि तथा च कोणार्कमन्दिरस्योपरि बहुवारमाक्रमणं सञ्जातम्। परिशेषे कोणार्कस्य चुम्बकीयाशक्तिसम्बलितः प्रस्तरविशेषः अपहृतः यस्तु अद्यापि ब्रीटिश्संग्रहालये लण्डननगर्यां विराजते। तस्य प्रत्यर्पणाय अद्यापि वार्त्ता प्रचलति। अतः उत्कलस्य दौर्भाग्यमनुदिनं विवर्द्धितम्। प्राचीनोत्कलस्य गङ्गातः गोदावरीं यावत् या सीमा सा विनष्टा। अद्यस्तु अयं देशः समग्रभारतवर्षे अनुत्कृष्टप्रदेशत्वेन च परिगणितो भवति। एतत्तु उत्कलीयानां भाग्यं दैवी इच्छा बलियसी सर्वं दैवाधीनमेतत् भवितव्यमासीदिति चिन्तयामः।

उत्कलीयप्रमुखतीर्थक्षेत्राणां नामानि

श्रीजगन्नाथक्षेत्रम्—

प्राचीनकालादारभ्य उत्कलस्य यानि तीर्थक्षेत्राणि अद्यावधि विद्यमानानि सन्ति तानि समालोच्यन्ते । सर्वभारतीयतीर्थमध्ये यद्यपि उत्कलस्य तीर्थानि समागच्छन्ति तथापि न मया तेषामालोचनं विहितम्। उत्कले विद्यमानानां तीर्थानां यद्यपि बहुमहत्त्वं विद्यते तेषु सर्वेष्वपि परिदृश्यमानानां चतुर्णां तीर्थानां प्रमुखता सर्वभारतीयस्तरे अस्माभिरनुभूयते । तेषु एकस्य तीर्थस्य माहात्म्यं वैशिष्ट्यं गुरुत्वञ्च विश्वस्तरे विद्यते । न केवलं हिन्दुधर्मानुरागिणां जनानां क्षेत्रमिदं तथा महत्त्वपूर्णं प्राणभूतमपि तु समग्रस्य मानवसमाजस्य क्षेत्रमिदं भवति। तदेव क्षेत्रं भवति श्रीजगन्नाथक्षेत्रं श्रीक्षेत्रं वा श्रीपुरुषोत्तमक्षेत्रम् ।

चतुर्षु मुख्यतीर्थक्षेत्रेषु अस्य श्रीजगन्नाथधाम्नः महत्त्वं सर्वाग्रगण्यं वर्त्तते। मोक्षदायकं क्षेत्रं श्रीक्षेत्रमिति सर्वे जानन्ति । क्षेत्रेऽस्मिन् भगवान् जगतः नाथः श्रीजगन्नाथः लीलादारवरूपं धृत्वा अपादपाणिश्च भूत्वा भ्रात्रा भगिन्या सह प्रपूजितो भवति । क्षेत्रेऽस्मिन् विद्यमानं श्रीमन्दिरमेकादशशतकीयं भवति । सर्वभारतीयस्तरे विश्वस्तरे वा यावन्ति मन्दिराणि अधुना राराजते तेषु सर्वेष्वपि मन्दिरस्यास्य कलाभास्कर्यस्य नैपुण्यं रमणीयत्वं विशालत्वं सामाजिकी अवस्थितिश्च सर्वानपि जनान् सम्प्रदायनिर्विशेषेण चमत्करोति आह्लादयति पावयति च । क्षेत्रस्यास्य अपरं नाम शङ्खक्षेत्रमिति। अस्मिन् शङ्खक्षेत्रे हिन्दुधर्मस्य सर्वेषां देवानां देवीनां च अवस्थितिः प्राप्यते । भगवतः जगन्नाथस्य यत् प्रसादं भवति, तत्प्रसादं महाप्रसादमित्युच्यते । महाप्रसादस्य विषये एका उक्तिः पुराणेषु प्राप्यते । एकदा भगवता नारदेन भगवतः जगन्नाथस्य अतिस्वल्पमात्रा तण्डुलकणा लब्धा । अत्यन्तं प्रहृष्टमना भूत्वा तेन

कैलासशिखरे स्थितं शिवं प्रत्यागतम् । शिवोऽपि प्रहृष्टचित्तं नारदं दृष्ट्वा उवाच- नारदेनापि प्रत्युत्तरितं यत् मया अद्य भगवतः परंब्रह्मणः जगन्नाथदेवस्य प्रसादं लब्धम् । यस्य सेवनमात्रेण जनः मोक्षं प्राप्नोति। एतच्छ्रुत्वा शिवोऽपि तदन्नं ययाचे । प्रसादं परिसेव्य शिवः नारदश्च अत्यन्तमानन्दौ अभवताम् । तद्दृष्ट्वा पार्वती पृष्टवती किमस्य आनन्दस्य कारणम् ? सर्वं श्रुत्वा जगन्नाथस्य प्रसादलाभाय तया तपस्या कृता । तपस्यया परितुष्टः सन् जगन्नाथः उक्तवान् यत् मम नैवेद्यानन्तरं तत्सर्वमपि भवत्याः ग्रहणेन महप्रसादो भविष्यति । तच्च सर्वेषां विमुक्तये भविष्यति । अतः इयं परम्परा अद्यापि श्रीजगन्नाथस्य मन्दिरे परिदृश्यते यत् सुवर्णपात्रस्थितस्य अन्नस्य भगवतः नैवेद्यानन्तरं देव्याः विमलायाः नैवेद्यार्थमागच्छति । ततः तदन्नं भक्तानां प्रियकारकं भवति । श्रीजगन्नाथस्य भक्तेषु कीदृशः स्नेहः तस्मिन् विषये अनेकाः किम्बदन्तयः विद्यन्ते । तत्र काञ्चिविजयः उपाख्यानमन्यतमम् । राज्ञः पुरुषोत्तमदेवस्य काञ्चीविजयनिमित्तं स्वयं जगन्नाथः युद्धायागच्छत्। अपरा उक्तिः यत् कविजयदेवस्य श्वशुरः सन्तानहीनः आसीत् । स जगन्नाथं निवेदितवान् यदि मम सन्तानं भविष्यति तर्हि प्रथमसन्तानं तुभ्यं दास्यामि । ततः कालान्तरे प्रथमसन्तानरूपेण कन्या पद्मावती, अपरे पुत्राः अपि जाताः । कन्यायाः उपयुक्ते वयसि प्रदानं कर्त्तव्यमिति धीया जगन्नाथसमीपमागतवान् । तत्र मन्दिरस्य ज्येष्ठपूजकाय सर्वं मनोगतं भावं निवेद्य परिवारेण सह रात्रियापनं कृतं तेन। रात्रौ भगवान् श्रीजगन्नाथः स्वप्ने कन्यां स्वीकृत्य अवदत् यत् मम प्रियभक्ताय जयदेवाय इमां कन्यां प्रदेहि इति । भगवतः वचनमङ्गीकृत्य तेन तथैव कर्म कृतम् । एवमेव 'बन्धुमहान्ति चरितम्' 'दासिआ वाउरी चरितम्' अतीव आकर्षणीयम् । भक्तेषु भगवतः वात्सल्यं कीदृगिति प्रतिपादितं दृश्यते । एतादृशं बहूपाख्यानमस्माकं दृष्टिगोचरं भवति।

मन्दिरस्य प्राचीनता जगन्नाथसंस्कृतेः प्राचीनता च सर्वत्र स्वीकृता विद्यते । स्कन्दादिषु पुराणेषु जगन्नाथक्षेत्रस्य वर्णनं प्राप्यते। श्रीजगन्नाथमन्दिरं महाराजेन इन्द्रद्युम्नेन कृतयुगे कृतम् । महाराजस्य निमन्त्रणेन प्रजापतिना मन्दिरस्यास्य प्रतिष्ठा विहिता । कालक्रमेण मन्दिरं तु वालुकया अवलुप्तम् । ततः दृश्यमानं मन्दिरं तु एकादशशताब्द्यामनङ्गभीमदेवेन उत्कलनृपतिना निर्मितम् ।

मन्दिरेऽस्मिन् द्वादशमासेषु बहवः उत्सवाः परपालिताः भवन्ति। सर्वेषूत्सवेषु रथोत्सवः मुख्यतमः । यस्मिन्नुत्सवे स्वयं श्रीजगन्नाथः पतितानां पावनाय श्रीमन्दिरान्निःसरति। स्यन्दनेनोपविश्य गुण्डिचामन्दिरं प्रति गच्छति। भ्रातुः बलरामस्य स्यन्दनं तु तालध्वजः यत्र चतुर्दशचक्राणि सन्ति । भगिन्याः सुभद्रायाः स्यन्दनं तु दर्पदलनं यत्र द्वादशचक्राणि । भगवतः श्रीजगन्नाथस्य स्यन्दनं तु नन्दिघोषः यत्र षोडशचक्राणि भवन्ति । रथप्रतिष्ठानन्तरं सेवकाः जगन्नाथं बलभद्रं सुभद्रां च रथं प्रति आनीय स्थापयन्ति । ततः नवकोटि-कर्णाटोत्कलवर्गेश्वरवीराधिवीरवरमहाप्रतापिराजा विनीतेन वेशाभरणेन सामान्यसेवक इव रथमार्जनं करोति । तदनन्तरं भक्ताः क्रमानुसारं ज्येष्ठस्य भ्रातुः बलभद्रस्य भगिन्याः सुभद्रया परिशेषे श्रीजगन्नाथस्य रथं महानन्देन नयन्ति । उच्यते च-

"रथे तु वामनं दृष्ट्वा पुनर्जन्म न विद्यते ।"

अत एव इयं यात्रा अन्यन्तं प्रसिद्धा भवति । प्रायशः दशलक्ष-परिमिताः जनाः विभिन्नेभ्यः राज्येभ्यः भारताद्बहिरपि समागच्छन्ति । गुण्डिचामन्दिरे नवदिनं यावत् स्थित्वा दशमदिने भगवान् जगन्नाथः प्रत्यागमनं करोति । आषाढमासस्य शुक्लद्वितीयायां यात्रेयमनुष्ठीयते। अपरा यात्रा स्नानयात्रा भवति । अत्रापि यात्रायां भगवान् जगन्नाथः बलभद्रः शुभद्रा च रत्नवेदीं

परित्यज्य स्नानवेदीं प्रति समागच्छन्ति । तत्र अष्टोत्तरशतसंख्यक-सुवर्णकलसोदकेन महास्नानं भवति । ततश्च विभिन्नैः उपकरणैः सेवकाः भगवन्तं गजवेशेन सज्जयन्ति । श्रीजगन्नाथमन्दिरस्य सेवा मनुष्यस्य आत्सेवा इव भवति। यथा मनुष्यः अधिकस्नानेन ज्वररोगेण जर्जरितो भवति, तथैव जगन्नाथोऽपि ज्वरग्रस्तो भवति । अस्मिन्नेव-काले प्रसादनिर्माणमपि न भवति । केवलं तु प्रपानकपानं कृत्वा पञ्चदशदिनानि यापयन्ति । इयं स्नानयात्रा ज्येष्ठपूर्णिमायां भवति। ततः अमावास्यायां भगवतः नेत्रोत्सवो भवति। द्वितीयायां रथयात्रा। अपरायात्रा भवति चन्दनयात्रा ।

चन्दनयात्रानिमित्तं श्रीजगन्नाथः स्वयं न गच्छति । स्वप्रतिनिधिरूपेण मदनमोहनं प्रेषयन्ति। अयं च उत्सवः अतीव रमणीयः । सुसज्जितेन विमानेन श्रीमन्दिरात् देवताऽऽनयनं मार्गे संकीर्त्तनं नरेन्द्रपुष्करिण्यां सुसज्जितासु नौकासु जलक्रीडा अतीव मनोहारिणी भवति । इयं यात्रा एकविंशदिनानि यावत् प्रचलति । मुख्यकालस्तु वैशाखपूर्णिमा भवति। अस्मिन्नपि उत्सवे विभिन्नस्थानेभ्यः बहवः भक्ताः समागत्य रात्रौ भगवतः जलक्रीडा-मवलोक्य आत्मानं कृतार्थयन्ति । श्रावणपूर्णिमायामपि श्रीमन्दिरे सुमहान् उत्सवः परिपालितो भवति । यतो हि एतद्दिनं भगवतः बलरामस्य जन्मदिनं भवति। तदर्थं बलरामपूजा अपि च सुसज्जितायां मुक्तिमण्डपस्याग्रभागे निर्मितायां दोलायां दोलारोहणोत्सवः परिपालितो भवति । अस्या दोलायाः सौन्दर्यदर्शनेन केवलमव-कलयितुं शक्यते । दोलारोहणोत्सव दर्शनाय बहवः जनाः समागच्छन्ति । इयं यात्रा सप्ताहं यावत् प्रचलति । जन्माष्टमी उत्सवोऽपि महासमारोहेण पालितो भवति । कार्त्तिकमासे श्रीक्षेत्रेऽस्मिन् मन्दिरे बहूनां भक्तानां समवाय दरीदृश्यते । विशेषतः

विधवाः जगन्नाथसमीपे कार्त्तिकव्रतं कुर्वन्ति । व्रतोपवासं च पालयन्ति । विशेषतः कार्त्तिकशुक्लैकादशीमारभ्य पूर्णिमां यावत्पञ्चदिनं पञ्चकव्रतं पालयितुं बहवः भक्ताः समागच्छन्ति । पूर्णिमायाः प्रभाते व्रतस्य उद्यापनं महोदधौ कुर्वन्ति । ततः ब्राह्मणाय भोजनं, दानं दक्षिणाञ्च प्रदाय धर्ममर्जयन्ति । एवमेवं प्रकारेण श्रीजन्नाथमन्दिरे द्वादशमासेषु त्रयोदशयात्राः समनुष्ठीयन्ते । मन्दिरस्यास्य यादृशी रमणीयता लोकप्रियता च वर्त्तते तथैव गुरुगम्भीरनादेन सद्यजातानां सुनीलविचिमालानामपूर्वलावण्यं मनोहारकं भवति ।

श्रीजगन्नाथक्षेत्रं प्रति आदिशङ्कराचार्यः आगतवान् । श्रीजगन्नाथस्य परमप्रीतये जगन्नाथाष्टकं तेन विरचितम् । श्रीजगन्नाथस्य तीर्थक्षेत्रस्य महत्त्वं प्रविचार्य गोवर्द्धनपीठनाम्ना एकं शङ्कराचार्याश्रम-मादिशङ्कराचार्यः स्थापितवान् । यस्तु समग्रभारतवर्षे विद्यमानेषु चतुर्षु शङ्कराचार्यमठेषु गोवर्द्धनाश्रमः श्रेष्ठतमः । श्रीकृष्णतत्त्वस्य सर्वश्रेष्ठः प्रचारकः सिद्धमहापुरुषः श्रीचैतन्यदेवः अत्रैव पुरीक्षेत्रे जगन्नाथदर्शननिमित्तमागतवान् । अन्तिमजीवनमपि क्षेत्रेऽस्मिन् व्ययितम् । अपरेऽपि अनेके महापुरुषाः श्रीजगन्नाथक्षेत्रं प्रति आगतवन्तः । जगन्नाथस्य महिमागानं कृत्वा परमभक्त्या जगन्नाथस्य महत्त्वमनुभूतवन्तः । बहुषु पुराणेषु श्रीक्षेत्रस्य जगन्नाथधाम्नः महत्त्वं माहात्म्यं च समालोचकैः प्राप्यते । क्षेत्रेऽस्मिन् बहवः देवाः मठाः मन्दिराणि च विराजन्ते । श्रीक्षेत्रस्थितानां तीर्थक्षेत्राणां मध्ये अन्यतमः देवालयो भवति श्रीलोकनाथमन्दिरम् । ततश्च गुण्डिचामन्दिरं, सुवर्णगोपालमन्दिरं, स्वर्गद्वारश्मशानं, श्वेतगङ्गापुष्करिणी, इन्द्रद्युम्न-पुष्करिणी, मार्कण्डेयपुष्करिणी, चक्रतीर्थं, सिद्धमहावीरमन्दिरं, गोपीनाथमन्दिरं, वेलेश्वरमहादेवमन्दिरं श्रीक्षेत्रस्थितानि तीर्थक्षेत्राणि

भवन्ति । एतस्य प्रत्येकं क्षेत्रस्य महिमागानं फलप्राप्तिविषये बहुनि फलश्रुतिवाक्यानि विद्यन्ते । आस्तिकभावनया एतेषां तीर्थानां दर्शनेन, स्नानेन, पूजनेन, जनः पापात् रोगात् संसाराच्च विमुक्तो भवति। श्रीजगन्नाथपुरुषोत्तम-तीर्थक्षेत्रविषये ब्रह्मपुराणे बृहन्नारदीये, स्कन्दपुराणे बहुनि वचनानि प्राप्यते । मयाऽत्र सांख्यायनभाष्ये कानिचिद् वाक्यानि उद्धृतानि यथा-

आदौ यद्दारु प्लवते सिन्धोः पारे अपुरुषम् ।
तदा लभस्व दुर्दूनो तेन याहि परं स्थलम् ॥

परेऽन्ये महाधनुर्धरश्चक्रवर्त्तिनः केचित् सुद्युम्न-भूरिद्युम्न-इन्द्रद्युम्न-कुवलयाश्व-यौवनाश्व-वध्र्याश्व-अश्वपतिशशिविन्दु-हरिश्चन्द्र-अम्बरीष-ननक्तु सर्यातिययात्यनरण्योक्षसेनादयः । (मैत्रायणी उपनिषद् १/४) ।

शैवभागवतानां च वादार्थप्रतिषेधकम् ।
अस्मिन् क्षेत्रवरे पुण्ये निर्मले पुरुषोत्तमे ॥
शिवस्यायतनं देव करोमि परमं महत् ।
प्रतिष्ठेऽयं तथा तत्र तव स्थाने च शङ्करम् ॥
ततो ज्ञास्यन्ति लोकेऽस्मिनेकमूर्त्तिं हरिश्वरौ ।
प्रत्युवाच जगन्नाथः स पुनस्तं महामुनिम् ॥
नावयोरन्तरं किञ्चिदेकभावौ द्विधा कृतौ ।
यो रुद्रः स स्वयं विष्णुर्यो विष्णुः स महेश्वरः ॥
(ब्रह्मपुराण ५६/६०,६६,६९,७०) ।

श्रीमन्दिरस्योपरिस्थितस्य नीलचक्रस्य वर्णनमपि ब्रह्मपुराणे दृश्यते ।

यात्रां करोति कृष्णस्य श्रद्धया यः समाहितः ।
सर्वपापविनिर्मुक्तो विष्णुर्लोकं व्रजेन्नरः ॥
चक्रं दृष्ट्वा हरेर्दूरात् प्रासादोपरि संस्थितम् ।

सहसा मुच्यते पापान्नरो भक्त्या प्रणम्य तत् ॥

(ब्रह्मपु. ५१/७०-७१, नारदीय उत्तर ५५/१०-११ च) ।

शकाब्दे रन्ध्रशुभ्रांशु रूपनक्षत्रनायके ।

प्रासादं कारयामासानङ्गभीमेन धीमता ॥

(जिल्द.-२, पृ-११) ।

मार्कण्डेयं वटं कृष्णं रौहिणेयं महोदधिम् ।

इन्द्रद्युम्नसरच्चैव पञ्चतीर्थविधिः स्मृतः ॥

(ब्रह्मपुराण ६०/११)।

मूलमन्त्रेण सम्पूज्य मार्कण्डेयं तथेश्वरम् ।

अघोरेण च भो विप्रः प्रणिपत्य प्रसादयेत् ॥

त्रिलोचननमस्तेस्तु नमस्ते शशिभूषण ।

त्राहि मां त्वं विरूपाक्ष महादेव नमोऽस्तु ते ॥

(ब्रह्मपु. ५७/७-८, नारदीय उत्तर ५५/१८-१९)

"ॐ अघोरेभ्यो अघोरेभ्यो घोरतरेभ्यः सर्वेभ्यः सर्वसर्वेभ्यो नमस्तेस्तु रुद्ररूपेभ्यः।" मन्त्रोऽयं तीर्थचिन्तामणि(पृ-८८)पुस्तके दृश्यते ।

ॐ नमोऽव्यक्तरूपाय महाप्रलयकारिणे ।

महद्रसोपविष्टाय न्यग्रोधाय नमोस्तुते ॥

अमरत्वं सदा कल्पे हरेश्चायतनं वट ।

न्यग्रोध हर मे पापं कल्पवृक्ष नमोऽस्तु ते ॥

(ब्रह्म. ५७/१३-१४, नारदीय उत्तर ५५/२४-२५ च)।

क्षेत्रफलविषये सूतमुनिकृतपुरुषोत्तमक्षेत्रप्रसंसा तत्स्वरूपवर्णनं च नीलमाधवदर्शनपूर्वकं रोहिणीकुण्डजलपानात् काकस्य चतुर्भुजादि-विष्णुसारुप्यवर्णनमिति-

एकदा नैमिष्यारण्ये पुण्ये सर्वसुखप्रदे ।

नानातीर्थसमायुक्ते नानागुल्ममनोरमे ॥

फलपुष्पाद्यवृक्षाणां निकरैः परिमञ्जुले ।
मन्दानिलसमायुक्ते विविक्ते मृगरञ्जिते ॥
तापसाश्रमसङ्कीर्णे ख्याते परमपावने ।
रुण्डीभूय समस्तास्ते गोष्ठीं चक्रुर्मनोरमाम् ॥
तादृशोऽपि वने रम्ये शौनकाद्या मुनीश्वराः ।
समस्ततीर्थतत्त्वानां ज्ञानाय जगतीतले ॥
क्षेत्राणां शिवदानां च जिज्ञासायै त्वरान्विताः ।
सभायां जायमानायां तत्क्षणे च मुनीश्वरः ॥
जटामण्डलधारी च धृतकौपीनसुन्दरः ।
कृष्णाजिनोत्तरीयेण विराजितवपुर्मुनिः ॥
सूतस्तथापि सम्प्राप्तस्तत्र शिष्यगणैः युतः ।
तं दृष्ट्वा परमप्रीताः शौनकाद्यास्तपस्विनः ॥
उत्थाय च नमश्चक्रुः सोऽपि तान् दण्डवद्भुवि ।
प्रणामं कृतवान् तत्राप्युवास स तदा मुनिः ॥
तमासीनं ततो दृष्ट्वा ऋषयस्ते मुनीश्वराः ।
उचुः प्राञ्जलयः सर्वे सर्वलोकहिताय वै ॥

ऋषयः उचुः- भगवान् सर्वधर्मज्ञ सर्वतीर्थादितत्त्ववित् ।
अतो ब्रूहि समस्तानां तीर्थानां शिवसम्भृतम् ॥
क्षेत्राणां च फलं तावत्सुत नः कथय प्रभो ।
तेषां मध्येवरः को वा क्षेत्राणं च मुनीश्वर ॥
तीर्थानां च तथा ब्रूहि यतस्त्वं व्यासशासितम् ।
समस्तफलयुक्तानां पावनानां च तत्वतः ॥
इत्येवं ब्रुवतां तेषामृषीणामग्रतः पुरा ।
समारभेत् तद्वक्तुं गुह्यं तैः पृष्टमुत्तमः ॥

सूत उवाच- शृणुध्वं मुनयः सर्वे संयतात्मान एव हि ।

तीर्थानां क्षेत्रराशीनां मध्ये श्रीपुरुषोत्तमः ॥
गुह्यसर्वतमो ध्वंसी सर्वपुण्यफलप्रदः ।
अस्ति शर्म प्रदश्चैव नीलभूधरः भूषितः ॥
ऋषिकूल्यां समासाद्य यावद्वैतरणी नदी ।
तावत् क्षेत्रस्य माहात्म्यं वर्त्तन्ते मुनिपुङ्गवाः ॥
समुद्रस्योत्तरं तीरं महानद्यास्तु दक्षिणम् ।
तटमारभ्य तत् क्षेत्रं राजमानं सुपावनम् ॥
वर्त्तते तत् समारभ्य समान्ताद्दशयोजनम् ।
पदे पदे श्रेष्ठतमं तत् क्षेत्रं वर्त्ततेऽनघाः ॥
तन्नीलाचलपर्यन्तं भुक्तिमुक्तिफलप्रदम् ।
तत्र गन्तुं समर्थास्ते ये वै विगतकल्मषाः ॥
ये वै वैतरणीतीरे स्नात्वाभक्तिसुसंयताः ।
गदाक्षेत्रेऽपि तां देवीं विरजातटवासिनीम् ॥
दृष्ट्वा ते मनुजा योग्याश्चैकाम्र वनलोकने ।
तत्र चैकाम्रविपिने नीलकण्ठं मुनीश्वराः ॥
स्नात्वा विन्दुह्रदे रम्ये दृष्ट्वा च शिवमुत्तमम् ।
ते च मर्त्त्यास्तथा योग्याः कोणार्कपरिलोकने ॥
अर्कक्षेत्रे पवित्रेऽस्मिन् चन्द्रभागानदीजले ।
स्नात्वा ये सूर्यमत्युग्रं पश्यन्ति मुनिपुङ्गवाः ॥
क्षीणपापाश्च ते मर्त्त्याः क्षेत्रं श्रीपुरुषोत्तमम् ।
द्रष्टुं समर्थाः शिवदं पावनं धरणीसुराः ॥
पञ्चक्रोशायतियुतं शङ्खाकारं मनोहरम् ।
नीलाचलसमुल्लासं पापराशिविनाशनम् ॥
समुद्रोदकसंगुप्तश्रीमच्छङ्खोदरं शुभम् ।
क्रोशत्रितयः संस्पृष्टं पश्यतां पापमोचनम् ॥

नानातीर्थसमायुक्तं कोटिब्रह्माण्डदुर्लभम् ।
गन्तुं समर्थास्ते सर्वे ये वै भक्ता जनार्दने ॥
यत् क्षेत्रं पश्यतो विप्राः समुद्रस्तीर्थराट् स्मृतः ।
क्रोशत्रयोन्नतियुते क्षेत्रे श्रीपुरुषोत्तमे ॥
शङ्खाकारोऽपि तन्मध्ये राजते नीलभूधरः ।
तत्र नीलाचले कुण्डे रोहिण्यां नाम्नि भूसुराः ।
कारुण्योदकसम्पूर्णं स्पृशतां पापनाशनम् ॥
येन कुण्डे जले नैव ब्रह्मणः प्रलयो भवेत् ।
उत्तरे कल्पवृक्षोऽस्ति साक्षाद्विष्णुस्वरूपभाक् ॥
स्पृशतां पश्यतां वापि छायातलनिवासिनाम् ।
ब्रह्महत्यादिपापघ्नो वर्त्तते कल्पपादपः ॥
तन्मूले मञ्जुले रत्न कुट्टिमेति मनोरमे ।
रत्नसिंहासने दिव्ये वर्त्तते नीलमाधवः ॥
उभयोः पार्श्वयोस्तस्य रामलक्ष्मीश्च संस्थिते ।
शतहस्तप्रमाणेन वृक्षस्यानीलकोणतः ॥
तस्यास्ते माधवो देवो तद्दक्षे नरकेशरी ।
साक्षाद्ब्रह्मस्वरूपोऽस्ति हिरण्यकशिपो रिपुः ।
एतस्य पुरतो विप्राः कल्पाख्यतरुमूलतः ॥
यत्किञ्चित्कुरुते कर्म तत्कोटिगुणकं भवेत् ।
किञ्चिदुत्तरतस्तस्य नृसिंहस्य परात्मनः ॥
कामाख्य क्षेत्रपालोऽस्ति सर्वकामफलप्रदः ।
द्वितीयम्वर्त्तगा देवी विमला वर्त्ततेऽमला ॥
शक्तिराद्या समस्तानां भक्तिमुक्तिप्रदायिनी ।
तृतीया वर्त्तते श्रीमान् तीर्थाऽस्ति मणिकर्णिका ॥
कपालमोचनो नाम सत्समीपे महश्वरः ।

पश्यतां जगतां वापि ब्रह्महत्यादिपापहा ॥
समुद्रस्य तटे रम्ये यमेश्वर इतीरितः ।
नारायणात्मकः श्रीमान् यमदण्डविनाशकः ॥
पश्यतामर्च्चकानां यः कोटिलिङ्गफलप्रदः ।
तस्यशम्भोरग्निकोणे कण्डुस्तिष्ठति सन्मुनिः ॥
यमेश्वरस्य वेढाया मध्येऽस्ति चण्डरूपिणी ।
पश्यतां जगतां वापि भक्तिमुक्तिप्रदायिनी ॥
चामुण्डायाः पुरो भागे कालिकातापनाशिका ।
वर्त्तते वल्लभाविष्णोर्दक्षिणस्यां दिशि प्रभोः ॥
विष्णोः कल्पतरोश्चैव समुद्रतटमात्रतः ।
चण्डरूपाकालिकयोः पुरपृष्ठस्थलाश्रयः ॥
दक्षिणः पार्श्व स्यादनन्तफलप्रदायकः ।
एतद्दक्षिणपार्श्वेऽपि सा गङ्गा लोकपाविनी ॥
वर्त्तते मनसा ध्यात्वा हरिं तस्याश्च दक्षिणे ।
जनार्द्दनो मत्स्यरूप श्वेतरूपधरः शिवः ॥
तस्य विष्णोर्हरस्यास्य मध्यं परमपावनम् ।
मुक्तिप्रदस्थलं तावद् वदन्ति कृतिनः सदा ॥
तद्गङ्गाजलतः स्नात्वा मत्स्यश्वेतविलोकनात् ।
सर्वपापविनिर्मुक्तो वाजपेयफलं लभेत् ॥
महाप्रसादेष्वज्ञानामपराधो भवेत्पदे ।
तज्जले प्लवनात्तावन्मत्स्यश्वेताङ्गलोकनात् ॥
नश्येत्तत्क्षणमेवायमपराधो महीसुराः ।
वटमूले वटेशोऽस्ति पश्यतां सर्वकामदः ॥
तदग्रे मङ्गला भाति द्वितीया शक्तिरुत्तमा ।
वटस्य दक्षिणे भागे गणेशो दक्षिणाननः ॥

सर्वविघ्नविनाशाय लोकानां वर्त्तते द्विजाः ।
तद्विलोकनमात्रेण सर्वकामफलं भवेत् ॥
नीलभूधरपूर्वेऽपि शक्तिरस्ति मरीचिका ।
सर्वेषां निजदासानां मनोरथविधायिनी ॥
ऐशान्यं दिशि रुद्रोऽस्ति माधवस्य जगद्गुरोः ।
जनानामर्च्चकानां यः सर्वकामफलप्रदः ॥
अर्द्धाशनी तथालम्बा कौवेरदिशिसंस्थिता ।
कपालमोचनो यावद् यावदर्द्धाशनी द्विजाः ॥
मध्यं शंखस्य हरिणा गुप्तं मुक्तिप्रदायकः ।
नीलकण्ठस्तु शङ्खाग्रे वर्त्तते सर्वमङ्गला ॥
पृष्ठभागे स्थिता देवी तत् क्षेत्रपरिरक्षणे ।
प्रमाणमेव शङ्खस्य कथितं भवदग्रतः ॥
वटस्य वायुकोणेऽपि मार्कण्डेयो महातपाः ।
लिङ्गरूपी स्वयं भूत्वा वर्त्तते पुरुषोत्तमे ॥
मार्कण्डेयह्रदो विप्राः पावनस्तेन निर्मितः ।
तत्र स्नात्वा शिवं दृष्ट्वा विधिनार्च्चितमुत्तमम् ॥
ये च भक्त्या नराः क्षिप्रं वाजपेयफलं लभेत् ।
एतादृशं महाक्षेत्रं नानातीर्थसमन्वितम् ॥
नानावृक्षलतागुल्ममनोज्ञं देवदुर्लभम् ।
सर्वसौख्यप्रदं रम्यं पुण्यं पापविनाशनम् ॥
वर्त्तते भारते वर्षे यत्र श्रीनीलमाधवः ।
स्वर्गागतैः सुरैः सर्वैरर्च्चितो दिव्यवस्तुभिः ॥
प्रत्यहं कमलाकान्तो गन्धपुष्पादिभिर्ध्रुवम् ।
तत्र विप्राः मनुष्याणां सञ्चारो नास्ति भूतले ॥
माधवस्यार्च्चने शक्त्या देवाः केवलमुत्तमाः ।

क्षेत्रस्य पश्चिमे देशे वर्त्तते शवरालयः ॥
तत्रस्थः शवरः कश्चिच्छवराणां नरोत्तमः ।
विश्वावसु नाम तदा तन्निर्माल्यं समाहरेत् ॥
नीलमाधवमूर्त्तेस्तु विष्णोरायतनस्थलम् ।
मार्जयेत्केवलं विप्राः पूजितस्य सुरैः प्रभोः ॥
एवं गुप्ततमं क्षेत्रं वर्त्तते धरणीसुराः ।
चतुर्दशस्तु लोकेषु गोपनीयस्थलं तु तत् ॥
कदाचित्तत्र नीलाद्रौ तृषार्त्तः काक आगतः ।
अयत्नात्माधवं दृष्ट्वा रोहिणीकुण्डसम्भवम् ॥
जलं पीत्वा विमुक्तात्मा शङ्खचक्रगदाब्जधृक् ।
सम्प्राप्य हरिसारोऽयं वैकुण्ठं प्रति निर्ययौ ॥
ज्ञात्वैवं भास्करिस्तत्र सहसागत्य शङ्कितः ।
अधिकारक्षयं दृष्ट्वा माधवं स्तुतवान् यमः ॥
माधवस्तस्य भो विप्रास्तव मार्कण्ड्य दुर्लभम् ।
इषद्हासमुखः श्रीमान् लक्ष्मीमैक्षत स प्रभुः ॥
लक्ष्मीस्तदा यमं प्राह स्वाधिकारक्षयात्पुनः ।
भीतं माधवनेत्रान्तप्रेरिता भक्तवत्सला ॥

लक्ष्मीरुवाच-

यमाकर्ण्य भो क्षेत्रं पावनं पुरुषोत्तमम् ।
अत्र त्यागाच्छरीरीणां मुक्तिरेव न संशयः ॥
नवाधिकारः सर्वत्र ह्यास्ते पुत्रः पुनः प्रभो ।
पञ्चक्रोशे महाक्षेत्रे नास्ति तेऽधिकृतिः क्षितौ ॥
कीटानाञ्च पतङ्गानां मनुष्याणां च देहिनाम् ।
अत्र चैव तनुत्यागान्मुक्तिः नैव स्याद्दुर्लभा ॥
अन्तरीक्षे जले वापि क्षितौ वा यत्र कुत्रचित् ।

मुक्तिर्मृतौ च जन्तूनां क्षेत्रे श्रीपुरुषोत्तमे ॥
तेषु तेष्वधिकारस्ते नास्ति नास्ति यमस्फुटम् ।
अन्यत्रह्याधिकारस्ते तं वै क्षेत्रोत्तमं विना ॥
अन्यदेशादागतानां क्षेत्रं श्रीपुरुषोत्तमम् ।
समुद्दिश्य शतं पादान् गत्वा चेन्मरणे सति ॥
नास्ति तेष्वधिकारस्ते सत्यं सत्यं वदाम्यहम् ।
सूर्यजातमहाक्षेत्रे सकृत्स्नात्वा महोदधौ ॥
विष्णुं पश्यन्ति ये भक्त्या तेषु तेऽधिकृतिनवै ।
देशान्तरे मृता मुक्तास्ते ये विष्णुं निरीक्षताः ॥
अतो विष्णोः शरीरं हि क्षेत्रं श्रीपुरुषोत्तमम् ।
स्वस्य नाम्ना च विख्यातं विधि सूर्यात्मजस्फुटम् ॥
एतत् क्षेत्रसमं क्षेत्रं नास्ति ब्रह्माण्डमण्डले ।
यत्र गत्वा पुनर्जन्म नास्ति जन्ममृतां यम ॥
तस्मिन् क्षेत्रे निवासं वै करिष्यामीति यो वदेत् ।
सोऽपि मुक्तो न सन्देहो भवबन्धविनाशने ॥
निवासिनां पुनस्तेषां फलं किं वा वदाम्यहम् ।
इति लक्ष्म्या वचः श्रुत्वा भास्करिर्हृष्टमानसः ॥
क्षेत्रोत्तमस्य माहात्म्यं शृण्वन्निजपुरं गतः ।
पूर्वापरार्द्धपर्यन्तं माधवोऽत्र वसेद्द्विजाः ॥
दारुब्रह्मस्वरूपेण ह्यपरार्द्धेऽपरे पुनः ।
मानुषैः सह वै तत्र क्षेत्रे क्रीडति केशवः ॥
क्षेत्रं तच्च महाविष्णोर्द्धाम प्रीतिकरं महत् ।
शक्तः कोवाऽस्य माहात्म्यं वक्तुं सम्यङ्महीसुराः ॥
काको यत्र चतुर्भुजोऽजनि पुनः सूर्यात्मजः श्रीवचः ।
श्रुत्वा तस्य महामहत्त्वमतुलं ज्ञात्वा तदा सोऽगमत् ॥

लब्ध्वा चापि निजालयं निजजनान् सम्भाष्य चैवं पुनः ।
क्षेत्रेऽस्मिन् पुरुषोत्तमे ह्यधिकृतो संवारयन् मानसम् ॥

एतदनन्तरं श्रीक्षेत्रे भ्रमणे श्रीजगन्नाथदर्शनानन्तरं श्वेतगङ्गामारभ्य क्रमेण पुनर्जगदीशदर्शनपर्यन्तं कृत्वा स्वगृहप्रवेशनम् । तस्मिन् क्षेत्रे भ्रमणं सोपवासं कुर्यात्ततः द्विजैः सह पारणं तत्फलं च नीलाद्रिमहोदये वर्ण्यते। ब्रह्मोवाच-

दर्शनान्ते ततो गच्छेत् श्वेतगङ्गा शुभोदयाम् ।
प्रार्थया परया भक्त्या सर्वपापोपशान्तये ॥
गङ्गे देवि जगद्धात्रिं नमस्ते विष्णुवल्लभे ।
दक्षपार्श्वस्थिते मातः मज्जयामि तवाम्भसि ॥
पापं नाशय मे नित्ये देववन्द्येऽनघे शुभे ।
प्रार्थयित्वेति तां गङ्गां नत्वा चैव मुहुर्मुहु ॥
स्नानं च विधिवत्कुर्यान्माधवौ तौ विलोकयेत् ।
श्वेतमत्स्यकनामानौ पश्यतां सर्वकामदौ ॥
श्वेतमाधवदेवेशं पश्यतां मुक्तिदायकम् ।
पापान्धकारसूर्यस्त्वं पापं नाशय मे प्रभो ॥
मत्स्यमाधवभावेन मुक्तिदस्त्वं सदानघः ।
विष्णोर्दक्षिणपार्श्वस्थ पापं नाशय मेऽधुना ॥
इत्येवं प्रार्थनामुक्त्वा पश्येत्तौ माधवौ नरः ।
कृतकृत्यो भवेत्तावत्तयोः दर्शनतो नृप ॥
उग्रसेनस्थलं गत्वा प्रार्थयेदतिभक्तितः ।
उग्रसेनमहावाहो भवान् राक्षसनाशकः ॥
क्षेत्रस्थानां जनानां च दण्डदोऽस्यापराधतः ।
आज्ञया जगदीशस्य दण्डदो ह्यपराधिनाम् ॥
आज्ञापय महावीर समुद्रस्नानहेतवे ।

हनुमन्तं ततो दृष्ट्वा चिरजीविनमव्ययम् ॥
रामप्रिय नमस्तेस्तु नमस्ते पवनात्मजः ।
पापं हर कपिश्रेष्ठः दुर्वृत्तासुरनाशक ॥
एवं स्तुतिं च कृत्वा वै तीर्थराजान्तिकं व्रजेत् ।
दण्डवत् प्रणमेत् सप्त वारं वारिधिमव्ययम् ॥
सङ्कल्पं विधिवत् कुर्यात् दुरितक्षयपूर्वकम् ।
नीलाचलपतेर्विष्णोः प्रीत्यर्थं नृपसत्तमः ॥
बालुकावेदिकां कृत्वा चतुरस्रं सुशोभनम् ।
तत्र चक्रं विधायाथ तन्मध्ये जगदीश्वरम् ॥
सप्तधामूर्त्तिमत्रैव चैकमूर्त्तिं विभावयेत् ।
उपचारैः षोडशभिर्मनसा पूजयेद् द्विजः ॥
अथवा पञ्चभिस्तावदुपचारैर्हरिं यजेत् ।
दशदिक्षु यजेत्तावद् गोविन्दादीन् परंतपः ॥
आज्ञापय महावाहो शङ्खचक्रगदाब्जधृक् ।
समुद्रे स्नातुकामं मां नीलाचलपते प्रभो ॥
प्रार्थयित्वा तदा विष्णुं नमस्कुर्यात्पुनः पुनः ।
समुद्रं तं नमस्कृत्य प्रार्थयेदतिभक्तितः ॥
तीर्थराजनमस्तेऽस्तु नमस्ते सरितां पतेः ।
त्वद्दर्शनं भवेत्पुण्यं स्पर्शनं पापनाशनम् ॥
त्वयि स्नानाद्भवेन्मुक्तिस्तत्त्वां वन्देऽपि नित्यशः ।
इदानीं त्वज्जले सिन्धो करोमि स्नानमुत्तमम् ॥
यथोक्तफलदो भूत्वा पापं नाशय मे बहुम् ।
इत्युक्त्वा परमप्रीतस्त्रिवारं स्नानमाचरेत् ॥
तीर्थराजं नमस्कृत्वा ततश्च तर्पणादिकम् ।
कृत्वाथ पूर्ववत्पूजां मनसा त्वरया चरेत् ॥

पूर्ववत्स्वयमाचार्य विष्णोस्तस्य परात्मनः ।
लोकेश्वरं ततो गच्छेत् प्रार्थयेद् भक्तितो द्विजः ॥
गङ्गाधर नमस्तेस्तु लोकनाथमहेश्वरः ।
सर्वव्याधिविनाशाय पार्वतीपतये नमः ॥
नमामि त्वां महाबाहो पापं तापं च नाशय ।
इत्युक्त्वा परया भक्त्या लोकनाथं नमेद्बुधः ॥
कुष्ठव्याधिं समायुक्तं पश्येद्वर्षं शिवं च यः ।
कुष्ठव्याधिविनिर्मुक्त कामवत् सुन्दरो भवेत् ॥
ततो गत्वा मङ्गलायाः समीपं प्रार्थयेच्च ताम् ।
दुर्गे देवि नमस्तुभ्यं मङ्गले मङ्गलप्रदे ॥
पापं नाशय मे क्षिप्रं सर्वदैत्यविनाशिनि ।
शङ्खपृष्ठे स्थित मातः क्षेत्रस्य हितकारिणी ॥
धनं धान्यं सदारोग्यं पुत्रं पौत्रं च देहि मे ।
इति स्तुत्वा महीनाथ प्रणमेन्मङ्गलां शुभाम् ॥
आलम्बां दक्षिणे कृत्वा इन्द्रद्युम्नसरो व्रजेत् ।
सङ्कल्पं च पुरः कृत्वा प्रार्थयेत्तीर्थमुत्तमम् ॥
इन्द्रद्युम्न नमस्तुभ्यं नमस्तेऽमृतदायक ।
पापं नाशय मे क्षिप्रं मज्जतो ह्यमेधज ॥
इत्युक्त्वा तज्जले स्नात्वा तर्पणादिकमाचरेत् ।
ततो बिल्वेश्वरं गत्वा प्रार्थयेदवनीश्वरः ॥
महादेव नमस्तेस्तु नमस्ते शङ्कर प्रभो ।
बिल्वेश्वर नमस्तुभ्यं दुर्गेश वरदो भव ॥
वृषध्वज नमस्तेस्तु सर्वकामफलप्रद ।
पापजालहरः श्रीमान् चतुर्वर्गफलप्रद ॥
नमस्तुभ्यं नमस्तुभ्यं नमस्ते राक्षसान्तक ।

नीलकण्ठनमस्तेस्तु महारुद्र नमस्तुते ॥
शिव सर्वेश देवेश नागेश स्मरसूदन ।
लिङ्गरूपी शिवस्तत्वं क्षेत्रस्याधिपते प्रभो ॥
त्रिपुरारे नमस्तुभ्यं मृत्युञ्जय नमस्तुते ।
दिव्यैर्विंशति संख्यातैर्नामभिर्नृपसत्तम ॥
विल्वेश्वरं नमस्कुर्यात्तीर्थराजजले पुनः ।
चक्रतीर्थं परं स्नानं कुर्याद्वै विधिना द्विजः ॥
ततो गच्छेद्विंशां नाथ यमेशनिकटं पुनः ।
प्रार्थयेत्परमप्रीत्या मम क्लेशोपशान्तये ॥
यमेश्वरनमस्तेस्तु पापं मे हर संहर ।
स्तुत्वा नत्वा यमेशं तं चामुण्डासन्निधिं व्रजेत् ॥
चामुण्डे चण्डिके दुर्गे महापापविनाशिनी ।
शिवे शिवप्रिये गौरी त्राहि मां दुःखसागरात् ॥
इत्युक्त्वा नृपशार्दूल प्रणमेत् सिंहवाहिनीम् ।
कपालमोचनं श्रीमान् दक्षयज्ञविनाशन ॥
मणिकर्णितटस्थाय नमस्तुभ्यं महेश्वरः ।
अनया परया भक्त्या नमस्कुर्यात्तमीश्वरम् ॥
पुनः प्रदक्षिणं कृत्वा दण्डवत् प्रणतिस्तथा ।
स्तुत्या परमया भक्त्या ततो निजगृहं व्रजेत् ॥
निराहारो जितक्रोधो जितनिद्रो निशां नयेत् ।
एवं प्रदक्षिणं कुर्यात् क्षेत्रस्य पञ्चमी दिने ॥
ततः षष्ठीदिने प्रातः कृतनित्यक्रियः शुचिः ।
देवार्च्चनादिकं कृत्वा यथाशक्तिद्विजन्मने ॥
भोज्यं दद्यानिजैः सार्द्धं कुर्यात् पारणमुत्तमम् ।
एवं यः कुरुते भूप क्षेत्रभ्रमणमादरात् ॥

पृथिव्याः शतवारेण भ्रमणात् फलमालभेत् ।
देहान्ते विष्णुभवनं स गच्छेत् सुरदुर्लभम् ॥
ततोऽष्टीदिने प्रातः पूजानन्तस्तस्तो नृपः ।
महास्नानं विधिं कुर्यात् विष्णोस्तस्य कृपानिधेः ॥
सर्वाङ्गे चन्दनं दत्वा नव्यवस्त्रार्पणं चरेत् ।
पुष्पालङ्कारनिचयैर्भूषयेत्कमलेक्षणम् ॥
देवतानां पुरो देशे कलशान् स्थापयेन्नृपः ।
आचार्यारचयेयुस्ते वरुणार्च्चनमुत्तमम् ॥
ततो मध्याह्नपूजा सा कर्त्तव्या च यथाविधि ।
मूलकव्यञ्चनादीनि शाकानि व्यञ्जनानि च ॥
नानापूपसमूहं च शिताज्यादिकजर्जरम् ।
अन्नं चारुतरं पूर्णं दद्यान्नैवेद्यमीदृशम् ॥
दद्यान्मध्याह्नपूजायां सुखार्थं कमलापते ।
ततोऽर्च्चकश्च ब्रह्मा च सोऽग्निशर्मा च भक्तितः ॥
मङ्गलारोपणं ते वै कुर्यात्तुः प्रीतये हरेः ।
वन्दापयेयुः क्रमतो विष्णुं नीलाचलेश्वरम् ॥
एतदुत्सवमानन्दाद् यः कुर्यान्नृपसत्तम ।
पश्येद्वा परया भक्त्या मुक्तः स्यात्पापवृन्दतः ॥
अन्ते विष्णुपुरं गच्छेत् सर्व शर्मप्रदं परम् ।
अस्मिन् मासि शुभे लग्ने सुमुहूर्त्ते शुभे दिने ॥

एवं विधानि जगन्नाथक्षेत्रतत्त्वपरकानि बहुनि वचनानि विभिन्नेषु पुराणेषु समालोचनाग्रन्थेषु निबन्धेषु च प्राप्यन्ते । जगन्नाथतत्त्वमद्यापि प्रहेलिकामयं तथा च अविस्पष्टं विद्यते । यद्यपि समालोचकाः जगन्नाथतत्त्वोपरि बहून् ग्रन्थान् रचितवन्तः तथापि जगन्नाथतत्त्वं समुद्र इव अकलनीयमनन्तं च भाति ।

अयं जगन्नाथधर्मः उत्कलस्य हृदयकन्दरावस्थितप्राणभूतः धर्म इति न कापि अतिशयोक्तिः । भगवान् श्रीजगन्नाथः उत्कल-वासिनामेतादृशः विश्वासः रूपः प्रतिभाति येन सर्वेऽपि जनाः जगन्नाथगतप्राणाः भवन्ति । सर्वेषु सम्प्रदायेषु जैन-बौद्ध-तान्त्रिक-शैव-वैष्णव-शाक्त-गाणपत्य-सौर-शावर इत्यादिधर्मशाखासु प्रत्येकं धर्मस्य अयं प्रतीकरूपः नास्त्यत्र विसंवादः । जगन्नाथधर्मः न केवलं भारतवर्षे अपि तु समग्रे विश्वे बहुमत-समन्वित-सार्वजनीनोदारदृष्टिभङ्ग्या एकस्मिन् सूत्रे ग्रन्थितो दृश्यते । अद्यापि समालोचकाः जगन्नाथस्य नामकरणं जगन्नाथस्य रहस्यमुद्घाटयितुं नितरामेव असमर्थाः भवन्ति। वेदे श्रीजगन्नाथस्य दारुतत्त्वविषये एकं पद्यं प्राप्यते । यथा-

अदो यद्दारुप्लवते सिन्धोः पारे अपुरुषम् ।
तदारभस्व दुर्हणो तेन गच्छ परस्परम् ॥

अनेकेषां मते जगन्नाथशब्दः जैनधर्मस्य प्राणप्रवाहः । यतो हि जगन्नाथ भवति वृषभ मूर्त्ति इति तेषां सम्प्रदाये विश्वासः । बौद्धा अपि जगन्नाथं बुद्धस्य प्रतीकरूपेण स्वीकुर्वन्ति । परन्तु अयं जगन्नाथः समग्रस्य मानवसमाजस्य विद्यते । यथाऽऽकाशस्थितं नक्षत्रं स्वमुद्रिकया धारयितुं न शक्यते, तथैव सर्वतन्त्रस्वतन्त्रोऽयं जगन्नाथः सर्वेषामेव अस्यां जगन्नाथपुर्यां पद्यमिदं बहूनां पण्डितानां कण्ठे नरीनृत्यते । तच्च पदं यथा-

यं शैवाः समुपासते शिव इति ब्रह्मेति वेदान्तिनः ।
बौद्धाः बुद्ध इति प्रमाणपटवः कर्त्तेति नैयायिकाः ॥
अर्हन् नित्यथ जैनशासनरताः कर्मेति मीमांसकाः ।
सोऽयं वो विदधातु वाञ्छितफलं त्रैलोक्यनाथो हरिः ॥

वायुपुराणे भगवतः विष्णोः दशावतारः प्राप्यते । तत्र दशावतारेषु बुद्धस्यावतारमपि स्वीक्रियते । मथुरावाराणस्यां च पञ्जिकासु श्रीजगन्नाथं ब्राह्मण्यधर्मस्य बुद्धावताररूपे ग्रहणं दृश्यते। अनेकस्थानेषु नवमावतारे जगन्नाथस्य चित्रं प्राप्यते । वास्तविकतया श्रीजगन्नाथस्य ग्रहणं न समीचीनमवतारमध्ये । अयं परंब्रह्म नित्यशाश्वतविष्णुरूपः कथं वावतारो भवेत् । यस्य दर्शनमात्रेण जनः विमुक्तो भवति । उच्यते च जगन्नाथः षोडशकलासम्पन्नः नन्दनन्दनः भगवान् श्रीकृष्णः एताभ्यः षोडशकलाभ्यः एकैव कला ।

श्रीजगन्नाथस्य महाप्रसादविषये बहुषु ग्रन्थेषु बह्वालोचनं प्राप्यते, यस्य सेवनमात्रेण जनः निर्वाणं प्राप्नोति । वैष्णवानां मुक्तिः अस्मिन्नेव निहिता विद्यते । जगन्नाथस्य प्रसादभिन्नं नान्यत्र कुत्रापि प्रसादस्याख्या महाप्रसादमिति न भवति ।

यदि कश्चिद्धर्मार्थी स्वपुण्यार्जननिमित्तं जगन्नाथपुरीं समागच्छति स प्रातः समुद्रस्नानं विधाय पार्श्वस्थितान् देवान् दक्षिणावर्त्तेन दर्शनं कृत्वा अन्ते च जगन्नाथदर्शनं ततः ब्राह्मणभोजनं तदनन्तरं महाप्रसादसेवनं करोति। एतेन कर्मणा तस्य महापुण्यं भवति। भगवतः श्रीजगन्नाथस्य धाम भवति श्रीधामः । समग्रभारतवर्षे जगन्नाथस्य प्रशस्ति बहुप्राचीनकालात् प्राप्यते । एकादश-शताब्दीयदानपत्रे प्राप्यते यत्-

श्रीधाम्नः पुरुषोत्तमस्य महतो नारायणस्य प्रभो-
र्नाभिपङ्केरुहादिभवस्य जगतः श्रष्टा स्वयम्भूः स्मृतः ॥

भास्वती-रुद्रयामल-कालिकापुराण-तन्त्रयामलप्रभृतिग्रन्थेषु पुरुषोत्तमधाम्नः वर्णना विद्यते ।

समग्रेऽस्मिन्नुत्कले विष्णुदेवानामुपासना बहुलतया प्राप्यते । कृष्णार्च्चनं वासुदेवार्च्चनं, माधवार्च्चनं अतीवप्रसिद्धं विद्यते । अयं

जगन्नाथः यद्यपि बहुषु सम्प्रदायेषु सन्निविष्टः तथापि समालोचकानां दृष्टिभङ्ग्या अयं वैष्णव इति । जगन्नाथस्य वाह्यदृश्यान्तराले भगवतः प्राणनिर्यासिसन्धानं नूनं कष्टसाध्यं कर्म । जगन्नाथस्य सम्बन्धे न कोऽपि सिद्धान्तः स्वयं सम्पूर्णः अपरिवर्त्तनीयो वा वक्तुं शक्यते । यतो हि अयं रहस्यमयः । अस्मिन् रहसि तस्यापरिमेयत्वस्य महत्त्वं निहितं विद्यते।

पुरी जगन्नाथधाम्नि अनेकाः देवताः दर्शनीयाः राजन्ते । तासु देवतासु श्रीलोकनाथमन्दिरं सुप्रसिद्धम् । यस्य दर्शनेन पादोदकपानेन च जनाः संसारबन्धबन्धनात् विमुक्ताः भवन्ति । यद्यपि इदं ज्योतिर्लिङ्गं नास्ति तथापि जगन्नाथस्य महिम्ना सह अस्य सुमहान् सम्बन्धो विद्यते । अतः यदा जगन्नाथदर्शनार्थि पुरीं समागच्छति तदा लोकनाथदर्शनमपि करोति। पुरीस्थितमपरं तीर्थक्षेत्रं भवति श्वेतगङ्गा । यत्र जलं गङ्गाजलमिव भवति । गङ्गया सह जलाशयस्यास्य संयोगो विद्यते इति पुराणाद्विज्ञायते । प्राचीनाः पण्डिता अपि कथयन्ति। ये तावदत्र नित्यं स्नानमाचरन्ति अधुनाऽपि अस्य जलं वर्षेऽस्मिन्नेकवारं नूनं गङ्गाजलमिव भवति । अत्र आभ्यन्तरेण सम्बन्धेन गङ्गामाताऽपि जगन्नाथदर्शनाय समागच्छति । अत्र स्नानं तु महापुण्यदायकं भवति। अपरं तीर्थधाम भवति श्रीगुण्डिचामन्दिरम्। यत्र भगवान् जगन्नाथः, सुभद्रा, बलभद्रश्च रथयात्राकाले नवदिनानि तत्रैव निवसन्ति । अतः तदेव क्षेत्रं मुक्तिदायकमिति निश्चप्रचं वक्तुं शक्यते । मन्दिरेऽस्मिन् श्रीजगन्नाथस्य नवमीदर्शनं मोक्षदायकं भवतीति जनानां विश्वासः । अद्यापि बहवः जनाः नवमीदर्शनकर्त्तुं सन्ध्याकाले समागच्छन्ति। भगवतः जगन्नाथस्य सन्ध्यादर्शनं मुक्तिदायकमिति नीलाद्रिमहोदयादिग्रन्थेषु प्राप्यते ।

कोणार्कतीर्थक्षेत्रम्—

कोणार्कतीर्थक्षेत्रं जगन्नाथपुरीतः त्रिंशत्किलोमिटरदूरे समुद्रकूले अवस्थितं विद्यते । इदं मन्दिरं भारतस्य सर्वश्रेष्ठं कलाभास्कर्यमयमस्ति । यदि आंग्लाः जनाः ताजमहलदर्शनात् प्राक् दर्शनं कुर्युः, तर्हि इदं तावन्मन्दिरं पृथिव्याः सप्ताश्चर्येषु एकं नूनमभविष्यत् । अतः उत्कलीयानां कृते कोणार्कमन्दिरं समग्रविश्वे गौरवस्य विषयः । उत्कलस्य राजानः धर्म-संस्कृति-शिल्पकला-स्थापत्यादीनां पृष्ठपोषकाः आसन् । मन्दिरस्यास्य निर्माणं नरसिंहदेवेन कृतम् । अयं नरसिंहदेवः गङ्गवंशीयराजा आसीत्। विद्यते च मन्दिरमिदं द्वादशवर्षाणां राजस्वेन द्वादशवर्षाणि यावत् द्वादशशतकैः श्रमिकैः मन्दिरमिदं सम्पूर्णमभूत् । किम्बदन्त्यनुसारं मन्दिरस्यास्य पूर्णता एकेन द्वादशवर्षवयस्केन बालकेन धर्मपदनाम्ना स्वकीयविचक्षणकलानिपुणेन परिपूर्णता विहिता । मन्दिरस्य सम्पूर्णं निर्माणं प्रस्तरेण सञ्जातम् । मन्दिरस्याकृतिः रथाकृतिः वर्त्तते । मुख्यं मन्दिरं भग्नमस्ति । मुखशाला अर्द्धभग्नावस्थायां विद्यते । कोणार्कमन्दिराद् विज्ञायते उत्कले सूर्यपूजायाः माहात्म्यमासीत् । वाचस्पतिमिश्रस्य तीर्थचिन्तामणिग्रन्थे कोणार्कस्य माहात्म्यं पूजाप्रकारं च वर्णनं दृश्यते । पूजकब्राह्मणाः समुद्रे स्नानं कृत्वा मन्दिरस्य त्रिवारं प्रदक्षिणं कृत्वा अर्कदेवमर्च्चयन्ति स्म । अस्माद् विज्ञायते षोडशशताब्दीं यावत् मन्दिरमिदमक्षुर्णमासीत्। अस्मिन् मन्दिरे सूर्यदेवस्य एका रमणीया मूर्त्तिः प्रपूजिताऽभूत् । कथ्यते मन्दिरस्य भग्नानन्तरम् अर्द्धभग्नं विग्रहं समानीय जगन्नाथमन्दिर-स्थितस्य सूर्यमन्दिरे प्रपूजितो भवति । मन्दिरस्यास्य भग्नस्य किं कारणमद्यापि रहस्यमयम्। जगन्नाथलिङ्गराजमन्दिरयोः निर्माणानन्तरं मन्दिरस्यास्य निर्माणं सञ्जातम् । अतः अत्र कलायाः स्थापत्यस्य

च वैज्ञानिकता अधिका विद्यते । पुनश्च प्रस्तराणि अपि विशिष्टानि भवन्ति । तदर्थं समालोचकाः भग्नस्य किं कारणं निर्णेतुमसमर्थाः भवन्ति ।

देवतानां परिभ्रमणं रथेनाऽभवदिति शास्त्राद्विज्ञायते । सूर्यस्य मन्त्रेऽपि सप्ताश्ववाहनं सूर्यमिति प्रार्थनाऽपि विद्यते । तस्मादेव कारणान्मन्दिरमिदं रथाकारेण दण्डायमानम् । चतुर्विंशतिचक्राणि सप्ताश्वानां परिकल्पनं मन्दिरेऽस्मिन् दृश्यते । वेदानुसारं मन्दिरस्य परिकल्पनं शिल्पिनां कृते समीचीनं भवति । कोणार्कमन्दिरं भवति प्रस्तरखोदिता एका कमनीया कविता । कोणार्कस्य चक्रं हस्ती-अश्व-प्रेमपत्रशोभिनीनारी-आलसीकन्या इत्यादीनि चित्राणि उत्कलीयशिल्पकलायाः चरमोत्कर्षनिदर्शनानि भवन्ति।

मन्दिरस्य तीर्थमाहात्म्यं धार्मिकतत्त्वविषये मयाऽत्र कानिचित् पुराणवचनानि उपस्थाप्यन्ते । यथा-

एतन्मया मुनिश्रेष्ठाः क्षेत्रं प्रोक्तं सुदुर्लभम् ।
कोणार्कस्योदधेस्तीरं भुक्तिमुक्तिफलप्रदम् ॥
स्नात्वैव सागरे दत्त्वा सूर्यायार्घ्यं प्रणम्य च ।
नरो वा यदि वा नारी सर्वकामफलं लभेत् ॥
ततः सूर्यालयं गच्छेत् पुष्पमादाय वाग्यतः ।
प्रविश्य पूजयेद्भानुं कुर्यात्तत्रिः प्रदक्षिणम् ॥
तान्त्रिकैर्विदिकैर्मन्त्रैः भक्त्या कोणार्कमर्च्चयेत् ।
गन्धैर्पुष्पैस्तथा धूपैर्दीपैर्नैवेद्यकैरपि ॥
दण्डवत्प्रणिपातैश्च जयशब्दैस्तथापरैः ।
एवं सम्पूज्य कोणार्कं सहस्रांशुं जगत्प्रभुम् ॥
दशानामश्वमेधानां फलं प्राप्नोति मानवः ।
सर्वपापविनिर्मुक्तो युवा दिव्यवपुर्नरः ॥

सप्ताऽवरान् सप्तपरान् वंशान्नुद्धृत्य भो द्विजाः ।
विमानेनार्कवर्णेन कामगेन सुवर्च्चसा ॥
प्रगीयमानो गन्धर्वः सूर्यलोकं स गच्छति ।
भुक्त्वा तत्र वरान् भोगान् यावदाहृतसंप्लवम् ॥
पुण्यक्षयादिहाऽऽयातः प्रवरे योगिनां कुले ।
चतुर्वेदो भवेद्विप्रः स्वधर्म निरतः शुचिः ॥
योगं दिवस्पतेः प्राप्य ततो मोक्षमवाप्नुयात् ।
चैत्रे मासि सिते पक्षे यात्रां मदनभञ्जिकाम् ॥
यः करोति नरस्तत्र पूर्वोक्तं स फलं लभेत् ।
शयनोत्थानयोर्भानोः संक्रान्त्यां विषुवेऽयने ॥
वारे रवेस्थितौ चैव सर्वकालेऽथवा द्विजाः ।
ये तत्र यात्रां कुर्वन्ति पुरुषाः संयतेन्द्रियाः ॥
विमानेनार्कवर्णेन सूर्यलोकं व्रजन्ति ते ।
यस्तत्र सवितुः क्षेत्रे प्राणांस्त्यजति मानवः ॥
स सूर्यलोकमास्थाय देववन्मोदते दिवि ।
पुनर्मानुषतां प्राप्य राजा भवति धार्मिकः ॥
योगं रवेः समासाद्य ततो मोक्षमवाप्नुयात् ॥

कोणार्कक्षेत्रमधिकृत्य-

आस्ते तत्र महादेवः तीरे नदनदीपतेः ।
रामेश्वर इति ख्यातः सर्वकामफलप्रदः ॥
तत्रार्च्चयन्ति ये मर्त्याः स्नात्वा सम्यङ्महोदधौ ।
गन्धैःपुष्पैस्तथा धूपैर्दीपैर्नैवेद्यकैर्वरैः ॥
प्रणिपातेस्तथा स्तोत्रे गीतैर्वाद्यैर्मनोहरैः ।
राजसूयफलं प्राप्य वाजिमेधफलं तथा ॥

प्राप्नुवन्ति महात्मानः संसिद्धिं परमां तथा ।
कामगेन विमानेन किङ्किणीजालमालिना ॥
प्रगीयमाना गन्धर्वैः शिवलोकं व्रजन्ति ते ।
शाङ्करं योगमासाद्य ततो मोक्षं व्रजन्ति ते ॥

अनन्तरं कोणार्कविधिप्रसङ्गे किञ्चिदुपस्थाप्यते । यथा- "ॐ अद्याभिमतफलप्राप्तिकामः सागरस्नानसूर्यार्घ्यदान तत्प्रणाममहं करिष्ये" इति सङ्कल्प्य सागरे सविधितर्पणान्तं स्नानं कृत्वा सूर्यं प्रणमेत् । ततः पुष्पमादाय मौनी कोणार्कमठं प्रविश्य- "ॐ अद्य दशाश्वमेधजन्यफलप्राप्तिसप्ताऽवरसप्तपरवंशोद्धारपूर्वकसर्वपाप-विनिर्मुक्तवरदिव्यवपुर्वरबहुगन्धर्वोपगीयमानात्मीयार्कवर्णकामग-सुवर्च्चोविमानकरणकसूर्यलोकगमनतदधिकरणकाहूतसंप्लव-पर्यन्तवरबहुभोगोपयोगतदुत्तरैतल्लौकिकप्रवरयोगिकुलाधि-करणकचतुर्वेदिस्वधर्मं निरतशुचिविप्रत्वभवनतदुत्तरदिवस्पति-योगप्राप्तिपूर्वकमोक्षावाप्तिकामो ब्रह्मपुराणोक्तविधिना कोणार्क-पूजनमहं करिष्ये' इति सङ्कल्प्य अर्कं त्रिः प्रदक्षिणं कृत्या आगमिकैर्वैदिकैश्च मन्त्रैर्गन्ध-पुष्प-धूप-दीप-नैवेद्य-दण्डप्रणाम-जयशब्दैरर्च्चयेत् ।

क्षेत्रस्यास्य महिमाविषये अपरमपि तथ्यं प्राप्यते यत् । अभिशापग्रस्तः शाम्बः कुष्ठव्याधिना आक्रान्तो भूत्वा क्षेत्रेऽस्मिन् सूर्यमाराधयामास । शाम्बस्याराधनया भगवान् सूर्यः प्रसन्नः सन् शाम्बस्योद्धारं कृतवान् । एतेन क्षेत्रस्य प्रसिद्धिः बहुप्राचीन-कालात्प्रचलिता अस्ति । वैज्ञानिकाः अपि क्षेत्रमिमं कुष्ठरोगस्य निराकरणाय सर्वोत्कृष्टं स्थानमिति युक्तिमुपस्थापयन्ति । अतः सामाजिक-धार्मिक-शारीरिक-वैज्ञानिकदृष्टिभङ्ग्या क्षेत्रस्यास्य माहात्म्यं नितरां विद्यते ।

विरजाक्षेत्रम्—

देवलीलाभूमिरियमुत्कलाभूमिः। मन्दिरमालिन्या विशिष्टं स्थानमधिरोहति। समग्रे भारते वर्षे यावन्ति तीर्थक्षेत्राणि समालोचकैः प्राप्यन्ते। तेषु उत्कलस्य विरजाक्षेत्रं सर्वेष्वपि युगेषु सम्मानयोग्य-तीर्थक्षेत्रेषु विचार्यते। क्षेत्रमिदं कटकनगरादशीतिकिलोमिटरदूरे पुण्यतोयावैतरणीकूले अवस्थितमस्ति। अत्र गमनाय वाष्पीयशकटं तथा च अन्यान्यपि यानानि सौविध्यानि सन्ति। उत्कलस्य मुख्यभूतेषु चतुर्षु शिवविष्णुसूर्यदेवीक्षेत्रेषु अस्य देवीक्षेत्रस्य माहात्म्यं सर्वभारतीयस्तरे प्राप्यते। विष्णुक्षेत्ररूपेण श्रीपुरुषोत्तमक्षेत्रं पुरी, सूर्यक्षेत्ररूपेण कोणार्कः, शिवक्षेत्ररूपेण भुवनेश्वरम्, देवीक्षेत्ररूपेण विरजाक्षेत्रं यज्ञपुरमिति सुप्रसिद्धं विद्यते। क्षेत्रस्यास्य माहात्म्यदृष्ट्या विचारे कृते सति समग्रेऽस्मिन् भारतवर्षे द्विपञ्चाशद्देवीपीठानि विद्यन्ते। तानि च पीठानि तदर्थमेव प्रसिद्धं यदा दक्षकृतस्य यज्ञस्य आयोजनकाले पित्रा भर्त्सिता भूत्वा शिवपत्नी सती यज्ञानले प्रविष्टा ततः भारतस्य एतेषु द्विपञ्चाशत् स्थानेषु देव्याः अङ्गानि पतितानि। अतस्तत्तत् क्षेत्रं शाक्तक्षेत्रं देवीक्षेत्रं वा भवति। तेषु देवीक्षेत्रेषु विरजाक्षेत्रं सुप्रसिद्धं भवति। पुराणप्रसिद्धस्य गयासुरस्य नाभिमण्डलमस्मिन्नेव प्रदेशे पतितमिति कृत्वा मण्डलस्यापरं नाम नाभिगयातीर्थमिति सुपरिचितमस्ति। पुराणप्रसिद्धायाः वैतरण्याः सुनीलजलकल्लोलकमनीयप्रदेशे देवदारुनारीकेलादिवृक्षैः सुशोभिते प्रान्ते जगदम्बिकायाः विरजायाः समुच्चं मन्दिरं दण्डायमानं विद्यते। क्षेत्रस्यास्य पूर्वोत्तरदिग्भागे किलाटेश्वरमन्दिरं पश्चिमे विल्वेश्वरमन्दिरं दक्षिणे वारुणेश्वरमन्दिरं सुशोभितं दृश्यते। सुप्राचीनकालाद् देव्याः विरजायाः क्षेत्रेऽस्मिन्नधिष्ठानं पूजनं च भवति। परन्तु देव्याः विरजायाः कस्तावत्प्रतिष्ठाकाल इति नाद्यापि स्थिरीकृतः। महाभारते

वैतरणीतटवासिनी जगदम्बिकायाः विरजायाः विस्तृतं वर्णनं प्राप्यते। पाण्डवानामागमनमभूदिति महाभारतस्य वनपर्वणि । यथा-

ततो वैतरणीं गच्छेत्सर्वपापप्रमोचनीम् ।
विरजां तीर्थमासाद्य विराजति यथा शशि ॥

अस्मिन्नेव पवित्रे स्थाने देवतानां सहयोगेन धर्मदेवः युधिष्ठिरः यज्ञानुष्ठानं चकार । स्थानमिदमेतादृशं पुण्यकरं यत् स्वर्गलोकस्य द्वाररूपेण एतत् परिगणितं भवति । महाभारतस्य वचनमिदं न केवलं देव्याः विरजायाः महत्त्वं प्राधान्यञ्च प्रख्यापयति अपि तु पीठस्यास्य प्राचीनता गवेषणार्थं बहुतात्पर्यपूर्णं भवति ।

इयं विरजा यज्ञसंभूता । ब्रह्माण्डपुराणानुसारं प्राप्यते यत् प्रजापतिः वैतरणीकूले सुदीर्घकालं यावद् एकस्य यज्ञस्यानुष्ठानं कृतवान्। तस्मादेव यज्ञाद् अखिलजगतः अभयदात्रीकरुणामयी जगन्माता शूलधारिणी देवी विरजा प्रकटिता सञ्जाता । विरजामभिलक्ष्यीकृत्य तन्निकटवर्त्तिग्रामाणामपि समृद्धेर्विकाशः सञ्जातः । अतः विरजाक्षेत्रे भौमवंशीयाः राजानः सोमवंशीयाः राजानः तत्रैव राजधानीं कृतवन्तः । अस्मिन्नेव विरजाक्षेत्रे महाराजययातिकेशरी दशाश्वमेधयज्ञस्य अनुष्ठानं कृतवान् । दशाश्वमेधस्य स्मृतिं वैतरणीकूलमावहति दशाश्वमेधनाम्ना ।

अस्मिन् तीर्थक्षेत्रे श्रावणमासस्य शुक्लद्वादश्यां वैशाखमासस्याक्षयतृतीयायाम् आश्विनमासस्य पितृपक्षे महालयाश्राद्धकर्त्तुं बहवः धर्मप्राणाः जनाः नाभिगयायां पिण्डदानाय समागच्छन्ति ।

इयं विरजादेवी द्विभुजा, वामहस्ते महिषरूपिणः दानवस्य पिच्छं धृत्वा दक्षिणहस्ते शूलेन महिषस्य पृष्ठं शूलविद्धं करोति । देव्याः चूडायां गणपतिः, फणीसम्राट, योनिमुद्रा, लिङ्गं च सुशोभितं भवति। देव्याः एतादृशं रूपं समग्रे भारते विरलं भवति । देव्याः

पूजनं भुवनेश्वरीमन्त्रेण भवति । परन्तु जन्माष्टमीतः महाष्टमीं यावत् देव्याः पूजनं वनदूर्गामन्त्रेण भवति । देव्याः मन्दिरे मेष-छाग-महिषानां बलिप्रदानं भवति । क्षेत्रमिदं तन्त्रक्षेत्ररूपेण तान्त्रिक-देवतानां च समावेशेन अपूर्वमहत्त्वं जनयति । क्षेत्रस्य माहात्म्यविषये मयाऽत्र कानिचित् पुराणवाक्यन्युपस्थाप्यन्ते-

विरजे विरजा माता ब्राह्मणी संप्रतिष्ठिता ।
यस्याः संदर्शने मर्त्याः पुनात्यासप्तमं कुलम् ॥
स्नात्वा दृष्ट्वा तु तां देवीं भक्त्यापूज्य प्रणम्य च ।
नरः स्ववंशमुद्धृत्य मम लोकं स गच्छति ॥
अन्याश्च तत्र तिष्ठन्ति विरजे लोकमातरः ।
सर्वपापहरा देवी वरदा भक्तवत्सलाः ॥
आस्ते वैतरणी तत्र सर्वपापहरा नदी ।
यस्यां स्नात्वा नरश्रेष्ठ सर्वपापैः प्रमुच्यते ॥
आस्ते स्वयम्भूस्तत्रैव क्रीडरूपी हरिः स्वयम् ।
दृष्ट्वा प्रणम्य तं भक्त्या नरो विष्णुपुरं व्रजेत् ॥
कपिलागोग्रहे सोमतीर्थे चालावुसंज्ञके ।
मृत्युञ्जयं क्रोडतीर्थे वसुसिद्धेश्वरे तथा ॥
तीर्थेष्वेतेषु मतिमान् यत् फलं लभते नरः ।
तत्फलं समवाप्नोति विरजे स्नानतर्पणात् ॥
विरजे यो मम क्षेत्रे पिण्डदानं करोति वै ।
स करोत्यक्षयां तृप्तिं पितृणां नात्र संशयः ॥
मम क्षत्रे मुनिश्रेष्ठो विरजे ये कलेवरम् ।
परित्यजन्ति पुरुषास्ते मोक्षं प्राप्नुवन्ति वै ॥

लिङ्गराजक्षेत्रम्—

उत्कलस्य परमपावनीराजधानी मन्दिरमालिनी नगरी भवति

भुवनेश्वरम् । कदा वा प्राचीनकाले नामकरणमस्याः भुवनेश्वरमिति जातं तन्न वक्तुं शक्यते । परन्तु यदि कोऽपि ऐतिहासिकः वैज्ञानिकः धार्मिको वा समागच्छति तदा तस्य मनसि अस्याः रूपवैभव्यं दृष्ट्वा तस्य मनसि आयाति यत् भुवनेश्वर एव । यतो हि अस्यां नगर्यां न केवलं भुवनेश्वरः अपि तु त्रिभुवनेश्वरः भगवान् शङ्करः सुमहतालिङ्गेन लिङ्गराजनामधारणं कृत्वा सुविशाले मन्दिरे सुशोभते ।

भुवनेश्वरस्यास्य अपरा संज्ञा भवति मन्दिरनगरीति । अस्मिन् भुवनेश्वरे षष्ठशताब्दीतः चतुर्दशशताब्दीं यावन् निर्मितानि पञ्चसहस्र-मन्दिराणि दृश्यन्ते । पौराणिकमतानुसारं भुवनेश्वरस्य कलास्थापत्यं बहुवर्षेभ्यः प्राक् प्रतिष्ठितं भवति । अतः उत्कलस्य विभवरूपेण कलास्थापत्यमेव परिगणितं जायते । अस्यामेव भूमौ चक्रवर्त्तीसम्राट् चण्डाशोकः महाराजः अशोकः धर्माशोके परिवर्त्तितो जातः। कलिङ्गस्य वीरत्वं कलास्थापत्यं चरमोत्कृष्टम् आसीत् । अस्योत्कलस्य विजेतुमशोकः उद्यमं कृतवान् । तेन च युद्धेन बहुलक्षपरिमिताः जनाः मृताः । जनानां रुधिरेण पार्श्वस्थितानां नदीनां जलमपि रुधिरमयं सञ्जातम् । किं बहुना एतद्दृष्ट्वा अशोकस्य मनः विगलितं ततः संन्यासं च तेन गृहीतम् । जनानां येन कर्मणा उपकारः कल्याणं च भवति तेन कर्मणा स निजं नियुक्तयामास । बौद्धधर्मस्य दीक्षां गृहीत्वा बौद्धधर्मस्य प्रचारनिमित्तं तेन परिवारेण सह सुमहानुद्यमः कृतः । एतस्माद् विज्ञायते क्षेत्रस्यास्य एतादृशं महत्त्वं विद्यते । येन राक्षसोऽपि देवानां प्रियदर्शी देवत्वं प्राप्नोति ।

भुवनेश्वरस्य समीपवर्त्ती धवलगिर्यां खण्डगिर्याश्चानु-शासनवाणी लभ्यते। तत्रापि उत्कलस्य कला सन्निहिता विद्यते । उत्कलस्य मन्दिरनिर्माणपद्धतिः काचिद् भिन्ना वर्त्तते । उत्कलस्य कलाकाराः स्थपत्यः मय तथा मण्डनशिल्पीनीत्यनुसारेण शिल्पकलां

कृतवन्त इति शोभनेश्वरस्तथा अनन्तवासुदेवस्य शिलालेखः निर्दिशति। चारुकलया परिपूर्णं भुवनेश्वरं तत्र विराजमानं मन्दिरं नितरां दर्शनीयमेव । बहुषु मन्दिरेषु राजाराणीमन्दिरमनन्तवासुदेवमन्दिरं लिङ्गराजमन्दिरं रामेश्वरमन्दिरं कपिलेश्वरमन्दिरमन्यतमम् ।

भुवनेश्वरक्षेत्रमिदं शैवक्षेत्रमिति न काऽपि विप्रतिपत्तिः । क्षेत्रेऽस्मिन् अष्टोत्तरलक्षपरिमितानि शिवलिङ्गानि सन्तीति समालोचकाः प्रतिपादयन्ति। सर्वत्र मन्दिरे शिवलिङ्गं, शिवस्य वाहनं वृषभं मन्दिरगात्रे नृत्यवाद्यरतानां नरनारीणां पक्षिणां तथा च विभिन्नानां पुष्पाणां प्रस्तरनिर्मिता मूर्त्तिः नितरां दर्शकानां मनसि हृतान्येव । क्षेत्रेऽस्मिन् दशमहाविद्यायाः पूजनं न किमप्याश्चर्यं जनयति । अपि तु शैवक्षेत्रेऽस्मिन् कथं विष्णुमन्दिराणां निर्माणं तत्र च विष्णोः पूजनम् आश्चर्यं जनयति । अत्र समाधानमेतद्भवितुमर्हति शिवस्तु परमवैष्णवः शिवक्षेत्रे विष्णुमन्दिरं न कदापि हानिकारकम् । ऐतिहासिक-विचारभङ्ग्या विवेचनेन केशरीवंशेन नृपतिना परमशैवेन ययातिकेशरिणा लिङ्गराजमन्दिरं निर्मितम् । द्वादशशताब्द्याः गङ्गवंशीयचन्द्रिकादेव्याः अनन्तवासुदेवमन्दिरं विष्णुमन्दिरं निर्मितम्। अतः शैवोऽपि वैष्णवो भवति ।

यदा कश्चिद्धर्मार्थी तीर्थोद्देश्येन लिङ्गराजदर्शनाय समागच्छति तदा प्रातः विन्दुसागरे पुष्करे स्नानं, तर्पणं, मन्त्रजपादिकं विधाय ततः क्षेत्रेश्वरलिङ्गराजदर्शनं करोति । ततः अनन्तवासुदेवस्य दर्शनं कृत्वा गौरीदर्शनं च विधाय केदारगौरीदेवजलाशयाज्जलं पीत्वा अनन्तवासुदेवस्य प्रसादं भुञ्जीत । समग्रे भारतवर्षे यावन्ति-शिवक्षेत्राणि विराजन्ते न कुत्रापि शिवस्य स्यन्दनयात्रा अनष्ठीयते । किन्तु लिङ्गराजस्य चैत्रमासस्य अशोकाष्टम्यां स्यन्दनोत्सवः महासमारोहेण अनुष्ठितो भवति । अतः शिवचतुर्दश्यां दर्शनेन

श्रावणमासि जलदानेन, अशोकाष्टम्यां लिङ्गराजदेवस्य रथयात्रा दर्शनेन, शीतलषष्ठ्यां शिवविवाहोत्सवं दृष्ट्वा जनाः पुण्यमर्जयन्ति। एतेषूत्सवेषु सुमहान् जनसमागमोऽपि भवति । स्कन्दपुराणे उत्कलखण्डे क्षेत्रस्य माहात्म्यं वैशिष्ट्यं विन्दुसरस्नानमाहात्म्यं च प्रतिपादितं विद्यते ।

उच्यते च—

पुण्यं सर्वतमोध्वंसि स्पष्टमस्ति महीतले ।
स्नानं ये कुर्वते मर्त्याः भक्त्यास्य विमले जले ॥
सप्तजन्मार्जितं पापं नश्येत्तेषां न संशयः ।
गोसहस्रप्रदानेन यत् फलं जायते नृप ॥
तत्फलं च भवेत्तेषां विन्दुसागरमज्जनात् ॥

नीलाद्रिमहोदयेऽपि विन्दुसागरस्नानमनन्तवासुदेवदर्शनं सर्वशेषे लिङ्गराजदर्शनं महापुण्यप्रदं भवतीति तृतीयाध्याये विद्यते यथा-

एकाम्रविपिनं नाम क्षेत्रं परमपावनम् ।
चक्रेण निर्मितं राजन् विष्णुना दैत्यजिष्णुना ॥
अनन्तशायी भगवानत्रैवास्ते परन्तपः ।
पुरुषोत्तमसीमान्ते वर्त्तते स सदाशिवः ॥
यत्र काशी जनाकीर्णा सन्त्यद्य नृपतेऽधुना ।
तीर्थो विन्दुह्रदो नाम निर्मितस्तेन शम्भुना ॥
लिङ्गरूपी स्वयं भूत्वा वर्त्तते गिरिजाधवः ।
तीर्थविन्दुह्रदे स्नात्वा त्वनन्तपुरुषोत्तमम् ॥
लिङ्गं काशीपतेः शीघ्रं पश्य भूपशिरोमणेः ।
ततो नीलाचलं सर्वे गमिष्यामोऽबिलम्बतः ॥

एवमेव विभिन्नेषु पुराणेषु कपिलसंहितायामनेकानि फलश्रुतिवाक्यानि प्राप्यन्ते । एषां समेषां वचनानां पर्यालोचनेन इदमेव तत्त्वमयाति यत्

क्षेत्रमिदं पुराणप्रसिद्धं सिद्धं मुक्तिदायकमिति नास्त्यत्र काचिद् विप्रतिपत्तिः। यस्य देवदेवस्य महादेवस्य पञ्चाक्षरमन्त्रेण दुःखनाशनं त्र्यम्बकमिति महामृत्युञ्जयमन्त्रजपेन सर्वविधान् कामान् प्राप्नोति जनः। तस्यैव लिङ्गराजस्य शिवस्य विषये किं वाऽधिकं वक्तव्यम्। तत्सर्वमपि प्रतिपादनं सूर्याय प्रदीपदर्शनवत् हासाय भवति। शिवस्तु शिव एव सर्वेषां मङ्गलं करोतीति आशुतोषः, रोगान्ना-शयतीति वैद्यनाथः, संसारदुःखनाशनं करोतीति संसारदुःखदहनाय नमः शिवायेति कीर्त्ति सुतरां विद्यते। अतः सर्वान् वरदः सर्वेषु च प्रसन्नः भवतु शिवः। जय तु च शिव महिमा इति।

पुण्यतोया प्राची—

उत्कलेषु विद्यमानासु पुण्यतोयासु नदीषु प्राची भवति अन्यतमा।' अस्याः आकृतिः यद्यपि क्षुद्रा तथापि अस्याः उपत्यकायामनेकानि प्राचीनमन्दिराणि प्राचीनदुर्गाणि च एतानि यथा विद्यन्ते तथैव नान्यत्र देशेषु अधुना विद्यमानानां भग्नमन्दिराणा-मनुशीलनेन पर्यालोचनेन चैतत् प्राप्यते। अस्यामुपत्यकायां शैव-शाक्त-वैष्णवधर्माणां लीलाभूमिरासीत्। अस्याः उपत्यकायाः गवेषणया प्राचीनोत्कलस्य सभ्यताविषये सम्यक् ज्ञानं कलाभास्कर्यादिविषये क्षेत्रमिदं मूकसाक्षित्वेन विराजमानमस्ति। अतिप्राचीनकालादेव यद्यपि शैवधर्मस्य विस्तारः उत्कलभूमा-वेवासीत्। तथापि तेनैव शैवधर्मेण साकं शाक्तधर्मस्य सुमहान् सम्बन्धः विद्यते स्म। शाक्तधर्मस्य परम्परा भारतवर्षे कदा प्रचलिता जातेति बहुनि मतपार्थक्यानि यद्यपि दृश्यन्ते तथापि तेषु मतेषु सार्.जन्. मार्शाल्मतं प्रणिधानयोग्यम्। तन्मतं यथा तेनोक्तम्- औशाम्भिनगर्या योनिसदृशं प्रस्तरं प्राप्तं तेन। यस्मिन् प्रस्तरे शाक्ततन्त्रस्य यन्त्रमाला खोदिताऽस्ति। अस्माद् विज्ञायते शाक्तधर्मस्योद्भवो विकाशः

पञ्चसहस्रवर्षेभ्यः प्राक् अभूदिति । अस्माकमुत्कलेऽपि तन्त्रस्य शक्तिपूजायाश्च सुमहान् प्रभावः बहुप्राचीनकालात् पतितोऽस्ति ।

पञ्चमशताब्दीतः चतुर्दशशताब्दीं यावत् प्राच्युपत्यका शक्तिपूजायाः प्रधानपीठमासीत् । अत्र शक्तितत्त्वरूपिणी देवी दुर्गा द्विभुजा, चतुर्भुजा, षडभुजा, अष्टभुजा, दशभुजा, द्वादशभुजारूपेण प्रपूजिता भवति। उत्कले दुर्गापूजायाः परम्परा तान्त्रिकी भवति । अस्याः दुर्गायाः नामान्तरं विभिन्नमूर्त्तयः प्राचीनद्याः कूले प्राप्यन्ते । तासु मूर्त्तिषु काकटपुरस्थिता मङ्गलाऽन्यतमा । इयं प्राचीनदी बहूनां देवदेवीनां समवाये पुण्यतोया भवति । अद्यापि इयं रहस्यमयी विद्यते। उत्कलेषु विद्यमानासु महानदीषु कथं वा अस्याः कूले बहुसंख्यानि मन्दिराणि निर्मितानि तस्मिन् विषये गवेषकाः संदिग्धाः भवन्ति । भौगोलिकस्थितिदृष्ट्या विचारे कृते उत्कलस्य राजामहाराजाः अस्याः नद्याः अववाहिकां पवित्रतमा इति मत्वा विभिन्न-सम्प्रदायस्य पीठरूपेण गृहीतवन्तः । इयं नदी अत्यन्तं वक्रिला विभिन्ना शाखानदी-उपनदीभिः परिवेष्टिता । अस्याः पवित्रतायाः प्राच्याः गवेषणायां केचन ग्रन्थाः प्रकाशिता । तेषु ग्रन्थेषु डॉ. राधाचरणपण्डामहोदयानां प्राचीनद्याः ऐतिहासिकविभवः अन्यतमः।

अतः पवित्रप्राची उपत्यका उत्कलस्येतिहासं परिपुष्टं करोति। अस्याः माहात्म्यं वैशिष्ट्यञ्च इदं तावदासीत् भारतीयसर्वधर्मस्य समन्वय प्राचीक्षेत्रे एव आसीदिति ।

बाणपुरभगवती—

इयं भगवती आद्याशक्ति महाशक्तिरूपेण-सर्वदा पूजिता भवति। श्रीमद्देवीभागवते चण्डीपुराणे, विलङ्कारामायणे बहुषु पुराणेषु च देव्याः माहात्म्यं प्रतिपादनं विद्यते । कुत्रापि अष्टभुजा दशभुजारूपेण कुत्रचित् प्रसन्ना वरदा शान्तिस्वरूपिणी कुत्रापि वा

रौद्री प्रचण्डा चामुण्डा खड्गत्रिशूलधारिणी भवति । इयं भगवती प्रागैतिहासिककालादुत्कले पूजिता भवति । पीठमिदं शक्तिपूजायाः आद्यपीठमिति गवेषकाणां मतम्। शालीमानद्याः कूले देव्याः मन्दिरम्। किम्बदन्त्यनुसारं देवीसाधकः बाणासुरः देवीं पूजितवात्। अस्याः भगवत्याः ध्यानं पूजकस्य मुखादेवं प्राप्यते यत्-

सृष्टौ या सर्गरूपा जगदवनविधौ वैष्णवी या च रौद्री ।
संहारे चापि यस्याः जगदिदमखिलं क्रीडनं या पराख्या ॥
पश्यन्ती मध्यमाऽथो तदनु भगवती वैखरी वर्णरूपा ।
साऽस्माकं प्रसन्ना विधिहरिगिरिशाराधिताऽलङ्करोतु ॥

देव्याः पूजानार्थं बहुप्राचीनकालाद् बहुभिर्नृपैः मन्दिरस्य परिचालनार्थं सर्वाणि सौविध्यानि क्षेत्राणि च प्रदत्तानि । येन देव्याः पूजनं प्रसादादिकं सर्वोऽपि व्ययः प्रचलति ।

पुण्यदृष्ट्या क्षेत्रमिदमत्यन्तं प्रसिद्धं भवति । बहवः जनाः स्वकामपूर्त्तये देवीदर्शनाय गच्छन्ति । तत्र रोगार्त्ति-पुत्रकामि-शत्रुणाक्लीष्टोऽपि जनः देव्याऽराधनं कृत्वा फलं प्राप्नोति । देव्याः दुर्गोत्सवकाले षोडशदिनानि यावत् पूजनं दीपावल्यां दोलपूर्णिमाया-मशोकाष्टम्याश्च विशिष्टाः उत्सवाः भवन्ति ।

काकटपुरस्य मङ्गला—

इयं देवी भगवतः श्रीजगन्नाथस्य क्षेत्ररक्षयित्रीरूपेण विराज-मानाऽस्ति । इयं मङ्गला अष्टचण्डीषु अन्यतमा । अस्याः मङ्गलायाः प्रतिष्ठाविषये न कश्चन इतिहासः प्राप्यते । परन्तु यदा आषाढमासस्य मलमासो भवति तदा श्रीजगन्नाथस्य दारुमयं कवेवरं परिवर्त्तनं भवति। अतः नूतनकलेवरस्य कृते दारोरावश्यकं भवति । तस्य दारोः सन्धानमस्याः मङ्गलायाः सकाशात् सूचना प्राप्यते । तत्र मन्दिरं गत्वा जगन्नाथस्य विशिष्टाः सेवकाः प्रार्थनां कुर्वन्ति । प्रार्थनामङ्गीकृत्य

देवी स्वप्नादेशं करोति । अस्माद् विलक्षणसम्बन्धाद् देव्याः मङ्गलायाः प्राचीनता पौराणिकता स्वयंसिद्धा भवति । एतेन पीठमिदमपि सिद्धक्षेत्ररूपेण ख्यातिं प्राप्नोति । देवीभागवते सर्वमङ्गलायाः वर्णनं प्राप्यते । इक्ष्वाकुवंशस्य राजा मङ्गलः सर्वप्रथमतया देवीं पूजयामास। अतः देवी मङ्गलेति ख्याता । किम्बदन्त्यनुसारं काकटपुरस्य मङ्गला सिंहले प्रपूजिताऽसीत् । बौद्धाः इमां देवीं तारादेवीति नाम्ना पूजितवन्तः । उत्कलीय वणिजः सिंहलाद्देवीं समानीय प्राचीतटे संस्थापितवन्तः इति केषाञ्चन मतं विद्यते । अन्याऽपि एका किम्बदन्ती विद्यते यदीयं मङ्गला रावणस्य स्वर्णलङ्कयामधिष्ठात्रिदेवी आसीत् । यदा रामचन्द्रः रावणं जघान तदा रामः लङ्कातः इमां मङ्गलामानीतवान्। कलिङ्गसेनानां हस्ते इयं देवी आसीत् । ततः प्राचीनदीकूले अस्याः प्रतिष्ठा सञ्जाता । दुर्गापूजावत् अस्याः सर्वमपि पूजनं भवति केवलं विशेषतया चैत्रमासे 'झामुयात्रा' अस्याः विशिष्टा यात्रा भवति ।

इवं परमवैष्णवी, वैष्णवरीत्यां सर्वमपि विधानं प्रचलति । भक्तानां मङ्गलं करोतीति सर्वमङ्गलानाम्ना प्रसिद्धा, सर्वान्नभीष्टान् पूरयतीति अभीष्टदायिनी । अस्माकमुत्कले नार्यः मङ्गलवासरे पत्युः दीर्घजीवनं, पुत्रप्राप्तिनिमित्तं, धनाद्यैश्वर्यप्राप्तिनिमित्तमुपवासव्रत-धारणञ्च कुर्वन्ति। क्षेत्रस्यास्य दर्शनेन महापुण्यं दैवीकृपाञ्च जनाः लभन्ते ।

कोणार्क-रामचण्डी—

क्षेत्रमिदं पुरीतः कोणार्कगमने मार्गे आगच्छति । पीठमिदं तान्त्रिकमस्ति। भौगोलिकदृष्ट्या कुशभद्रायाः धन्वायाश्च नद्योः समुद्रसङ्गमस्थले विद्यते। क्षेत्रं प्रति एकदा हिन्दुविद्वेषि यवनसेना-नायककलापाहाड आजगाम । देवी अस्य मन्दोद्देश्यं ज्ञात्वा

वृद्धावेशेन कुम्भं धृत्वा जलमानयनार्थं त्वरितं गतवती । बहुकालं यावत् प्रतीक्षां कृत्वा कलापाहाडः निर्गतः । प्राचीनोत्कले उत्कलस्य जनाः नौवाणिज्यार्थं विदेशं गतवन्तः । तदानीन्तनकाले नदीसागरयोः सङ्गमस्थले देविमन्दिराणि प्रतिष्ठापितवन्तः। अस्याः देव्याः विषये एका किम्बदन्ती श्रूयते । भगवान्श्रीरामचन्द्रः अस्मादेव स्थानात् लङ्कागमनाय विचारं कृतवान् । पुनश्च महाभारतस्य वनपर्वणि मन्दिरस्यास्य विषये देव्याः विषये च वर्णनं दृश्यते । इयं चण्डिका कोणार्के प्रपूजिताऽभूत्। कालान्तरे अस्याः स्थानान्तरणं सञ्जातमिति समालोचकानां मतम् । इयं देवी युद्धवेशधारिणी अष्टभुजा-गणेशवराहयुक्ता कमनीया ईदृशी देवीमूर्त्ती अन्यत्र विरला । अस्याः दर्शनेन पापक्षयो भवति । अभीष्टान् देवी पूरयति। अतः तीर्थदृष्ट्या अस्याः माहात्म्यं नितरां विद्यते ।

वाटमङ्गला—

मन्दिरमिदं श्रीक्षेत्रस्यानतिदूरे विद्यते । इयं मङ्गला बहुप्राचीना श्रीजगन्नाथदर्शनस्य प्राक् अस्याः दर्शनं कृत्वा श्रीगन्नाथदर्शनं कर्त्तव्यमिति नियमोऽस्ति । सृष्टेः सर्जनायाः प्राक्काले यदा ब्रह्मा कमलादाविर्भूतः तदा सृष्टिसर्जननिमित्तं तेषां मनसि न किमप्यागतम्। अतः महाशून्यं प्रति दृष्टवान्। तदा महाशून्ये मङ्गलात्मिका ब्रह्मशक्तिसम्पन्ना आविर्भूता भूत्वा ब्रह्माणं सूक्ष्मातिसूक्ष्ममार्गं प्रदर्शितवती । अतः अस्याः देव्याः नामकरणं वाटमङ्गलेति सञ्जातम्। यद्यपि अस्याः मङ्गलायाः श्रीमन्दिरेण सह न साक्षात् सम्बन्धः तथापि जगन्नाथक्षेत्रस्य द्वारदेशे वाटमङ्गलातः सन्मार्गस्य सन्धानं गृहीत्वा भक्तः भक्तिजगति प्रवेशं करोतीति कपिलपुराणस्य मतम्। अस्याः देव्याः ध्यानादेव धर्मपथप्रदर्शिनीति पदात् वाटमङ्गलायाः माहात्म्यं प्राप्यते । यथा ध्यानम्—

बालारुणसमां प्रसन्नवदनां चित्राम्बराभूषिताम् ।
देवी पद्मासनस्थां त्रिनयनलसितां सर्वदानन्दकन्दम् ॥
हस्ताभ्यां वरुणङ्कुशं करयुगे पाशारय विस्तरैः ।
वन्दे धर्मपथप्रदर्शिनीमयी मात जगन्मङ्गला ॥

देवगौरी—

इयं गौरी शिवस्य पत्नी भवति । अस्याः प्राचीनता ऋग्वेदेऽपि प्राप्यते । गौरीनामानुसारं भारतवर्षे बहुनि देवीमन्दिराणि प्राप्यन्ते । परन्तु भुवनेश्वरस्थितस्य गौरीमन्दिरस्य वैशिष्ट्यं विद्यते । कपिलसंहितायां स्वर्णाद्रिमहोदये एकाम्रपुराणे च गौर्य्याः माहात्म्यं प्राप्यते । विद्यते यदि गौरीकुण्डे स्नानं न भवति तर्हि स नरः नरकं गच्छति । स्वर्णाद्रिमहोदये उच्यते—

स नरो नरकं याति सत्यं सत्यं न संशयः ।
स्नात्वा केदारके कुण्डे दृष्ट्वा गौरीं महेश्वरम् ॥

कपिलसंहितायाश्च—

फलं तु दर्शनेनाऽस्या वाजपेयाश्वमेधयोः ।
तस्यास्थल्यान्तु देव्यास्ते गौरी त्रैलोक्यतारिणी ॥
स्नात्वा केदारके तीर्थे दृष्ट्वा गौरीमहेश्वरम् ।
सकृज्जप्त्वा भवेत्पीठे कृतकृत्यो भवेन्नरः ॥

इयं गौरी भुवनेश्वरस्य अष्टचण्डीकासु अन्यतमा । प्रस्फुटितपद्मोपरि दण्डायमाना चास्ति । अग्निपुराणानुसारं द्वादशगौरीषु अस्याः सामञ्जस्यं विद्यते । अतः तीर्थकामिजनः अवश्यमेव अस्याः दर्शनं कृत्वा पुण्यमर्ज्जयेत् ।

तारिणी—

इयं तारिणी देव्याः दुर्गायाः अवतारभूता । अस्याः प्रतिष्ठा पञ्चदशशताब्द्यां सञ्जाता । पुरुषोत्तमदेवेन काञ्चिविजयकाले

अस्याराधनं कृतम् । देव्याः प्रसादाद्राज्ञा युद्धे विजयो लब्धः। उत्कलस्य केन्दुझरमण्डले सर्वेषां जनानां जननीव प्रपूजिता भवति । परन्तु देव्याः माहात्म्यवशात् सर्वेऽपि जनाः देव्याः पूजनं कुर्वन्ति । फललाभाय वाणिज्ये च सुलभाय पुत्रप्राप्तये च जानाः मन्दिरे पूजार्च्चनं कुर्वन्ति । मन्दिरस्यावस्थितिः वनमध्ये इति कृत्वा अतीव रमणीया विद्यते । तीर्थदृष्ट्या क्षेत्रस्यास्य दर्शनं कर्त्तव्यमेव ।

झङ्कडवासिनी शारला—

भौमवंशस्य राजत्वकाले शाक्तधर्मस्य अभ्युदयो जातः । तस्मिन्नेव समये उत्कले बहूनां शक्तिपीठानां प्रतिष्ठा सञ्जाता । तेषु शरलामन्दिरमन्यतमम् । पीठस्यास्य देव्याः माहात्म्यं च विषये इयं जनश्रुतिः प्राप्यते । महाप्रतापी पर्शुरामः क्षत्रियाणां निधनानन्तरं स्वपापस्य अपनोदनार्थं बहुतीर्थानां दर्शनं स्नानं च कृतवान् । चन्द्रभागां प्रति स्नानायापि आगतवान् । चन्द्रभागा प्रवेशकाले तटदेशे स्वधनुः स्थापितं तेन सर्वत्र धनुषः गुरुत्वकारणात् मृत्तिकास्खलनं भवति । परन्तु अत्र तादृशं न जातम् । अतः आशायि भूत्वा मृत्तिकाखननेन शारलामूर्त्तिः अवाप्ता । अस्मिन्नपि क्षेत्रे शिवपत्न्याः सत्याः भस्मावशिष्टमङ्गं पतितमभूत् । क्षेत्रेऽस्मिन् जिह्वायाः पतनं सञ्जातम्। अत इयं देवी ज्ञानदायिनी भवति । अस्याः देव्याः आराधनं कृत्वा अस्याः परमभक्तः शारलादासः उत्कलभाषायां महाभारतमनुदितवान्। अस्मादेव कारणाद् देव्याः माहात्म्यं अनिर्वचनीयं भाषातीतं भावगम्यं च विद्यते।

समलेश्वरी—

उत्कलस्य सम्बलपुरमण्डले इयं समलेश्वरी इष्टदेवीरूपेण प्रपूजिता भवति । नवान्नकाले द्रव्याः पार्श्वे रात्रौ नूतनधान्यस्य

प्रसादस्य अर्पणानन्तरं सर्वे जनाः नवान्नभोजनं कुर्वन्ति । इयं देवी सिन्धुसभ्यताया मातृकापूजया सह समानास्ति । मण्डलस्यास्य जनाः सन्तानकामनया देवीं प्रति गच्छन्ति । देव्याः प्रसन्नेन बन्ध्याऽपि पुत्रवती भवति । तत्रस्थिताः जनाः देव्याः नामोच्चारणपूर्वकं कर्म कुर्वन्ति । एतेन कर्मणः साफल्यं प्राप्नुवन्ति । ग्रहशान्तिनिमित्तमपि शान्तियज्ञं देवीपार्श्वे भवति। देव्याः प्राचीनता विषये समालोचकाः प्रतिपादयन्ति यत् इयं देवी ख्री.पू. तृतीयशताब्द्यां प्रतिष्ठिताऽसीत् । इयं समलेश्वरीमूर्त्तिः तान्त्रिकी मूर्त्तिः भवति । यतो हि देव्याः मस्तकमधोमुखं विद्यते । अत्रत्या जनाः देवीदर्शनं गङ्गादर्शनमिति कथयन्ति । इयं देवी शक्तिः बुद्धिः, सरस्वती, प्रतिभा, लक्ष्मी, आद्या भगवती, सर्वविपन्नाशिनी नाम्ना अभिहिता विद्यते। अस्याः दर्शनेन जीवनं धन्यं भवति ।

चर्च्चिकादेवी—

कटकमण्डलान्तर्गत वाङ्कि-उपखण्डे महानद्याः कूले पर्वतोपरि चर्च्चिकायाः मन्दिरं विद्यते । अस्याः पीठस्य सृष्टिः प्रतिष्ठातादिविषये ऐतिहासिकं तथ्यं न प्राप्यते । किम्बदन्त्यनुसारं पर्शुरामः कठोरं तपस्यां कृत्वा चर्च्चिकां परितोष्य मातृहत्यापापाद् विमुक्तो जातः । तस्मादेव कालात्पीठस्यास्य नामकरणं पर्शुरामपीठमिति विदितमस्ति । वनदुर्गामन्त्रेण चर्च्चिकायाः पूजनं भवति । मन्दिरे नैवेद्यं भवति । आश्विनमासे षोडशदिवसं यावत् पूजनं भवति । महाष्टम्यां माहिषबलिप्रथा विद्यते । कुमारपूर्णिमायां देवी कुमारीरूपं धारयति । चैत्रमासे शुक्लप्रतिपदारभ्य नवमीं यावद् वासन्तीकीपूजा अनुष्ठिता भवति । मन्दिरस्य परिचालनानिमित्तं प्राचीनकालात् राजानः धनं क्षेत्राणि च दत्तवन्तः । मन्दिरस्य महती प्रतिष्ठा देव्याश्च माहात्म्यं विद्यते ।

कटकचण्डी—

इयं देवी दुर्गा, स्वयंप्रज्ञा सुप्रसन्ना, वरदा सुशोभना विभवशालिनी घनतमिश्रायां सुप्रकाशा सा एव रात्रि साऽपि दिवा साऽपि सन्ध्या आलोलायितमुक्तकुन्तलहिल्लोलिता, इयं भगवती देवानां रक्षाकर्त्री। एवंभूता चण्डिका उत्कलस्य मुकुटमणेः महाराजमुकुन्ददेवस्य वारवाटीनवतलकटकदुर्गस्य रक्षाकर्त्री। अद्यापि इयं कटकस्य सर्वेषां जनानां मुखे आपदि अनापदि काले च स्मृता भवति। अत्रापि शारदीयमहोत्सवः महासमारोहेण पालितो भवति। अशोकाष्टम्यामपि महापूजा भवति। इयं जगन्मयी जगदम्बा सर्वेषां जनानां त्राणकर्त्रीरूपेण प्रपूजिता भवति। तत्र जनाः इमां प्रार्थनां गायन्ति यत्-

दारिद्र्यदुःखभयहारिणी कात्वदन्या।
सर्वोपकारकरणाय सदार्द्रचिता॥

कालिजाई—

इयं कालिजाई बहुभिः जनैः प्रत्यक्षीभूता। अस्याः मन्दिरन्तु उत्कलकमलाविलासदीर्घिका-मरालमालिनीनीलाम्बुचिलिकायां मध्यभागे स्थिते पर्वते विराजते। अत्र जनाः नौकायामागच्छन्ति। मकरसंक्रान्त्यामत्र सुमहानुत्सवः परिपाल्यते। चिलिकामध्ये कैवर्त्ताः इमां दवी पर्वतोपरि दृष्टवन्तः तत्र स्थितानां जनानामेतादृशः विश्वासः यदि विपदि अस्याः नामोच्चारणं सञ्जातं तर्हि स विपन्मुक्तो भवति। अस्याः दर्शनार्थं प्रतिदिनं बहवः यात्रिणः समागच्छन्ति। इयं विपन्नाशिनी दुःखविनाशिनी च भवति।

तारातारिणी—

इयं तारातारिणी उत्कलस्य गञ्जाममण्डले विद्यते। इयं देवी पर्वतोपरि विराजमाना प्रपूजिता च भवति। अत्र गमनाय

सहस्रसोपानानि विद्यन्ते । इदमपि तान्त्रिकपीठमस्ति । चैत्रमासि अस्याः महान् उत्सवः परिपाल्यते । संक्रान्तिष्वपि विशिष्टं पूजार्च्चनं क्रियते । स्थानदृष्ट्या अतीवरमणीयं स्थानमिति । पुत्रार्थिनः जनाः पुत्रप्राप्तिकामनया तत्र देवीं प्रति गच्छन्ति । लोकोक्ति वर्त्तते इयं शत्रुनाशिनी, धनदायिनी, पुत्रदायिनी च भवति ।

क्षीरचोरागोपीनाथः—

वालेश्वरमण्डले वालेश्वरतः अष्टकिलोमिटरदूरे रेमुणा इति स्थाने सुन्दरमिदं मन्दिरं विराजते । किम्बदन्त्यनुसारं गोपीनाथविग्रहं भगवता श्रीरामचन्द्रेण पञ्चवटीनिवासकाले शरेण मूर्त्तिरियं खोदिता। श्रीरामचन्द्र-स्यानुपस्थित्या सीता कौतूहलेन यदा मूर्त्तिखोदनं कृतवती तदा तस्माद् रूधिरं निर्गतम् । ततः परमानन्देन सीता विग्रहं पूजितवती। द्वादशशताब्द्यां उत्कलस्य गजपति नरसिंहदेवः सस्त्रीक रामतीर्थदर्शनकाले प्रस्तरनिमित्तं रमणीयं विग्रहं प्राप्तवान् । रात्रौ च स्वप्ने भगवता राजा स्वप्नादेशः कृतः । त्वं नीलाचले यस्य देवस्य पूजनं करोषि, अहं स एवाऽस्मि । मां गृहीत्वा नय । पूजायाः व्यवस्थां च कुरु । राजा पुरी प्रत्यावर्त्तनकाले उपयुक्तस्थाने यदा रात्रियापनं करोति स्म तदा द्वितीयवारं स्वप्नादेशो जातः । स्थानमिदं रमणीयं बहुधेनुयुक्तं गोपालाः अधिकाः सन्ति । अतः क्षीरं पीत्वा अत्राहं सुखेन स्थास्यामि । अस्मिन्नेव स्थाने मम स्थापनं कुरु इति भगवता राजा आदिष्टः । राजाऽपि भगवद्वचनानुसारं तत्र रेमुणायां मन्दिरं पुष्करिणीं क्षेत्रं ब्राह्मणनियोजनञ्च सर्वं कृतवान् । अतः मन्दिरमिदं द्वादशशतकीयमिति प्रमाणं प्राप्यते ।

अपरा किम्बदन्ती भगवता गोपीनाथेन भक्तस्य मनोभीष्टां वाञ्छां परिपूरयितुं चौर्यं कर्म कृतम् । माधवेन्द्रपुरीनाम्नः भक्तस्य पायसभक्षणे इच्छा सञ्जाता परन्तु तस्मै न कोऽपि पायसं दत्तवान् ।

प्रासाद अप्राप्तिकारणात् तेन महता दुःखेन वृक्षमूले शयनं च कृतम् । रात्रौ भगवता ब्राह्मणवेशेन माधवेन्द्राय पायसं क्षीरनिर्मितमन्नं चोरयित्वा प्रदत्तम्। अनेन भगवतः माहात्म्यं विज्ञायते। श्रीचैतन्यदेवेन श्रीक्षेत्रागमनकाले भगवतः गोपीनाथस्य मुरलीवादनस्य दर्शनं कृत्वा क्षेत्रस्यास्य महिमागानं कृतम् । अद्यापि क्षेत्रेऽस्मिन् पायसनैवेद्यं भवति। जनाः अपि तीर्थकर्त्तुं पूजादिकर्त्तुं च प्रतिदिनमागच्छन्ति । विशेषतः वैष्णवसम्प्रदायस्य पीठमिदं सिद्धपीठमिति वैष्णवाः प्रतिपादयन्ति । क्षेत्रस्यास्य कथाः चैतन्यचरितामृते प्राप्यन्ते । उत्कलसर्वकारेण क्षेत्रस्यास्योन्नतये परिदर्शनक्षेत्ररूपेण च सर्वविधं सौविध्यं कारितम् । स्थानमिदं रमणीय कारणात् नामकरणं रेमुणा इति सञ्जातम् ।

साक्षीगोपालः—

क्षेत्रमिदं बहुप्राचीनं नास्ति । मन्दिरस्यास्य निर्माणमष्टादश-शताब्द्यामेव जातम् । परन्तु साक्षिगोपालस्य देवस्य कालः बहुप्राचीनः । उत्कलस्य सूर्यवंशीयराजा गजपति श्रीपुरुषोत्तमदेवः काञ्चीविजयकाले साक्षिगोपालमानीतवान् । यस्य स्थापनं तु श्रीमन्दिरे अभूत् । किम्बदन्त्यनुसारं साक्षिगोपालः वृन्दावनतः काञ्चीपुरं प्रति साक्ष्यं दातुमागतवान् । पुरुषोत्तमदेवेन अस्य माहात्म्यं ज्ञात्वा पुरीं प्रति आनीय सत्यनारायणमन्दिरसमीपे अस्य संस्थापनं कृतम् । परन्तु अनेन भगवता गोपालेन सत्यनारायणस्य सर्वान् लड्डुकान् गोपनेन भक्षणं कृतम् । तस्मात् पुनः साक्षिगोपालस्थाने अस्य संस्थापनं जातम्। अयं तु साक्ष्यदातुं एकाकी आगतवान् । राधाविरही आसीत् गोपालस्य सेवकः ब्राह्मणः बेलमहापात्रकन्यारूपेण श्रीराधा जन्मग्रहणं कृतवती । धर्मप्राणराजा गोपालेन स्वप्नाविष्टो भूत्वा राधामूर्त्तिं निर्माय मन्दिरे स्थापितवान् । यस्मिन् दिने राधिकायाः संस्थापनं जातम्

तस्मिन्नेव दिने वेलमहापात्रस्य कन्यायाः मरणमपि सञ्जातम् ।

अयं गोपालः कमनीयकान्तमूर्त्तिः वेणुपाणिः जगन्नाथ-मन्दिरवत् सर्वां पूजां गृह्णाति । अहं चिन्तयामि गोपलगोपीनाथयोः न कश्चन भेदः तथापि गोपालः शिशुरूपः जानुना चलनक्षमः तदा हस्ते लड्डुकः भवेत् । गोपीनाथस्तु वेणुपाणिः त्रिभङ्ग्यादण्डायमान इति सूक्ष्मः भेदः परिकल्प्यते । अतः साक्षिगोपालमन्दिरं गोपीनाथमन्दिरमेव । अस्य दर्शनेन पापक्षयो अभिष्टान् कामान् अपि जनः प्राप्नोति । अत्र कार्त्तिकमासे आमलकनवम्यां महान् उत्सवो भवति ।

तोटागोपीनाथः—

अयं गोपीनाथः श्रीक्षेत्रे समुद्रप्रान्ते रमणीयोपवने विराजते । समग्रभारतवर्षस्य यावन्ति विष्णुमन्दिराणि विद्यन्ते तेषु अस्य मन्दिरस्य विलक्षणता अस्माभिः प्राप्यते । अत्र परमभक्तेन गदाधरगोस्वामिना अयं गोपीनाथः परिसेवितः । यदा गदाधरगोस्वामि अत्यन्तं वृद्धावस्थां प्राप्नोति तदा दण्डायमानस्य गोपीनाथस्य पूजार्च्चनं कर्त्तुमसमर्थो जातः । तदर्थं मनसि दुःखमनुभूय गोपीनाथस्य चरणारविन्दे स्वयमनुगतं भावं श्रावयति स्म । तेन परितुष्टो भूत्वा गोपीनाथः आसीनः सञ्जातः । क्षेत्रमिदं चैतन्यदेवस्य प्रियतममासीत् । श्रीक्षेत्रमध्ये विद्यमानत्वादपि च स्वमाहात्म्यकारणान्मुक्तिदायकं पापनाशकं पुत्रदायकञ्च क्षेत्रं भवतीति ।

अलारनाथः—

मन्दिरेऽस्मिन् भगवतः गोपीनाथस्य पूजार्च्चनं भवति । मन्दिरं तु पुरीमण्डलस्थितस्य ब्रह्मगिरि-उपखण्डस्य ग्रामे विद्यते । अदूरे च उत्कलकमलाविलासरूपानीलाम्बुचिलिका राजते । मन्दिरस्येदं तावद्वैशिष्ट्यं यदा भगवान् श्रीजगन्नाथः स्नानपूर्णिमाऽनन्तर-

मनवसरमध्ये तिष्ठति तदा अलारनाथस्य दर्शनं कृत्वा जनः जगन्नाथदर्शनस्य पुण्यं लभते । किं बहुना चैनन्यदेवेनाऽपि क्षेत्रस्यास्य महत्त्वं परिज्ञाय देवदर्शनार्थं समागतम् । अत्रापि पूजार्च्चनानिमित्तं ब्राह्मणाः नियुक्ताः । धान्यक्षेत्रादीनि राज्ञा रामचन्द्रदेवेन प्रदत्तानि सन्ति। तेन मन्दिरस्य नैवेद्यादिकं सर्वं भवति।

अनन्तवासुदेवः—

भुवनेश्वरे इदं तावत् सुप्रसिद्धं विष्णुमन्दिरं शैवक्षेत्रेऽपि विष्णुमन्दिरस्य दर्शनं प्राप्यते । विन्दुसरसः कुले इदं तावद् बहुप्राचीनं मन्दिरं परिशोभते । मन्दिरेऽस्मिन् शिलालेखाः विद्यन्ते । तस्माद् विज्ञायते लिङ्गराजमन्दिरानन्तरं चन्द्रिकादेव्या मन्दिरमिदं निर्मितम् । भगवतः कृपया तथा च राजदृष्ट्या सर्वविधा समुन्नतिः राज्ञा ललाटेन्दुकेशरिणा कृता । अस्मात् शैवसम्प्रदायाः जनाः परमवैष्णवाः भवन्तीति प्रमाणी भवति । हरिहरयोर्स्थितिः अभिन्ना एव । मन्दिरेऽस्मिन् जगन्नाथमन्दिरवदन्नस्य नैवेद्यं भवति । क्षेत्रमिदं पुण्यकरं पापनाशनमनन्तसुखदायकञ्च भवतीति कृत्वा प्रत्यहं बहवः तीर्थयात्रिणः समागच्छन्ति । विन्दुसागरे स्नानं कृत्वा "ॐ क्लीं कृष्णाय गोपीजनवल्लभाय वासुदेवाय नमः" इति मन्त्रादिद्वारा पूजार्च्चनं कृत्वा तीर्थफलं प्राप्नुवन्ति । अनेके जनाः अत्र दानं ब्राह्मणभोजनं च कारयन्ति । तेषामयमेव विश्वासः इदं तावत् क्षेत्रं वैकुण्ठक्षेत्रमिति। अत्र दानेन परजन्मनि तत्सर्वं शतगुणितं भवति । अद्यापि क्षेत्रस्यास्य महती प्रतिष्ठा विद्यते ।

बलदेवः—

कटकमण्डले क्षेत्रमिदं सुमहत्प्रसिद्धं भवति । क्षेत्रस्यास्य प्रसिद्धिः तुलसीक्षेत्रनाम्ना विद्यते । क्षेत्रस्यास्य विषये तथ्यमिदं प्राप्यते

यत् महाभारतकाले यदा कुरुपाण्डवयोः युद्धमभवत् तदा भगवान् श्रीकृष्णः पाण्डवपक्षं समर्थीकृत्य तिष्ठति स्म । बलदेवस्तु तीर्थदर्शनाय जगाम। तीर्थभ्रमणकाले उड्रदेशे प्रविश्य ब्राह्मणानामनुरोधेन ललितगिरिस्थितस्य कन्दरासुरस्य वधं कृतवान् । तस्यैव दानवस्य विभिन्नानि अङ्गानि उत्पाट्यं विभिन्नस्थाने निक्षेपितवान् । यत्र स्थाने असुरस्य शिरः पतितं तस्य स्थानस्य नामकरणं असुरशिरः अथवा अधुना असुरेश्वरः इति । यस्मिन् स्थाने देहभागः पतितः तस्य स्थानस्य नाम केन्द्रापडा इति । तत्रापि गण्डिपतनकारणात् वलगण्डि इति स्थानं विद्यते । अस्यैव कन्दरासुरस्य एकमात्र कन्या तुलसीनामाऽसीत्। इयम् असुरकन्या भूत्वापि देवगुणसम्पन्ना आसीत् । पितुः मरणानन्तरं तुलसी बलदेवस्य शरणापन्ना जाता । तस्मादेव कालात् क्षेत्रस्यास्य नामकरणं तुलसीक्षेत्रं सञ्जातम् । अधुनापि तत्र भगवतः बलदेवस्य सुरम्यं मन्दिरं पूजार्च्चनं च भवति । अतः क्षेत्रस्यास्य नितरां वैशिष्ट्यं पुण्यत्वं च विद्यते ।

महाविनायकः—

चश्चदेवता पूजाप्रसङ्गे गणेशपूजनं सर्वादौ भवति । इयं परम्परा समग्रभारतवर्षे प्रायशः अवलोक्यते । अस्माकमुत्कलेऽपि इयं परम्परा सन्निहिता विद्यते । उत्कलस्य बहुषु स्थानेषु विनायकमूर्त्तयः प्राप्यन्ते। एषु महाविनायको अन्यतमः । अयं विनायकः महाभारतकालेऽपि आसीत्। कलिकतातः मद्रासं प्रति गच्छति यः राजमार्गः तत्र चण्डिखोल इति स्थाने कटकसमीपे वारुणावन्तपर्वते अस्य मन्दिरं विद्यते । महाभारते अस्य पर्वतस्य वारुणावन्तस्य नामोल्लेखो विद्यते। अस्य पर्वतस्य पाददेशे एकं राजदुर्गं विद्यते । सम्भवतः अयं विनायकः राज्ञः इष्टदेवो भवेत् । अयं विनायकः पञ्चदेवदेवीनां समाहाररूपः । अयं महाविनायकः सदाशिव इति मतं प्राप्यते ।

यतो हि चण्डिखोले छिन्नमस्तायाः मन्दिरमद्यापि विद्यते। अतः क्षेत्रमिदं प्रसिद्धं शैवक्षेत्रं भवेत् । अस्य विनायकस्याभिलेखः शिलालेखो वा न कश्चन विद्यते। तस्मादैतिहासिकं तथ्यं ज्ञातुं न शक्यते । स्थानदृष्ट्या क्षेत्रमिदं रमणीयतरम्, निर्झरिणीप्रवाहिता पर्वतारण्यसमाविष्टं क्षेत्रमिदं महाभारतकालात्पुण्यमयं कुन्तीगान्धारी-प्रभृतयः अत्रत्य देवदर्शनं कृत्वा पुण्यमर्जयन्ति स्म । अद्यापि जनाः बहुसंख्यकाः तत्र गच्छन्ति। स्थानमिदं तपस्यायोग्यं चास्ति ।

गुप्तेश्वरः—

उत्कलस्य कोरापुटमण्डले गुप्तेश्वरः महादेवः श्रेष्ठतमः आराध्यदेवः। अस्य महादेवस्य निवासस्थानं भवति १७० मिटर पर्वतोपरि । पर्वतगुम्फायां गोपनेन तिष्ठतीति कृत्वा अस्य नाम गुप्तेश्वरः। रामगिरितः पञ्चदशकिलोमिटरदूरे निघञ्चारण्यमध्ये अस्य देवस्य वासस्थानम् । स्थानस्यास्य शालादिवृक्षैः रमणीयता विवर्द्धिता भवति। पर्वतस्य पाददेशे तमसा प्रवाहिता भवति । अतः स्थानं प्रति न केवलमुत्कलस्य जनाः अपि तु आन्ध्रप्रदेशस्य, मध्यप्रदेशस्य जनाः देवमहिम्ना समागच्छन्ति । क्षेत्रेऽस्मिन् आशुतोषगुप्तेश्वरस्य प्रसादात् जनानां मनोकामना परिपूर्णा भवति । अत्र प्रधानोत्सवो भवति शिवरात्रिः । सहस्रसंख्यकाः भक्ताः समागच्छन्ति । जनानाम् आध्यात्मिकधार्मिकभावनायाः अयमुत्सवः भवति । विवाहव्रतेषु अस्य निमन्त्रणं सर्वादौ भवति। अन्येषु दिवसेषु सोमवासरे भक्तानां संख्या अधिका भवति । अत्र समशीतोष्णजलवायुः भवति । तदर्थं बहवः जनाः देवदर्शनार्थमागत्य किञ्चिद्दिनं निवसन्ति।

पञ्चलिङ्गेश्वरः—

उत्कलेषु बहुषु शिवक्षेत्रेषु क्षेत्रमिदम् अन्यतमम् । वालेश्वर-मण्डलान्तर्गतनीलगिरिउपखण्डे श्यमसुन्दरशासने विराटकाय-

पर्वतोपरि पञ्चलिङ्गेश्वरमहादेवोऽवस्थितः । अत्र क्षुद्रगुहायामेका-निर्झरिणी सदा लिङ्गानि धौति । लिङ्गानि न परिदृष्टानि भवन्ति । जलमध्ये हस्तचालनेन जनाः पञ्चलिङ्गविशिष्टं शिवमनुभवन्ति । क्षेत्रमिदं महापुण्यकरमत्र शिवस्तु स्वल्पपरिश्रमेण बहुफलं ददाति । सर्वान् कामान् परिपूरयति । अतः बहवः जनाः फलप्राप्तये समागच्छन्ति । अत्र नैवेद्यरूपेण कदलीफलं गुडं च प्रियकरं भवति।

कपिलासः—

मन्दिरमिदमुत्कलस्य ढेङ्कनालमण्डले कपिलासे पर्वते विद्यते। मन्दिरं तु पर्वतोपरि विद्यमानं यत्र गमनाय त्रयोदशशतकसोपानानि विद्यन्ते। मन्दिरमिदमुत्कलस्य गजपतिना प्रतापरुद्रेण निर्मितम् । परन्तु अत्रत्य विराजमानः श्रीचन्द्रशेखरमहादेवः सत्ययुगादेव प्रपूजितो भवति। सत्ययुगे सौदासनामकेन धार्मिकेन राज्ञा काश्यां विश्वनाथदर्शननिमित्तं वसिष्ठप्रदत्तमन्त्रजपः कृतः । तेन सन्तुष्टः सन् विश्वनाथः कपिलासमन्दिरं प्रति राजानं प्रेरितवान् । अयं सत्ययुगीय सौदासः बहुकष्टमङ्गीकृत्य कपिलासशिखरे चन्द्रशेखरस्य साक्षाद्दर्शनं चकार । तत्र मठमन्दिराणामपि निर्माणं तेन कृतम्। कालक्रमे तत्सर्वं विनष्टमरण्यमयं च सञ्जातम् । त्रेतयायुगेऽपि रावणेन कैलासशिखरात् कपिलासं प्रति करतले शिवं संस्थाप्य आनीतम् । लङ्कातः हिमालयस्य दूरं तथा कैलासतुल्यं कपिलास भवतीति कृत्वा कपिलासे एव शिवः स्थापितः। अन्याऽपि किम्बदन्ती विद्यते यत् सांख्यशास्त्रस्य रचयिता कपिलमुनि अत्रैव आश्रमं संस्थाप्य निवसति स्म । इति कृत्वा पर्वतस्यास्य नामकरणं कपिलास सञ्जातम् । एवमेव पर्वतस्य कपिलासस्य रमणीयता अनन्या अनिर्वचनीया च । अस्य पर्वतस्य समुच्चशिखरे देवसभा विद्यमानाऽस्ति । अत्र बहवः मठाः विद्यन्ते । तेषु मठेषु श्रीधरगोस्वामिमठः ब्रह्मचारिमठनाम्ना प्रसिद्धः।

अयं श्रीधरस्वामी संस्कृतस्य प्राचीनग्रन्थानां टीकाकार इति केषाञ्चन मतम् । अत्र काशीवत् मणिकर्णिकाकुण्डो विद्यते। जनश्रुति विद्यते यत् मणिकर्णिकाकुण्डे स्नानं विधाय पयोमृतकुण्डजलेन शिवपूजनं कृत्वा नरः सर्वपापविमुक्तो भूत्वा वैकुण्ठं गच्छति । इदं स्थानं रमणीयतरं निर्झरिण्याः जलं स्वास्थ्यकरम् । अस्मिन् जले अभ्रांसस्य मिश्रितकारणाद्भेषजविज्ञानिनः जलस्योपादेयत्वं प्रतिपादयन्ति । अतः स्थानमिदं स्वास्थ्यदृष्ट्या धार्मिकदृष्ट्या महत्त्वपूर्णं विद्यते । अस्य महादेवस्य दर्शनेन मणिकुण्डिकाजलस्नानेन च जनः तीर्थफलं प्राप्नोति कामान्नपि लभते ।

चन्दनेश्वरः—

उत्कलस्य शिवक्षेत्राणि अपरिमितानि विद्यन्ते । तेषु शिवक्षेत्रेषु फलदातृरूपेण चन्दनेश्वरस्य नितरां वैशिष्ट्यं प्रतिभाति । क्षेत्रमिदं बालेश्वर-मण्डलस्यान्तिमभागे जलेश्वरोपखण्डे उत्कलपश्चिमवङ्गस्य सीमायां वङ्गोपसागरस्य समीपे विद्यते । अत्र गमनाय सर्वं सौविध्यम् आवासव्यवस्थाऽपि शोभनास्ति । अयं शिवः स्वयम्भूः । अत्र भक्तानां संख्याऽपरिमिता । भक्तानां मनोरथपूर्त्यर्थं चन्दनेश्वरमहादेवोऽपि तत्रैव साक्षाद् विराजते । अत्र जनाः शिवलिङ्गे नारीकेलस्य बहुल्यान्नारीकेलोदकं क्षीरं विल्वपत्रं कदलीफलं च निर्वपन्ति । तेन पादोदकमिति अमृततुल्यं भवति। अत्र शिवचतुर्दश्यां सुमहानुत्सवः परिपाल्यते । क्षेत्रेऽस्मिन्नपरापि यात्रा चैत्रमासे भवति। इयं यात्रा चडकयात्रानाम्ना प्रसिद्धा विद्यते । उत्कले नान्यत्र विशिष्टेषु शिवक्षेत्रेषु अस्याः यात्रायाः प्रभावः प्राप्यते । अस्यां यात्रायां भक्ताः एकविंशति दिनानि यावद् व्रतधारणं कुर्वन्ति । श्मशाने शिवप्रीत्यर्थं विभिन्नान्यासनानि प्रदर्शयन्ति । दशमदिने मध्यरात्रौ नदीतः पुष्करिणीतः वा पार्वतीघटमानयन्ति । ततः रक्तवर्णमपरमपि

यज्ञोपवीतं धारयन्ति । चैत्रमासस्य संक्रान्त्यां व्रतस्य समापनं भवति। एकविंशति-तमदिने विभिन्नानि शारीरिककौशलानि प्रदर्शयन्ति । एतेन व्रतेन भक्तानामयमेव विश्वासो यत् शिवसेवया वरप्राप्तिर्भविष्यति। विशेषतः रोगोपसमनार्थं पुत्रप्राप्त्यर्थं च क्षेत्रस्यास्य महत्त्वमद्यावधि विद्यते । भक्ताः अपि बहुसंख्यया समागच्छन्ति । किं बहुना बहुसंख्यकानां बालकानां प्रथमचूडाकरणसंस्कारः अत्रैव भवति । क्षेत्रस्यास्य महत्त्वं पापक्षयनिमित्तं तीर्थदृष्ट्या महत्त्वपूर्णं च भवति ।

धबलेश्वरः—

धबलेश्वरस्य पीठं महानद्यभ्यन्तरवासुदेवनाम्ना क्षुद्रकाये द्वीपे प्रतिष्ठितं विद्यते । कटकमण्डले धवलेश्वरस्य महती प्रतिष्ठा महांश्च जनविश्वासो विद्यते । गङ्गवंशीयराजा भानुगङ्गदेवः शत्रुणा आक्रान्तो भूत्वा अस्मिन् मन्दिरे आश्रयं गृहीतवान् । पद्मपुराणे महाभारते च धवलेश्वरस्य नामोल्लेखः विद्यते । मान्द्राजसंग्रहालयात् प्राप्ते ताम्रशासने नरेन्द्रधबलस्य नामोल्लेखोऽस्ति । अयं धवलः दशमशताब्द्यां राजवंशप्रतिष्ठां कृतवान् । सम्भवतः पुराणप्रसिद्धस्य धवलेश्वरस्य मन्दिरमपि निर्मितं तेनैव । अत्र बहवः यात्रिणः व्रतधारणं कृत्वा स्वाभीष्टसिद्धिं यावत् निराहारेण जलाहारेण वा दिवसं यापयन्ति । श्रावणमासे च बहवः जनाः जलदानार्थं जलं गृहीत्वा समागच्छन्ति। कार्त्तिकमासे चात्र सुमहान् उत्सवः परिपालितो भवति । अनेन धवलेन्वरेण सह कटकनगरस्य सांस्कृतिकी यात्रा बालियात्रा नाम्ना संश्लीष्टा विद्यते । यात्राकाले धवलेश्वरस्य चलन्तिप्रतिमा चन्द्रशेखरः पूजाग्रहणं करोति । धवलेश्वरस्य महिमा भारतस्य बहुस्थानेषु विद्यते। एकदा धवलेश्वरस्य पीठं भारतस्य प्रमुखं शैवपीठमासीत् । अद्यापि बहवः साधकाः साधनाय समागच्छन्ति । धवलेश्वरस्य लिङ्गं श्वेतकृष्णवर्णं भवति। अतः पीठमिदं हरिहरपीठमिति पण्डिताः

प्रतिपादयन्ति । सर्वत्रशिवलिङ्गं पूर्वाभिमुखं वर्त्तते । परन्तु धवलेश्वरस्य लिङ्गं पश्चिमाभिमुखं विद्यते । धवलेश्वरस्य नैवेद्यमन्त्रमेवं प्राप्यते यथा- "ॐ नमो बलिवर्दाधिरुढाय त्रिशूलडम्बरुधराय श्मशानैकप्रियाय धबलेश्वराय स्वाहा ।" ध्यानमपि एवं विद्यते यथा-

वाहनं वृषभो यस्य वासुकीकण्ठभूषणम् ।
कैलासवासिनं रुद्रं ध्यायेऽहं धबलेश्वरम् ॥

अत्र शिवपूजायाः मर्मार्थो भवति पूर्वपुरुषाणां पूजनम् । तर्पणकालेऽपि पितापितामहप्रपितामहान् वसुरुद्रादित्यरूपेण च तर्पणं भवति । अत एव शिवपूजनमेव पितृपुरुषाणां पूजनम् । अतः शिवपूजया पूर्वपुरुषाणामाशीर्वादं लब्ध्वा संसारस्य सर्वमपि कर्म करणाय शक्तिं प्राप्नोति ।

अत्र धबलेश्वरदर्शनेन जनः पापविमुक्तो भूत्वा शिवलोकं गच्छति । इहजन्मनि च धनवान् पुत्रवान् कीर्त्तिं च लभते । तीर्थदृष्ट्या स्थानस्य माहात्म्यमतुलनीयं वैशिष्ट्यपूर्णं च विद्यते ।

आखण्डलमणिः—

वालेश्वरमण्डले भद्रकउपरखण्डे आरडिग्रामे भगवान् शङ्करः आखण्डलमणिनाम्ना विराजमानः । क्षेत्रमिदं वैतरणीनद्याः तीरभागे विद्यते । आखण्डलमणिशब्दस्यायमर्थः यत् इन्द्रस्य प्रभुरिति । कालिदासेनापि कुमारसम्भवमहाकाव्ये पञ्चमसर्गे इन्द्रस्य उपास्यदेवताभावेन शिवः प्रतिपादितः । प्रायशः भारतस्य सर्वत्र शिवस्यार्थे नाथशब्दः ईश्वरशब्दो वा प्रयोगः दृश्यते । परन्तु आखण्डलमणिरिति अस्य नामकरणमन्यश्च भवति । जनश्रुतितः विज्ञायते लङ्कलफालादेव शिवस्यास्योद्भवो जातः । तदनन्तरं कनिकाराज्ञा देवमन्दिरं निर्मितम् । पूजार्चनादि कर्म तत्रस्थिताः ब्राह्मणाः कुर्वन्ति । अपराह्णकाले पुष्पादिविमण्डितः आखण्डलमणिः

सुशोभितो दृश्यते । अस्य क्षेत्रस्य माहात्म्यं भवति कुष्ठरोगाद्विमुक्तिः । अत्र जनाः माघमासतः ज्येष्ठमासं यावदधिकसंख्यया समागच्छन्ति । विशेषतः कुष्ठ-यक्ष्मा-श्वास-उदरपीडादि-व्याधिग्रस्ताः जनाः रोगविमुक्तये समागच्छन्ति । सर्पदंशनादपि आरोग्यलाभाय जनाः समागच्छन्ति । विषविमुक्तश्च भवन्ति । पुत्रहीनाः मणिप्रसादात्पुत्रलाभं कुर्वन्ति । प्रायशः उत्कलस्य प्रतिग्रामे जनाः सन्ध्याकाले आखण्डलमणेः प्रार्थनां गायन्ति । सर्वेषामपि जीवने एकवारं दर्शनं कर्त्तव्यमिति अभिलाषो विद्यते । अत्र गमनाय सर्वकारपक्षतः सर्वं सौविध्यं सञ्जातम् । आवासस्य व्यवस्थापि विहिता । धर्मकांक्षिभिः जनैः अवश्यमेव गन्तव्यमिति ।

एतेषु भिन्नेष्वपि तीर्थक्षेत्रेषूत्कलेषु अन्यान्यपि बहुनि तीर्थक्षेत्राणि विराजन्ते । तेषु बालेश्वरमण्डलस्य लङ्गलेश्वरशैवक्षेत्र-मन्यतमम् । यः शिवस्तु स्वयम्भुः भवति । अस्य माहात्म्यं प्रतिष्ठा च लोकमुखे नितरां श्रूयते । बालेश्वरेऽपि झाडेश्वरमहादेवस्य महतीप्रतिष्ठा महांश्च भक्तानां समवायो भवति । कटकमण्डले नरसिंहपुरप्रान्ते चम्पेश्वरग्रामे एकः पुराणप्रसिद्धः शिवो विद्यते । यस्य शिवलिङ्गस्य प्रतिष्ठा बाणासुरेण कृता । अत्रापि महती प्रतिष्ठा विद्यते । धामरावन्दरपार्श्वे एका धामराई इति देवी विद्यते । या देवी बहूनां नृपतीनां प्राणरक्षयित्री भवति । अत्रापि बहवः उत्सवाः पारम्परीकरीत्या अनुष्ठिताः भवन्ति । पुरीमण्डले अनेकानि क्षेत्राणि प्रसिद्धानि सन्ति । तेषु वरालबालुकेश्वरः शिवमन्दिरमपि च भुवनेश्वरे कपिलेश्वरः, ओडग्रामे प्रसिद्ध रघुनाथमन्दिरं, शरणकुले लडुकेश्वरमन्दिरं बाणपुरे दक्षेश्वरमन्दिरं प्रसिद्धं भवति । एतेषां समेषां क्षेत्राणां यद्यपि पौराणिकं तथ्यं नास्ति तथापि लोकश्रुति किम्बदन्तीप्रभृतीनां पर्यालोचनेन प्रत्येकस्यापि क्षेत्रस्य महत्त्वं

भगवदस्तित्वमनुभूयते । तदर्थं भारतस्य संस्कृतिः तदैव महत्त्वपूर्णा जनानामपि अयमेव विश्वासः यत् देशस्यास्य रक्षाकर्त्ता कश्चिद्दृश्यमानः परमशक्तिमानलौकिक-सर्वज्ञानसम्पन्नः सर्वेषां जीवानां मूलाधारः परब्रह्म एव । एवमेव विश्वासः वैज्ञानिकयुगेऽपि जनान् प्रेरयति धर्मभावनां प्रति । इयमेव ऐश्वरिकी शक्तिः नित्या शाश्वती च ।

भारतीयतीर्थक्षेत्रेषु उत्कलीयतीर्थक्षेत्राणां सन्तुलनम्

करुणावरुणालयस्य परंब्रह्मणः इच्छया सृष्टिरीयं बहुप्राचीनकालाद् विराजमानाऽस्ति । यदा यदा आसुरीशक्त्याः विकाशो जायते धर्मस्य स्थापनार्थं सृष्टेर्भारलाघवार्थञ्च भगवान् देहधारणं कृत्वा दुष्टान् नाशयति । सतां संस्थापयति च । एतादृशी स्थितिः बहुवारं संघटिता इति शास्त्राणां पुराणानां प्राचीनग्रन्थानाञ्च परिशीलनेन अस्माभिः विज्ञायते ।

समग्रभारतवर्षं देवानां प्रियक्षेत्रं भवति । कदाचित् मानवानां दुःखविनाशाय कदाचिच्च तपस्यार्थं कदाचिद्वा मनुष्यरूपेण जीवनयापयितुं धरातले देवतानामाविर्भावो जातः । कालान्तरे तत्तत्स्थानं मनुष्याणां कृते परमपावनं मुक्तिदायकं तीर्थक्षेत्ररूपेण परिगणितं भवति । तादृग्विधं स्थानं भारतवर्षे बहुसंख्यकं विद्यते । तेषु अयोध्या, मथुरा, हरिद्वार, काशी, काञ्चीपुरं, अवन्तिका, द्वारावती सुप्रसिद्धानि तीर्थक्षेत्राणि । एतद्भिन्नमपि अन्यानि स्थानानि विद्यन्ते तद्यथा कामाक्षाक्षेत्रं, तिरुपतिक्षेत्रं, कलिकतायां कालिक्षेत्रं, रामेश्वरक्षेत्रं, मीनाक्षिक्षेत्रं, मायाक्षेत्रमित्यादीनि शैव, शाक्त, गाणपत्य, वैष्णवक्षेत्राणि समग्रेऽस्मिन् भारतवर्षे बहुनि विराजन्ते । सम्प्रदायानुसारं भारतस्य जनाः देवमन्दिराणि प्रतिष्ठितवन्तः । प्रसङ्गेऽस्मिन् उत्कलस्यापि भूमिका बहुप्राचीनकालान् महती विद्यते ।

अस्मिन् क्षुद्रेऽपि प्रदेशे सर्वविधानां देवानां प्राचीनानि मन्दिराणि कलाभास्कर्यपूर्णानि मनांसि रञ्जयन्ति। अत्रापि श्रीजगन्नाथमन्दिरस्य वैशिष्ट्यं पृथिवीप्रसिद्धं विष्णुक्षेत्ररूपेण जगन्नाथक्षेत्रं विद्यते । अन्यान्यपि विष्णुमन्दिराणि यथा बलदेवस्य तुलसीक्षेत्रम् ओड्रग्रामे रघुनाथमन्दिरम्, बहुनि गोपीनाथमन्दिराणि उत्कलभूमौ विराजन्ते । अतः सर्वभारतीयस्तरे यानि विष्णुक्षेत्राणि सन्ति तेषु यथा द्वारका-मथुरा-वृन्दावनादिषु जगन्नाथ-क्षेत्रस्यास्यं न कदापि न्यूनता अपि तु महती प्रतिष्ठा विद्यते ।

शाक्तसम्प्रदायेऽपि यावन्ति शक्तिपीठानि विद्यन्ते तेषु हरिद्वारपीठं, कामाक्षापीठम्, कालिकापीठं, मीनाक्षीपीठं यथा प्राधान्यं प्राप्नोति तथैव उत्कलस्य विरजाक्षेत्रम्, विमला, शारलाक्षेत्रम्, कटकचण्डीक्षेत्रम्, बाणपुरभगवतीक्षेत्रम्, तारिणीक्षेत्रं च सर्वमान्यं माहात्म्यमैतिह्यं च एतानि क्षेत्राणि आवहन्ति । सूर्यक्षेत्रदृष्ट्या समग्रे विश्वे कोणार्कस्य स्थानं सर्वाग्रगण्यं सर्वप्राधान्यमिति न काऽपि विप्रतिपत्तिः ।

शैवसम्प्रदाये भारतस्तरे यथा द्वादशज्योतिर्लिङ्गानि मान्यानि भवन्ति तथैव उत्कले स्थितस्य लिङ्गराजशैवक्षेत्रस्य न काऽपि न्यूनता विद्यते । अतः सर्वभारतीयदेवदेवीनां नदनदीनां पुण्यस्थानानि च पर्यालोचनेन सन्तुलनेन च उत्कलस्य महत्त्वं स्वतः समालोचकानामग्रे उद्भासितं भवति। तदर्थं केनापि कविना उत्कलस्य महत्त्वमैतिह्यं सांस्कृतिकवैभव्यं दृष्ट्वा प्रतिपादितं भारतकमले उत्कलप्रदेशः मध्यवर्त्तिकेशरमिव सुशोभितं दृश्यते। प्राचीनस्यास्योत्कलदेशस्य कलायाः संस्कृतेश्च सुरक्षानिमित्तं समुन्नतये च सर्वकारीयस्तरे साङ्गठनिकस्तरे वा प्रयासः कर्त्तव्यः ।

प्रबन्धेऽस्मिन् मया भारतस्य तीर्थानां तेषु च उत्कलीयतीर्थानां

धर्मशास्त्रीयसमीक्षणं प्रतिपादितम् । धर्मशास्त्रं तु बहुप्राचीनकालाद् नितरामेव आस्तिकभावसम्पन्नानां जनानां सन्मार्गप्रदर्शनं करोति, पापपुण्यं निर्दिशति, पापाय प्रायश्चित्तं व्रतं तीर्थाटनाय आदिशति । राजानं प्रति व्यवहारदर्शनाय नियमानां प्रदर्शनं करोति । चतुर्णां वर्णानां नित्य-नैमित्तिक-काम्य-आपत्कर्माणि च निर्दिशति धर्मशास्त्रम् । कदाचिद् ज्ञानं स्थितेऽपि निर्णेतुमशक्यभूत्वा जनः पापमाचरति । तदर्थं देशाचारस्य विकल्पस्य युग्मवाक्यस्य विचारोऽपि कर्त्तव्यो भवति । अत्र मया नैमित्तिककर्ममध्ये काम्यकर्ममध्ये च यद्यपि तीर्थाटनस्य माहात्म्यं प्रतिपादितं तथापि निष्कामभावेन नित्यकर्मरूपेण वा तीर्थाटनं देवदर्शनं च अवश्यमेव कर्त्तव्यम् ।

मम यादृशः विश्वासः विषयेऽस्मिन् येषां येषां पण्डितानां प्रवेशः तेषां मतं गृहीत्वा गुरूणां च आशीर्वादेन अहं वक्तुं शक्नोमि यत् नाद्यापि विषयस्यास्य धर्मशास्त्रीयं समीक्षणं जातम् । नवीनतया चैतत्कर्म सञ्जातम्। अस्य प्रबन्धस्य पर्यालोचनेन सादरग्रहणेन च मम श्रमः सार्थको भवेत् । वादे वादे तत्त्वबोधः इति न्यायेन अपरेऽपि विद्वांसः विषयेऽस्मिन् कर्मकृत्वा जनानां दिग्दर्शनं कुर्वन्तु, जनान्नपि उपदेशप्रदानेन संसारबन्धबन्धनान्निस्तारयन्तु इति जगदीश्वरस्य पादाब्जयोः प्रणतिं समर्प्य विरमामीति शम् ॥

***

ग्रन्थसूची

१ आपस्तम्बगृह्यसूत्रम् -हरदत्तमिश्रः, चौखम्बासंस्कृतसिरीज् वाराणसी, १९७१

२. ओडिशार देवदेवी -व्रजमोहनमहान्ति, उत्कलपाठकसंसद, कटक, १९८०

३. ओडिशार पर्वपर्वाणि ओषा व्रत यानियात्रा -व्रजमोहनमहान्ति, नारायणी प्रिण्टर्स, वाखरावाद, कटक, १९७९

४. ओडिशार सांस्कृतिक इतिहास -अभिराममहापात्र, ग्रन्थप्रकाशनी, कटक, १९७८

५. ओडिशा सांस्कृतिक इतिहास -ओडिशा कल्चराल् फोरम्, ग्रन्थमन्दिर, कटक, १९७८

६. कर्मकाण्डपद्धतिः -गोपालचन्द्रत्रिपाठीशर्मा, विजयप्रेस् कटक, १९७८

७. कृत्यकल्पतरुः -भट्ट श्रीलक्ष्मीधरः, चौखम्बा संस्कृत-पुस्तकालयः, १९५०

८. केदारखण्डस्य सिद्धपीठानां सर्वेक्षणात्मकमध्ययनम् -डॉ० ललितप्रसाद पाण्डेय, उत्तरप्रदेश, ऋषिकेश जिल्ला, देरादुन्, १९८५

९. कौटलीय अर्थशास्त्रम् -श्रीवाचस्पतिरेला, विद्याभवनसंस्कृत-ग्रन्थमाला, १९७७

१०.गरुडपुराणम् -डॉ० अवधविहारीलाल अवस्थि, कैलासप्रकाशन, लखनऊ, १९६८

११.गौतमधर्मसूत्राणि -डॉ० उमेशचन्द्रपाण्डेय, काशीसंस्कृत-ग्रन्थमाला, १९६६

१२.चतुर्वर्गचिन्तामणि -हेमाद्रि, एसिआटिक् सोसाईटी, १९३०

१३.तर्कसंग्रहः -अनन्तभट्टः, चौखम्बासंस्कृतप्रकाशन, वाराणसी

१४.तात्पर्यचन्द्रिका -व्यासतीर्थ, हारथी राघवेन्द्र राओ, महीशूर,

१५.तीर्थचिन्तामणिः -वाचस्पतिमिश्रः, एसिआटिक् सोसाईटी प्रकाशितम्, १९१२

१६.तीर्थप्रकाशः -मित्रमिश्रः, चौखम्बा संस्कृतसिरीज्,वाराणसी
१७.तैत्तरीयब्राह्मणम्(१मभाग) -संशोधकः नारायणशास्त्री, आश्रममुद्रणालय
१८.दत्तपुराणम् -स्वामीवासुदेवानन्दसरस्वती, कृष्णदास अकादमी, वारणसी, १९७५
१९.दण्डविवेकः -डॉ० भवतोषभट्टचार्यः, दि एसिआटिक् सोसाईटी, १९७३
२०.दायभागः -सुब्रमण्यशास्त्री, मोतीलालवनारसीदास दिल्ली, १९८२
२१.धर्मकल्पद्रुमः -श्रीस्वामीदयानन्द, जगतगञ्ज, वनारस
२२.धर्मदर्शन -सुखदेवसिंहशर्मा, विहार हिन्दीग्रन्थ अकादमी, पाटना, १९७३
२३.धर्मशास्त्र का इतिहास -डॉ० पाण्डुरङ्गवामन काणे, राजर्षि पुरुषोत्तमदास टण्डन हिन्दीभवन महात्मागान्धीमार्ग, नखनऊ, १८६६
२४.धर्मशास्त्रसंग्रहः -श्रीजोषानन्दविद्यासागर भट्टाचार्य, सरस्वतीप्रेस, कलिकता, १८७६
२५.धर्मसिन्धुः -श्रीवशिष्ठदत्तमिश्रः, चौखम्बाविद्याभवन वाराणसी, १९६८
२६.निरुक्तभाष्य (उत्तरार्द्ध) -भाष्यकार चन्द्रमणिविद्यालङ्कार, आर्ष-कन्यागुरुकुल नरेला, १९७५
२७.निघण्टुः -श्रीमत्स्वामी दयानन्दसरस्वती, वैदिक-पुस्तकालय, अजमेर, १९६१
२८.नित्याचारप्रदीपः -पं.कुलमणिमिश्रः, श्रीसदाशिवकेन्द्रीय-संस्कृतविद्यापीठम्, पुरी, १९८४
२९.निर्णयसिन्धुः -कमलाकरभट्ट, निर्णयसागरमुद्रणालयः, मुम्बई, १९४९
३०.नीतिकल्पतरुः -भी.पी.महाजन, भण्डारकर ओरियण्टाल् रिसर्च इनिष्टिट्युट्, पुना, १९५६
३१.नीतिमयूखः -ब्राकेरत्युपाह्वमहादेवशर्मा, गुजरातीमुद्रणालय
३२.नीलाद्रिमहोदयः -श्रीधरशर्मा, शिक्षामन्त्रणालय, नईदिल्ली

३३.पण्डितसर्वस्व -राजा श्रीकिशोरचन्द्रदेवः, उत्कलसाहित्य प्रेस्, कटक, १९३६

३४.पराशरधर्मस्मृतिः -वामनशास्त्री इसलामपुरकर, ब्रीटिस् इण्डिआ प्रेस्, मुम्बई, १९१९

३५.पराशरस्मृतिः -चन्द्रकान्ततर्कालङ्कारः, दि एसियाटिक् सोसाइटी, १९७३

३६.पारस्करगृह्यसूत्रम् -डॉ० हरिदत्तशास्त्री, भारतीयविद्याप्रकाशन

३७.प्रायश्चित्तविवेकः -पं.कुलमणिमिश्रः, श्रीसदाशिवकेन्द्रीय-संस्कृतविद्यापीठम्, पुरी, १९८२

३८.पुरुषार्थचतुष्टयम् -प्रेमवल्लभत्रिपाठी, राजविद्याग्रन्थमाला, वाराणसी, १९७०

३९.पुरुषार्थचिन्तामणिः -वासुदेवशर्मा, मोतिलालसंस्कृतसिरिज् नईदिल्ली, १९५७

४०.ब्रह्मतत्त्वदर्शन -पं. रामप्रसादशर्मा, शिवतत्त्वदर्शनग्रन्थ-प्रकाशनसमिति, मध्यप्रदेश, १९८२

४१.ब्रह्मस्मृतिः -हरिकिशोरवाजपेयी,शङ्करयन्त्रणालय,१८८५

४२.बीस् स्मृतियाँ -पं. श्रीरामशर्मा, संस्कृतिसंस्थान, वरेली

४३.बौधायनधर्मसूत्रम् -चिन्नस्वामी शास्त्री, चौखम्बासंस्कृत-सिरीज्, वाराणसी, १८७२

४४.भगवन्तभास्करः -श्रीनीलकण्ठभट्टः, चौखम्बा संस्कृत-प्रतिष्ठान, वाराणसी, १९७६

४५.भारतस्य सांस्कृतिकनिधिः -डॉ० रामजीउपाध्यायः, संस्कृतपरिषद विश्वविद्यालयः, सागरः, १९७१

४६.भारतीय धर्म एवं संस्कृति -डॉ० विजेन्द्रपालसिंह, विभुप्रकाशन, साहिबाबाद, १९७७

४७.मण्डपकुण्डसिद्धिः -श्रीकृष्णदासात्मजगङ्गाविष्णोः, लक्ष्मी-वेङ्कटेश्वरमुद्रणालय, १८३८

४८.मत्स्यमहापुराणम् -डॉ० पुष्पेन्द्रशर्मा, मेहरचन्दलछमनदास,दिल्ली

४९.महापातकविमर्शः -डॉ० अतुलकुमारनन्दशर्मा, विद्याभवनप्रकाशन, वाराणसी, १९९२

५०.मनुस्मृतिः -भट्टरामेश्वरः, चौखम्बाविद्याभवन,वाराणसी
५१.मीमांसान्यायप्रकाशः -आपदेवः, लालवाहादूरशास्त्रीकेन्द्रीय-संस्कृतविद्यापीठम्, नईदिल्ली, १९८३
५२.मीमांसान्यायप्रकाशः -आपदेवः, भण्डारकर ओरियण्टाल् रिसर्च इनिष्टिच्युट्, पुना, १९७२
५३.याज्ञवल्क्यस्मृतिः -योगीश्वरयाज्ञवल्क्यः, चौखम्बासंस्कृत-संस्थान, वाराणसी, १९८३
५४.याज्ञवल्क्यस्मृतिः -उमेशपाण्डेय, चौखम्बासंस्कृतप्रकाशन वाराणसी, १९८३
५५.रघुवंशमहाकाव्यम् -कालिदासः, चौखम्बासंस्कृतप्रकाशन, वाराणसी-१९८३
५६.रामायणम् -वाल्मीकि, सातकडिमुखोपाध्यायः, परिमलप्रकाशन, १९८३
५७.वर्षकृत्य (द्वितीयभागः) -श्रीरामचन्द्रझा, चौखम्बाविद्याभवन, वाराणसी, १९७५
५८.वामनमहापुराणम् -श्रीकृष्णदासः,वेङ्कटेश्वरमुद्रणालयः,१९८३
५९.विवादचिन्तामणिः -वाचस्पतिमिश्रः, लक्ष्मीकान्त झा,पाटना
६०.विष्णुधर्मोत्तरपुराणम् -चारुदेवशास्त्री, नागपब्लिसर्स, दिल्ली
६१.वैयाकरणसिद्धान्तकौमुदी -गोपालदत्तपाण्डेय, चौखम्बासंस्कृत-प्रतिष्ठान, १९८१
६२.व्यवहारमयूखः -श्रीनीलकण्ठभट्टः, गुजराती प्रेस्, मुम्बई, १९२३
६३.शतपथब्राह्मणः -चिन्नस्वामी शास्त्री. चौखम्बासंस्कृत-संस्थान. वाराणसी. १९८४
६४.शुद्धिप्रकाशः -मित्रमिश्रः, चौखम्बासंस्कृतसिरीज्, वाराणसी, १९३७
६५.शङ्करवेदान्त -रमाकान्त अङ्गीरस, नटराजपब्लिसिं हाउस्, १९८२
६६.श्राद्धकल्पः -भागीरथप्रसादत्रिपाठी,रिसर्चइनिष्टिच्युट् वाराणसी, १८९३

६७.श्राद्धक्रियाकौमुदी -गोविन्दानन्द, एसिआटिक्सोसाइटी
६८.श्राद्धप्रदीपः -डॉ० व्रजकिशोरस्वाईं, अरुणिमा प्रिण्टिं वार्कस्, कलिकता, १९८२
६९.श्राद्धमञ्जरी -हरिनारायण आप्टे, आनन्दाश्रम-मुद्रणालय. १८०१
७०.श्रीपुरुषोत्तममाहात्म्यम् -क्षेमराजश्रीकृष्णदास, श्रीवेङ्कटेश्वर-मुद्रणालये प्रकाशितम्, १९६६
७१.श्रीमद्भगवद्गीता -व्यासदेवः, गीताप्रेस्, गोरखपुर
७२.श्रीमद्भागवतमहापुराणम् -वेदव्यासः, गीताप्रेस्, गोरखपुर, १९१८
७३.सदाचारशिक्षा -वासुदेवद्विवेदी, सार्वभौमसंस्कृतप्रचार-कार्यालय, वाराणसी, १९७२
७४.सन्ध्याभाष्यसमुच्चयः -हरिनारायण आप्टे, पुण्यपत्तनम्, आनन्दाश्रममुद्रणालय, १८९९
७५.समयप्रकाशः -मित्रमिश्रः, चौखम्बा संस्कृत सिरीज्, वाराणसी, १९३५
७६.स्कन्दमहापुराणम् -नागशरणसिंह, नागपब्लिसर्स, जवाहरनगर, दिल्ली, १९८२
७७.संस्कारमयूखः -पं. नरहरिशास्त्री, गुजरातीमुद्रणालयः,१९६९
७८.स्वत्ववादः -हेरम्बनाथ चट्टोपाध्यायशास्त्री, संस्कृत-साहित्यपरिषद, १९८०
७९.स्मृतिचन्द्रिका -याज्ञिकदेवणभट्टोपाध्याय, युनिभरसीटि महीशूर, १९२१
८०.स्मृतिसारोद्धारः -पं.विश्वम्भरदीक्षितः, विद्याविलासप्रेस् वाराणसी. १९११
८१.स्मृतिसारसंग्रहः -डॉ० अतुलकुमारनन्दशर्मा, पुरी,२००१
८२.स्मृतीनां समुच्चयः -हरिनारायण आप्टे, आनन्दाश्रम-मुद्रणालय, १८२७
८३.हारलता -अनिरुद्धभट्ट, एसिआटिक् सोसाइटी,१९०८

SRI SARSIMHA UNIVERSITY (UNDER MINISTRY OF H.R.D.)
ACCESSION NO. 27818
DATE 1/10/10

***

Other Publications of Author : -

1. Mahapatak Vimarsha
2. Smrti Sara Samgraha
3. Achara Nirnaya

CSUGCKL
2
27818
Acc.No: 27818